
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

४१७

पु० ४६

अथश्रीमद्विद्यारण्यकृतजीवन्मुक्तिविवेकाख्यषोडशप्रकरणप्रारंभः॥ कृदं बोपन्नामकम हीपतीशाज्ञिणामिदं पुस्तकं श्रीपंचवक्त्रा संपादितमस्ति॥



Acc. No. ~~1208~~ M 1470
Title - जीवन्मुक्तिविवेक (अपूर्ण)
Author - विद्यारण्य
Date - ?
Subject - Vedanta
folio - 117 (46, 108, 109, 110 नं. ची folios गहाळ)
Xerox - 234

१

॥श्रीवासुदेवाय नमः॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥१॥ वक्ष्ये विविदिषान्यासं विद्वन्न्यासं च भेदतः। हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात्॥२॥ संन्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा। प्रव्रजेदिति वेदोक्तेस्तद्भेदस्तु पुराणतः॥३॥ विरक्तिर्द्विविधा प्रोक्ता तीव्रा तीव्रतरेति च। सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचके। शक्तौ बहूदके तीव्रतरायां हंससंज्ञिते। मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधने॥५॥ पुत्रदारधनादीनां नाशे तात्कालिकी मतिः। धिक्संसारमितीदृक्स्याद्विरक्तेर्मंदता हि सा॥६॥ अस्मिन्जन्मनि मा भूवन्पुत्रदारादयो मम। इति या सुस्थिरा बुद्धिः सा वैराग्यस्य तीव्रता॥७॥ पुनरावृत्तिसहितो लोको मे मास्तु कश्चन। इति तीव्रतरत्वं स्यान्मंदे न्यासो न कश्चन॥८॥ यात्राद्यशक्तिभ्यां तीव्रे न्यासद्वयं म

१

शक्ति २

वेत। कुटीचको बहूदकश्चैव तु भावेतौ त्रिदंडिनौ॥९॥ द्वयंतौ त्वनरे ब्रह्मलोकमोक्षविभेदतः।
तल्लोके तत्त्वविद्धंसो लोकेऽस्मिन्परमहंसकः॥१०॥ एतेषां तु समाचाराः प्रोक्ताः पाराश
रस्मृतौ। व्याख्यानेऽस्माभिरत्रायं परहंसो विविच्यते॥११॥ जिज्ञासुर्ज्ञानवांश्चेति परम
हंसो द्विधा मतः। प्राक्ज्ञानाय जिज्ञासोर्न्यासं वाजसनेयिनः॥१२॥ प्रव्राजिनो लोकमे
तमिच्छंतः प्रव्रजंति हि। एतस्यार्थं तु गद्येन वक्ष्ये मंदविबुद्धये॥१३॥ लोको हि द्विविधः
आत्मलोकोऽनात्मलोकश्चेति। तत्रानात्मलोकस्य त्रैविध्यं बृहदारण्यके तृतीयाध्या
ये श्रूयते। अथ त्रयो वाव लोकाः मनुष्यलोकः पितृलोको देवलोक इति। सोऽयं मनुष्य
लोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोक इति। आ
त्मलोकश्च तत्रैव श्रूयते। यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो

नमुनक्तीति।आत्मानमेवलोकमुपासीतसयआत्मानमेवलोकमुपास्तेनहास्य[कर्म]
क्षीयतइतिचोपरिष्टाध्यायेपिकिंप्रजयाकरिष्यामोयेषांनोयमात्मायंलोकइति।एवंच
सत्येतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतीत्यत्रात्मलोकोविवक्षितइतिगम्यते।
सवाएषमहानजआत्मेतिप्रक्रम्यात्मनएतच्छब्देनपरामृष्टत्वाल्लोक्यतेऽनुभूय
तइतिलोकइति।तथाचात्मानुभवमिच्छंतःप्रव्रजंतीतिश्रुतेस्तात्पर्यार्थःसंपद्यते।स्व
निष्ठा।ब्रह्मविज्ञानलाभायपरमहंससमाख्यःशांतिदांत्यादिभिःसर्वैःसाधनैःस
हितोभवेदिति।इहजन्मनिजन्मांतरेवासम्यगनुष्ठितैर्वेदानुवचनादिभिरुत्पन्न
याविविदिषयासंपादितत्वादयंविविदिषासंन्यासइत्युच्यते।अयंचवेदनहेतुःसं
न्यासोद्विविधः।जन्मापादककर्मादित्यागमात्रात्मकः।प्रैषोच्चारणपूर्वकदंडधार

णाद्याश्रमरूपश्चेति। त्यागश्चानेन त्रिरीयारोऽश्रूयते। न कर्मणा न प्रजया न धनेन त्यागे
नैके अमृतत्वमानशुरिति। अस्मिंश्च त्यागे त्रिविधोऽप्यधिक्रियते। अत एव मैत्रेयी वाक्य
मान्नायते। येनाहं नामृता स्यां किमहं तेन कुर्यां। यदेव भगवान्वेद तदेव मे ब्रूहीति।
ब्रह्मचारी गृहस्थो वानप्रस्थो वा नैकेन चिन्निमित्तेन संन्यासाश्रमस्वीकारे प्रतिबंधे
त्वाश्रमधर्मेष्वनुष्ठीयमानेष्वपि वेदनार्थी मानसकर्मादित्यागो न विरुध्यते। श्रुति
स्मृतीतिहासपुराणेषु लोके च तादृशां तत्त्वविदां बहूनामुपलंभात्। यस्तु दंडधा
रणादिरूपो वेदनहेतुः परमहंसाश्रमः स पूर्वैराचार्यैर्बहुधा प्रपंचित इत्यस्माभि
रुपरम्यते। इति विविदिषासंन्यासः॥ अथ विद्वत्संन्यासं निरूपयामः। सम्यगनुष्ठितैः
श्रवणमनननिदिध्यासनैः परं तत्त्वं विदितवद्भिः संपाद्यमानो विद्वत्संन्यासः। तं च

जीव०
३

याज्ञवल्क्यः संपादयामास तथाहि विदग्धशिरोमणिर्भगवान् याज्ञवल्क्यो विजिगीषु
कथायां जल्पविधेन तत्त्वनिरूपणेनाश्वल प्रभृतीन्मुनीन् विजित्य वीतरागक
थायां संक्षेपविस्ताराभ्यामनेकधा जनकं बोधयित्वा मैत्रेयीं बुबोधयिषुस्तस्यास्त्वर
यातत्त्वाभिमुख्याय स्वकर्तव्यं संन्यासं प्रतिजज्ञे ततस्तां बोधयित्वा संन्यासं चकार।
तदुभयं मैत्रेयीब्राह्मणस्याद्यन्तयोराम्नायते। अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरि
ष्यन्मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजि ष्यन्वा अरेऽहमस्मात्स्थानादस्मीति। एता

२

वदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति च। कहोलब्राह्मणेऽपि विविद
षासंन्यास आम्नायते। एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणा
याश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति। न चैतत्क्वापि विविदिषासं

३

न्यासपरमिति शांकनीयं। पूर्वकालवाचीनो विदित्वेति क्त्वाप्रत्ययस्य ब्रह्मविद्याविनो
ब्राह्मणशब्दस्य च बाधप्रसंगात्। न चात्र ब्राह्मणशब्दो जातिवाचकः बाक्यशेषे पांडित्य
बाल्यमौनशब्दाभिधेयैः श्रवणमनननिदिध्यासनैः साध्यं ब्रह्मसाक्षात्कारमभिप्रे
त्याथ ब्राह्मण इत्यभिहितत्वात्। ननु तत्र विविदिषासंन्यासोपेतः पांडित्यादौ प्रवर्त
मानोपि ब्राह्मणशब्देन परामृष्टः तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेदि
ति मैवं। भाविनीं वृत्तिमाश्रित्य तत्र ब्राह्मणशब्दस्य प्रयुक्तत्वात्। अन्यथा कथमथ
ब्राह्मण इति साधनानुष्ठानोत्तरकालवाचिनमथशब्दं प्रयुंजीत शारीरके ब्राह्मणो
पि विद्वत्संन्यासविविदिषासंन्यासौ स्पष्टं निर्दिष्टौ। एतमेव विदित्वा मुनिर्भवत्येत
मेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति। मुनित्वं मननशीलत्वं। तच्चासति कर्तव्या

जीव०
५

तरेसंभवतीत्यर्थात्संन्यास एवाभिधीयते। एतच्चवाक्यशेषेस्पष्टीकृतं। एतद्धस्मवै
तत्पूर्वे विद्वांसः प्रजां न कामयंते किं प्रजया करिष्यामो येषां नोयमात्मायंलोक इति।
ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरं
तीति। अयं लोक इत्यपरोक्षेणानुभूयत इत्यर्थः। नन्वत्र मुनित्वेन फलेन प्रलोभ्य वि
विदिषासंन्यासं विधाय वाक्यशेषे स एव प्रपंचितः। अतो न संन्यासांतरं कल्पनीयं।
मैवं। वेदनस्यैव विविदिषासंन्यासफलत्वात्। न च वेदन मुनित्वयोरेकत्वं शंकनी
यं। विदित्वा मुनिर्भवतीति पूर्वोत्तरकालीनयोस्तयोः साध्यसाधनत्व प्रतीतेः। न
नु वेदनस्यैव परिपाकातिशयरूपमवस्थांतरं मुनित्वं। अतो वेदनद्वारा पूर्वसंन्या
सस्यैव तत्फलमिति चेत्। बाढं। अत एव साधनरूपात्संन्यासादन्यं फलरूपमेनं सं

प२

भाव
५

न्यासंक्रमः। यथा विविदिषासंन्यासिना तत्त्वज्ञानाय श्रवणादीनि संपादनीयानि।
तथा विद्वत्संन्यासिनापि जीवन्मुक्तये मनोनाशवासनाक्षयौ संपादनीयौ एतच्चोप
रिष्टात्प्रपंचयिष्यामः। सत्यप्यनयोः संन्यासयोरवांतरभेदे परमहंसत्वाकारेणैकी
कृत्य चतुर्विधा भिक्षव इति स्मृतिषु चातुःसंख्योक्ता। पूर्वोक्तयोस्तयोः संन्यासयोः
व१ परमहंसत्वं जाबालश्रुतावगम्यते। तत्र हि जनकेन संन्यासे पृष्टे सति याज्ञव
ल्क्योधिकारिविशेषविधानेनोक्तकालानुष्ठेयेन च सहितं विविदिषासंन्यास
मभिधाय पश्चादत्रिणा यज्ञोपवीतरहितस्याक्षिप्ते ब्राह्मण्ये पश्चादात्मज्ञानमे सति२
व यज्ञोपवीतमिति समादधौ। अतो बाह्ययज्ञोपवीताभावात्परमहंसत्वं निश्ची
यते। तथा न्यासोकंडिकायां तत्र परमहंसा नाम संवर्तकादीन्बहुविधा

जीव०
५

दंड
न

न्कुलविदो जीवन्मुक्तानुदाहृत्याव्यक्तलिंगा अव्यक्ताचारा अनुन्मत्ता उन्म
त्तवदाचरंत इति विद्वत्संन्यासिनो दर्शिताः। तथा त्रिदंडं कमंडलुं शिक्यं पात्रं जल
पवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूः स्वाहेत्यप्सु विसृज्यात्मानमन्विच्छेदिति।
त्रिदंडिनः सतएकवेणं लक्षणं विविदिषासंन्यासं विधाय तत्फलरूपं विद्वत्सं
न्यासमेवोदाजहार। यथाजातरूपधरो निर्द्वंद्वो निःपरिग्रहस्तत्त्वब्रह्ममार्गे सम्य
क्संपन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्नुद
रपात्रेण लाभालाभौ समौ कृत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूल
कुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकंदरकोटरनिर्झरस्थंडिलेष्व
निकेतवासी निःप्रयत्नो निर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठः शुभाशुभक

५

एव

र्मनिर्मुक्तनोपि संन्यासेन देहत्यागं करोति स परमहंसो नामेति। तस्मादनयोरुभयोः पर
महंसत्वे सिद्धे समानेपि परमहंसत्वे विरुद्धधर्माक्रांतत्वादंतरमेदोप्यभ्युपगंत
व्यः। विरुद्धधर्मत्वं चारुण्युपनिषत्सु परमहंसोपनिषदोः पर्यालोचनायामवगम्यते। के
नीः न भगवन्कर्माण्यशेषतो विसृजामीति शिखायज्ञोपवीतस्वाध्यायगायत्रीजपाद्यशे
षकर्मत्यागरूपे विविदिषासंन्यासे शिष्येणारुणिना पृष्टे गुरुः प्रजापतिः शिखां य सति
ज्ञोपवीतमित्यादिना सर्वत्यागमभिधाय दंडमाच्छादनं कौपीनं च परिग्रहेदिति दं
डादिस्वीकारं विधाय त्रिसंध्यादौ स्नानमाचरेत्संधिं समाधावात्मन्याचरेदिति सर्वेषु
कर वेदेष्वारण्यमावर्तयेदुपनिषदमावर्तयेदिति। वेदनहेतुनाश्रमधर्माननुष्ठेयतया
विधत्ते। अथ योगिनां परमहंसानां कोयं मार्ग इति विद्वत्संन्यासेनारदेन पृष्टे सति गुरु

ध्यां

जीव०
६

भगवान्स्वयमुवमित्रेत्यादिनापूर्ववत्संन्यासमभिधायकौपीनंदंडमाछादनंचस्वशरी
रोपभोगार्थायलोकस्योपकारार्थायचपरिग्रहेदितिदंडादिस्वीकारस्यलौकिकत्व
मभिधायतत्रनमुख्योस्तीतिशास्त्रीयत्वंप्रतिषिध्यकोयंमुख्यइतिचेदयंमुख्यो
नदंडंनशिखंनयज्ञोपवीतंनाछादनंचरतिपरमहंसइतिदंडादिलिंगराहित्यस्य
शास्त्रीयतामुक्त्वानग्णीतंनचोद्यमित्यादिवाक्येनस्पार्शांवैरानिर्नमस्कारइत्यादि
वाक्येनचलौकव्यवहारातीतत्वमभिधायांतेयत्पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मी
तिकृतकृत्योभवतीत्यनेनग्रंथेनब्रह्मानुभवमात्रपर्यवसानमाचष्टे।एतौवि
रुद्धधर्मोपेतत्वादत्स्यैवानयोर्महान्भेदः।स्मृतिष्वप्ययंभेदउक्तदिशाद्रष्टव्यः।
संसारमेवनिःसारंदृष्ट्वासारदिदृक्षयाप्रव्रजंत्यकृतोद्वाहाःपरंवैराग्यमाश्रिताः।

६

बृहस्पतिः॥ प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं। तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धि
मानित्यादि विविदिषासंन्यासः। यदा तु विदितं तत्स्यात्परं ब्रह्म सनातनं। तदैकदंडं
संगृह्य सोपवीतां शिखां त्यजेत्। ज्ञात्वा सम्यक्परं ब्रह्म सर्वं त्यक्त्वा परिव्रजेदित्या
दि विद्वत्संन्यासः। ननु कस्ता विद्यास्ति वक्तव्या चिदेतस्य कपमात्रेणापि वेदितुमिच्छा सं
भवत्येव। विरुद्धत्वाप्यापातदर्शिनः पंडितंमन्यमानस्याप्यवलोक्यते न च ततो प्रव्रजं
तोऽदृष्टोऽस्त्यतो विविदिषा विवक्षिता। कीदृशी विवक्षितेति चेदुच्यते॥ यथा तीव्रायां
बुभुक्षायामुत्पन्नायां भोजनादन्यो न रोचते व्यापारः भोजने च विलंबो न सोढुं श

पि

क्यते॥ तथा जन्महेतुषु कर्मस्वत्यंतमरुचिः वेदनसाधनश्रवणादिषु च त्वरा म
हती संपद्यते॥ तादृशी विविदिषा संन्यासहेतुः। विद्वत्तायास्त्ववधिरूपदेशसहस्र्या

जीव० ७

दिकं

मभिहितः॥ देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं॥ आत्मन्येव भवेद्यस्य स नेच्छन्नपि
मुच्यते इति॥ कृत्वावपि॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य क
र्माणि तस्मिं दृष्टे परावरे इति॥ परमपि हिरण्यगर्भोपरमवरं यस्मादसौ परावरः हृद
येषु सो साक्षिणस्तादात्म्याध्यासोनाद्यविद्यानिर्मितत्वेन ग्रंथिवद्दृढसंश्लेषरूपत्वा
द्ग्रंथिरित्युच्यते॥ आत्मा साक्षी कर्ता वा साक्षित्वेपि ब्रह्मत्वमस्ति न वा॥ ब्रह्मत्वेपि तद्बु
ध्यावेदितुं शक्यते न वा॥ शक्यत्वेपि तद्वेदनमात्रेण मुक्तिरस्ति न वे स्यादयः संशयाः
कर्माण्यनारब्धान्यागामिजन्मकारणानि तदेतद्ग्रंथ्यादित्रयमविद्यानिर्मितत्वा
दात्मदर्शनेन निवर्तंते॥ स्मृतावप्ययमर्थ उपलभ्यते॥ यस्य नाहंकृतो भावो बुद्धि
र्यस्य न लिप्यते॥ हत्वापि स इमान् लोकान्न हंति न निबध्यते इति॥ यस्य ब्रह्मविदः

अस्य x ५

७

भावः सत्तास्य भावः आत्मा नाहंकृतो नाहंकारेण तादात्म्यातिभ्रायादंतर्भावितः बु
द्धिर्लेपः संशयः न रभावे वै लोकवधेनापि न बध्यते किमुतान्येन कर्मणेत्यर्थः॥ नन्वे
वं सति विविदिषासंन्यासफलेन तत्त्वज्ञानेनैवागामिजन्मनां निवारितत्वाद्वर्त्तमा
नजन्मशेषस्य भोगमंतरेणानिवारितुमशक्यत्वात्कृतमनेन विद्वत्संन्यासप्रयासे
नेति चेन्मैवं॥ विद्वत्संन्यासस्य जीवन्मुक्तिहेतुत्वात्॥ तस्माद्वेदनाय यथा विविदि
षासंन्यासः॥ एवं जीवन्मुक्तये विद्वत्संन्यासः संपादनीयः॥ इति विद्वत्संन्यासः॥ अ
थ केयं जीवन्मुक्तिः किं वात्र प्रमाणं कथं वा तत्सिद्धिः सिद्धौ वा किं प्रयोजनमिति चे
दुच्यते। जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखादिलक्षणश्चित्तधर्मः क्लेशा
रूपत्वाद्बंधो भवति तस्य निवारणं जीवन्मुक्तिः॥ ननु अयं बंधः किं साक्षिणो निवार्य

जीव०
८

ते किं वाचि ज्ञात । नाद्यं तत्त्वज्ञानेनैव निवारितत्वात् । न द्वितीयः असंभवात् । यदा तु ज
ज्ञात इव तत्त्वं निवार्यते तव क्रियोत्पत्त्वं तदा चित्तात्कर्तृत्वादि निवारणासंभवः स्वाभा
विकत्वं तु समानं सर्वत्र । मैवं । आत्यंतिक निवारणासंभवेपि अभिभवसंभवात् । यथा
जलगतं द्रवत्वं मृत्तिकामेलनेनाभिभूयते । वह्न्युष्णत्वं मंत्रादिना । तथा सर्वाः चित्त
वृत्तयो योगाभ्यासेनाभिभवितुं शक्यंते नंनु प्रारब्धं कर्म कृत्स्नां विद्यां तत्कार्यं नाश्य
नेश्वरतस्य तत्त्वज्ञानस्य प्रतिबंधं कृत्वा स्वफलदानाय देहेंद्रियादिकमवस्थापय
ति । न च सुखदुःखादिभोगः चित्तवृत्तिभिर्विना संपादयितुं शक्यते । ततः कथमभिभवः ।
मैवं । अभिभवसाध्याया जीवन्मुक्तेरपि सुखातिशयरूपत्वेन प्रारब्धफलएवांतर्भावा

८

त् । तर्हि कर्मैव जीवन्मुक्तिं संपादयिष्यति मा भूत्पुरुषप्रयत्न इति चेत् । कृषिवा

णिन्यायादावपि समानः पर्य्यनुयोगः। कर्मणः स्वयमदृष्टरूपस्यादृष्टसाधनसंपत्ति
मंतरेण फलजननासमर्थत्वादपेक्षितः कृष्यादौ पुरुषप्रयत्नवदिति चेज्जीवन्मुक्तावपि
समानं समाधानं। सत्यपि पुरुषस्य प्रयत्ने कृष्यादेः फलपर्य्यवसानं पच्चनदृष्टपनेतत्र
प्रबलेन कर्मांतरेण प्रतिबंधः कल्पनीयः। तच्च प्रबलं कर्मस्वानुकूलादृष्टस्य भावरू
पादृष्टसामग्रीसंपाद्यैव प्रतिबध्नाति स च प्रतिबंधो विरोधिना प्रबलतरेणोत्तंभ
केन कारीरीष्ट्यादिरूपेण कर्मणापनीयते। तच्च कर्मस्वानुकूलादृष्टलक्षणादृष्ट
सामग्रीसंपाद्यैव प्रतिबंधकमपनयति। किंबहुना प्रारब्धकर्मण्यपत्यंतभक्तेन भ
वता योगाभ्यासरूपस्य पुरुषप्रयत्नस्यावैयर्थ्यं मनसापि चिंतयितुमशक्यं दृष्टफ
लत्वात्॥ अथवा प्रारब्धं कर्म यथा तत्त्वज्ञानात्प्रबलं तस्मादपि कर्मणो योगाभ्यासः

प्रबलो। तथा च योगिनामुद्दालकप्रभृतीनां स्वेच्छया देहत्याग उपपद्यते। यद्यप्यस्मा
दृशामस्माकं तादृशो योगो न संभवति तथापि कामादिधीवृत्तिनिरोधे को प्रयासः। य
दि शास्त्रीयप्रयत्नस्य प्राबल्यं नांगीक्रियते तदा चिकित्सामारभ्य मोक्षशास्त्रपर्यंता
नां सर्वेषामानर्थक्यं प्रसज्येत। नहि कादाचित्कफलविसंवादमात्रेण दौर्बल्यमापा
दयितुं शक्यं। अन्यथा कादाचित्कपराजयं दृष्ट्वा सर्वैर्भूपैर्गजाश्वादिसेनोपेक्ष्येत। अ
त एवानंदबोधाचार्यैरप्युक्तं: न ह्यजीर्णभयादाहारपरित्यागो भिक्षुकभयाद्वा स्था
ल्यनधिश्रयणं यूका भयाद्वा प्रावरणपरित्याग इति। शास्त्रीयस्य प्रयत्नस्य प्राबल्यं
वसिष्ठरामसंवादे विस्पष्टमवगम्यते। सर्वमेवेह हि सदे त्वारभ्यतदनुतदप्यवस्तु
घ्यसाधू निष्ठेसंतेन ग्रंथेन॥ वसिष्ठ०। सर्वमेवेह हि सदा संसारे रघुनंदन। सम्यक्

९

यत्नात्सर्वेणापौरुषात्समवाप्यते॥ सर्वेषुत्रवित्तस्वर्गलोकब्रह्मलोकादिफलंपौ
रुषंपुत्रकामेष्टिकृषिवाणिज्यज्योतिष्टोमब्रह्मोपासनानुष्ठानादिलक्षणः पुरु
षयत्नः उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतं॥ तत्रोच्छास्त्रमनर्थाय परमार्था
यशास्त्रितं। उच्छास्त्रं परस्त्रीगमनपरद्रव्यापहारादि। शास्त्रितं नित्यनैमित्तिकानु
न ष्ठानादि। पूर्वो नरकः अपरोऽर्थेषु स्वर्गादिषु परमोक्षेऽपि परमार्थः॥ इष्टा बाल्यादत्तमभ्यु
त्तेः शास्त्रसत्संगमादिभिः। गुणैः पुरुषयत्नेन सोऽर्थः संपद्यते हितः॥ अपलं संपूर्णं
सम्यगित्यर्थः। गुणैर्युक्तेनेत्यध्याहारः। हितः श्रेयोरूपः॥ श्रीरामः॥ प्राक्तनं वासनाजा
लं नियोजयति मां यथा॥ मुने तथैव तिष्ठामि कृपणः किं करोम्यहं॥ वासनाधर्माध
र्मरूपजीवगतसंस्कारः॥ वसिष्ठः॥ अत एव हि हे राम श्रेयः प्राप्नोषि शाश्वतं। स्वप्रय

जीव० १०

त्वोपनीतेनं पौरुषेणैव नान्यथा॥ यतो वासनापरतंत्रो भवानूऽत एव हि पारतंत्र्यनि
वारणाय स्वोत्साहसंपादितो मनोवाक्कायजन्यः पुरुषव्यापारोपेक्षितः॥ द्विविधो वास
नाव्यूहः शुभश्चैवाशुभश्चेति॥ शास्त्रेनोवियतेरामद्वयोरेकतरो यथा॥ किं धर्माधर्मावु
भावपि त्वां नियोजतः उ तेकतरइति विकल्पः॥ एकतरपक्षेऽपि शुभो ऽशुभो वेत्यर्थसि

श्रुद्देनप

द्धो विकल्पः॥ वासनोधेर्नेतन्त्रचेदपनीयसे तत्क्रमेणाशुतेनैव परं शास्त्रसिद्धमाश्व
त॥ नत्वतेषु पक्षेषु तत् तर्हि तेनैव क्रमेणाशुभवासनया प्रापितेनैवाचरणेनपथ्य
लांतरनिरपेक्षेणास्माश्वतं पदं मोक्षं॥ अथ चेद् शुभो भावस्त्वां नियोजयति संक
टे शास्त्रेनस्तदसौ यत्नाज्जेतव्यो भवता स्वयं॥ भावो भावना तत्तर्हि यत्नाशुभविरो
धिशास्त्रीय धर्मानुष्ठानं स्वयं जेतव्यो न तु युद्धेन्तस्य मुखेनैव पुरुषांतरमुखेन जे

तेन

१०

तुं शक्यः॥ शुभाशुभाभ्यां मार्गाभ्यां वहंती वासनासरित्॥ पौरुषेण प्रयत्नेन योज
नीया शुभे पथि॥ उभयपक्षे तु शुभमार्गस्य प्रयत्नेनैरपेक्षेपि अशुभमार्गे शास्त्री
यप्रयत्नेन निवार्यं शुभमेव तस्य स्थाने समाचरेत्॥ अशुभेषु समाविष्टं शुभेष्वेवा
वतारयेत्। स्वमनः पुरुषार्थेन बलेन बलिनां वर॥ अशुभेषु परस्त्रीद्रव्यादिषु।
शुभेषु शास्त्रार्थदेवताध्यानादिषु पुरुषार्थेन पुरुषप्रयत्नेन बलेन प्रबलेन॥
अशुभाच्चालितं याति शुभं तस्मादपीतरत्। जंतोश्चित्तं तु शिशुवत्तस्मात्तच्चाल
येद्बलात्॥ यथा शिशुर्मृद्भक्षणान्निवार्य फलभक्षणे योज्यते तथा चित्तमपि स
दुःसंगात् त्संगेन तद्विपरीतविषयान्निवारयितुं शक्यं॥ समतासांत्वनेनाशु न द्रागिति
शनैः शनैः। पौरुषेण प्रयत्नेन लालयेच्चित्तबालकं॥ चपलस्य पत्रोर्बंधनस्था

मणिमुक्ताद्याकर्षणान्निवार्य कंदुकाद्याकर्षणे योज्यते २

नीव०
११

नेप्रवेशनाय द्वावुपायौ भवतः। हरितत्त्वप्रदर्शनवशेन कंडूयनादिकं वाक्पा
रुष्य दंडादिभिर्भर्त्सनं चेति। तत्राद्येन सहसा प्रवेश्यते द्वितीयेनेतस्ततो धावन्
शनैः शनैः प्रवेश्यते। तथा शत्रुमित्रादिसमत्वं सुखबोधनं। प्राणायामप्रत्याहा
रादिपुरुषप्रयत्नश्चेत्येतौ द्वौ चित्तस्रणं त्सुपायौ। तत्राद्येन मृदुयोगेन शीघ्रं लाल
येत् द्वितीयेन हठयोगेन झगिति न लालयेत् किंतु शनैः शनैरिति॥ द्रागभ्यासव
शाद्याति यदा तिव्रासनोदयं तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन॥ मृदुयो
गाभ्यासाच्छीघ्रमेव सद्वासनोदये सति साफल्यमभ्यासस्य मंतव्यं न त्वल्पका
लत्वेनासंभावना शंकनीया॥ संदिग्धायामपि मत्रां शुभामेव समाहर। शु
भायां वासनावृद्धौ तात दोषो न कश्चन॥ शुभवासनाभ्यस्यमाना संपूर्णा न वेति यदा

११

संदेहस्तदापि शुभाभ्यासे देवात्तद्यथा सहस्रजपे प्रवृत्तस्य दशमीज्ञातसं
पायदा ख्यो संदिग्धा तदा पुनरपि ज्ञातं जपेत् स्पसंपूर्त्तौ संपूर्त्तिः फलिष्यति संपूर्त्तौ तु
तदृष्टोन सहस्रजपोऽद्ब्यतितद्वत् ॥ अभ्युत्थानमनायावद्भवानज्ञाततत्स
रः गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर ॥ ततः पक्वकषायेणानूनं विज्ञा
तवस्तुना ॥ शुभोऽप्यसौ त्वया त्याज्यो वासनौघनिरोधिना ॥ यदतिशुभमगमा
यसेवितं तच्छुभमनुत्तमत्तमनोज्ञभावकुख्या ॥ अधिगम्यपदं यदद्वितीयं तत् म
दनुतरप्यव मुच्यसाधकतिष्ठं स्पष्टोऽर्थः ॥ तस्माद्योगाभ्यासेन कामाद्यभिभव
सम्भवात् जीवन्मुक्तौ न विवदितव्यमिति ॥ इति जीवन्मुक्तिस्वरूपं ॥ श्रुति
स्मृतिवाक्यानि जीवन्मुक्तिसद्भावे प्रमाणानि तानि च कठवल्ल्यादिषु पठंति ।

जीव० १२

विमुक्तश्च विमुच्यत इति। जीवन्नेव देहबंधनात्कामादेर्विशेषेण मुक्तः सन्दे
हपाते भाविबंधाद्विशेषेण मुच्यते वेदनात्स्रागपि शमदमादिसंपादनेन का
मादिभ्यो मुच्यत एव तथाप्युत्पन्नैकामानां तत्प्रयत्नेन निरोधः। अत्र तु धी
रस्यानुदयमात्राद्नुत्पत्तिरेव ततो विशेषेणेत्युच्यते। तथा प्रलये देहपाते सति
किंचित्कालं भाविदेहबंधनान्मुच्यते। अत्रत्वात्यंतिको मोक्ष इत्यभिप्रेत्य विशेषे
णेत्युक्तं। बृहदारण्येऽपि पठ्यते। यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः। अथ
मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति। श्रुत्यंतरेऽपि। सचक्षुरचक्षुरिव सकर्णो
कर्ण इव समना अमना इवेति एवमन्यत्राप्युदाहार्य्यं। स्मृतिषु जीवन्मुक्तस्थित
प्रज्ञभगवद्भक्तगुणातीतब्राह्मणोतिवर्णाश्रमादिनामभिस्तत्र तत्र व्यवह्रियंते।

सप्राणोऽप्राण इवे २

नो ३ च ४ के ४ १२

वसिष्ठरामसंवादेन। ज्ञानैकनिष्ठानामित्यारभ्य स त्किंचिदवशिष्यत इत्यंतेन जी
वन्मुक्तः प्रश्यते। वसिष्ठः। न। ज्ञानैकनिष्ठानामात्मज्ञानविचारिणां। सा जीवन्मुक्तता
देतिविदेहान्मुक्तते वया॥ ज्ञानैकनिष्ठत्वं लौकिकवैदिककर्मत्यागः देहेंद्रियसदस
द्भावमात्रेणामुक्तिद्वयस्याविशेषान्नत्वनुभवतः द्वैतप्रतीतेरुभयत्राभावात्। श्रीरामः
भगवन्विदेहमुक्तस्य जीवन्मुक्तस्य लक्षणं। ब्रूहि येन तथैवाहं यते शास्त्रमयाहशा।
वसिष्ठः। यथास्थितमिदं यस्य व्यवहारवतोपि च। अस्तं गतं स्थितं व्योम स जीवन्मुक्त
उच्यते॥ इदं प्रतीयमानं गिरिनदीसमुद्रादिकं जगत्प्रतिपत्तुर्देहेंद्रियव्यवहारेणास
ह महाप्रलये परमेश्वरेणोपसंहृतं सत्स्वरूपोपमर्दे नास्तं गतं भवति। अत्र तु न तथा
किंतु विद्यत एव देहेंद्रियव्यवहारो गिरिनद्यादिकं च परमेश्वरेणानुपसंहृतत्वात् य

प्रथमेन

जीव०
१२

थापूर्वमवतिष्ठमानं सततं सर्वैरन्यैः प्राणिभिर्विस्पष्टमवलोक्यते। जीवन्मुक्तस्य तत्साक्षा
यक धीवृत्त्यभावात्सुषुप्ताविव सर्वमस्तंगतं भवति स्वयंप्रकाशमानं चिद्धाम केवल
मवशिष्यते बुद्धस्य सुषुप्तौ तात्कालिकधीवृत्त्यभावसाम्येऽपि भाविधीवृत्तिबीजस्य
सद्भावान्न जीवन्मुक्तत्वं॥ नोदेति नास्तमायाति सुखे दुःखे मुखप्रभा। यथाप्राप्ते स्थि
तिर्यस्य स जी०। मुखप्रभा हर्षः स्रक्चन्दनसत्कारादिसुखेऽपि संसारिण इव हर्षो नोदेति
अस्तमयो दैन्यं धनहानिधिक्कारादिदुःखे प्राप्तेऽपि दीनो न भवति इदानींतनस्वप्रय
त्नविशेषमन्तरेण प्रारब्धकर्मोपादितपूर्वप्रवाहागतभिक्षान्नादिकं यथाप्राप्तं तस्मि
न् स्थितिर्देहरक्षा॥ समाधिदार्ढ्येन स्रक्चन्दनादिप्रतीत्यभावात् कदाचिद्व्युत्थानद
शायामापाततः प्रतीतावपि विवेकदार्ढ्येन हेयोपादेयबुद्ध्यभावात् हर्षादिराहित्यमु

प्राप्ते ५

१२

पपद्यते॥ चक्षुरादिरिंद्रियाणां स्वस्वगोलके षववस्थानेनोपरत्स्वभावात् + योजाग्रत्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते। यस्य निर्वासनो बोधः स जी०॥ + जाग्रत्ति मनो रति रहितत्वात्सुषुप्तिस्थः॥ अत एवेंद्रियैरर्थोपलब्धिरस्ति तस्य जागरितलक्षणस्य स्वभा वाज्जाग्रन्न विद्यते। सत्यपि बोधे जायमानो ब्रह्मविस्वाभिमानादिर्भोगार्थ्यापादितका मादिश्चधीदोषो वासना॥ रत्निराहित्येन तद्दोषाभावान्निर्वासनत्वं॥ रागद्वेषभयादी नामनुरूपं चरन्नपि। योंतर्व्योमवदच्छः स जी०॥ रागानुरूपं भोजनादिप्रवृत्तिः द्वे षानुरूपं बौद्धकापालिकादिभ्यो विमुखत्वं॥ भयानुरूपं सर्पव्याघ्रादिभ्योपसर्पणं॥ अपारिशेष्टेन मात्सर्यानुरूपमितरयोगिभ्यः आधिक्येन समाध्याद्यनुष्ठानं। सत्यपि व्युत्थानदशायामीदृशा आचरणे पूर्वाभ्यासेन प्रापिते विश्रांतचित्तस्य काप्युपरहि

भि० ४

भि०

धूम० तिशयेन

जीव० १४

तत्वादंतः स्वछत्वं यथा व्योम्निं धूलिमेघादियुक्तेपि निर्लेपस्वभावत्वादंस्वछत्वं तद्वत्॥
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते। कुर्वतोकुर्वतो वापि सज्जी॥ पूर्वार्द्धं विवृत्तं
न्यासप्रस्तावे व्याख्यातं लोके बद्धस्य पुरुषस्य शास्त्रीयं कर्म कुर्वतोहं कर्त्तेति चिदा
त्माहंकृतो भावि स्वर्गं प्राप्स्यामीति हर्षो बुद्धिर्लिप्यते ऽप्रकुर्वतस्तु त्यक्तवानस्मीति
ऽप्यहंकृतत्वं स्वर्गालाभविषादो दिर्लेपः। एवं प्रतिषिद्धकर्मणि लौकिककर्मणि च
यथासंभवं योजनीयं। जीवन्मुक्तस्य तु तादात्म्याध्यासाभावाद्धर्षाद्यभावाच्च न दोष
द्वयं॥ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयान्मुक्तः सज्जी॥ अ
धिक्षेपताडनादावप्रवृत्तत्वादेतस्माल्लोको नोद्विजते ऽपत एवैतस्मिंल्लोकस्याधिक्षे
पाद्यप्रवृत्तिः कस्यचिद्दुष्टस्य न त्वप्रवृत्तावपि एतच्चित्ते तादृग्विकारस्यानुदयाच्चा

भवति ४ ण ८ १४ प्प२

शांताः यस्य सः २

प: ४

यमपि नोद्विजते॥ शांतसंसारकलनः कलावानपि निष्कलः॥ यः सचित्तोपि निश्चित्तः स जी०॥ प्राप्तेषु भिन्नमानावमानादिविकल्पाः संसारकलनाः चतुःषष्टिः विद्याः कलाः तत्सद्भावेपि तदभिमानव्यवहारयोरभावान्निष्कलत्वं चित्तस्य स्वरूपेण सद्भावेपि वृत्त्यनुदयान्निश्चित्तत्वं स. चिंतेति यागेवासनावशादात्मध्यानवृत्तिसद्भावेपि लौकिकवृत्त्यभावान्निश्चिंतत्वं॥ यः समस्तार्थजातेषु व्यवहार्यपि शीतलः परार्थेष्विव पूर्णात्मा स जी०॥ परगृहे विवाहोत्सवादौ स्वयं गत्वा तत्रोत्सवे तदीयकार्येषु व्यवहरन्नपि लाभालाभयोर्हर्षविषादरूपं बुद्धिसंतापं न प्राप्नोति यथा एवमयं मुक्तः स्वकार्येष्वपि शीतलः न केवलं संतापाभावाच्छीतलत्वं किंतु पूर्णस्वरूपानुसंधानादपि॥ जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते॥ विशत्यदेहमुक्तत्वं पवनोस्पंदतामिव॥

इति जीवन्मुक्तिलक्षणं॥ अथ विदेहमुक्तिलक्षणं २

जीव० २५

यथा वायुः कदाचिच्चलत्वं त्यक्त्वा निश्चलरूपेणावतिष्ठते तथा मुक्तात्मापि तदुपाधि
हते संसारं त्यक्त्वा स्वरूपेणावतिष्ठते॥ विदेहमुक्तौ नोदेति नास्तमेति न शाम्यति॥ न
सन्नासन्न दूरस्थो न चाहं न च नेतरः॥ न उदयास्तमयौ हर्षविषादौ न शाम्यति न च
तत्परिणामी लिंगदेहस्यात्यैव लीनत्वात् सदसद्भ्यो जगद्धेतुरविद्यामायोपाधिर्न प्रा
ज्ञेश्वरः॥ असदसद्भ्यो नापि भूतभौतिकः॥ न दूरस्थोऽत्युत्थानमायातीतः न चेत्युक्त्वा
स्थूलतनुकं समीपस्थो निषिध्यते॥ अहं न चेति न समष्टिश्च न चेतर इति व्यष्टिश्च व्य
वहारयोग्यो विकल्पो कोऽपि नास्तीत्यर्थः॥ ततस्तिमितगंभीरं न तेजो न तमस्ततं॥ अ
नाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते॥ एवंविधया विदेहमुक्त्या सह ज्ञात्वोक्ते
जीवन्मुक्तावपि यावन्निर्विकल्पकत्वातिशयस्तावत्तावदुत्तमत्वं द्रष्टव्यं॥ भगव

पि० ८ न ८ २५

ही तासु ... द्धितीयाध्याये स्थितप्रज्ञः पश्यते। अर्जुन उ०। स्थितप्रज्ञस्य का भाषा समाधि
स्थस्य केशव। स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं। प्रज्ञातत्त्वज्ञानं तत्तद्द्विविधं
स्थितमस्थितं चेति। यथा जारेनुरक्ता या नार्याः सर्वेष्वपि व्यवहारेषु बुद्धिर्जारमेवध्या
गृह॰ यति प्रमाणप्रतीतान्यपि क्रियमाणानि कर्माणि सद्य एव विस्मर्यन्ते तथापरवैराग्योपे
तस्य योगाभ्यासपाटवेनात्यंतवशीकृतचित्तस्य उत्पन्नेन तत्त्वज्ञानेन तद्बुद्धिर्जारमिव
निरंतर्यं न तत्त्वं ध्यायति तदिदं स्थितं ज्ञानं। उक्तगुणरहितस्य केनापि पुण्यविशेषेण
पि२ कदाचिदुत्पन्नेन तत्त्वज्ञानेन गृहकर्मवत्तन्नैव तत्त्वं विस्मर्यते तदिदमस्थितं ज्ञानं एत
देवाभिप्रेत्य वसिष्ठः आह। परव्यसनिनी नारी व्यग्रापि गृहकर्मणि। तदेवास्वादयत्यं
तः परसंगरसायनं। एवं तत्त्वे परे शुद्धे धीरो विश्रांतिमागतः। तदेवास्वादयत्यंतर्बहि

गी०व०
१६

र्थंवहरन्नपिदृश्यते। तत्रचस्थितप्रज्ञःकालभेदात्द्विविधः समाहितोव्युत्थितश्चेतितयोरु
भयोर्लक्षणंपूर्वोत्तराभ्यामर्द्धाभ्यांपृच्छति। समाधिस्थस्यस्थितप्रज्ञस्यकाभाषाकी
दृशोलक्षणवाचकैःशब्दैरयंभाष्यते। व्युत्थितस्थितप्रज्ञःकीदृग्वाग्व्यवहारंकरोति
तस्योपवेशनगमनेमंदेभ्योविलक्षणेकीदृशे। श्रीभगवानुवाच। प्रजहातियदाकामा
न्सर्वान्पार्थमनोगतान्। आत्मन्येवात्मनातुष्टः स्थितप्रज्ञस्तदोच्यते। कामास्त्रिवि
धाः बाह्याः आंतराः वासनामात्ररूपाश्चेति। उपार्जितमोदकादयोबाह्याः आगामोदका
दयः आंतराः पथिगततृणादिवदापाततः प्रतीताः वासनामात्ररूपाश्चेति। समाहितोऽ
शेषधीवृत्तिसंक्षयात्सर्वान्परित्यजति। उपस्तिचास्यसुखप्रसादलिंगगम्यः संतोषः
सचनकामेषुकिंत्वात्मन्येवकामानांसक्तत्वात्। बुद्धेःपरमानंदरूपेणात्मतत्त्वाभिमु

१६

खल्वात्मनैवात्मसंप्रज्ञातसमाधाविवात्मानंदो मनोवृत्त्योल्लिख्यते किंतु स्वप्रकाशचि
द्रूपेणात्मना संतोषश्च न वृत्तिरूपः किंतु तत्संस्काररूपः एवंविधैर्लक्षणैर्वा चिह्नैः स
माहितो भाष्यते ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥ वीतरागभयक्रोधः स्थि
तधीर्मुनिरुच्यते ॥ दुःखं रोगादिनिमित्तजन्मा रजोगुणविकाररूपा संतापात्मिका प्रति
कूलाचित्तवृत्तिः तादृशे दुःखे प्राप्ते सति अहं पापो धिक् मां दुरात्मानमित्यनुतापात्मि
का तमोगुणविकारत्वेन भ्रांतिरूपा चित्तवृत्तिरुद्वेगः ॥ यद्यप्ययं विवेक इव भाति तथा
पि पूर्वस्मिन्जन्मनि चेत्तत्पापप्रवृत्तिबंधकत्वात्सप्रयोजनो भवति इदानीं तु निःप्र
योजन इति भ्रांतित्वं द्रष्टव्यं ॥ सुखं राज्यपुत्रलाभादिनिमित्तजन्या सात्त्विकी प्रीतिरू
पानुकूला चित्तवृत्तिः तस्मिन्सुखे सत्यागामिनस्तादृशस्य सुखस्य कारणं पुण्यमन

प्रति ३

जीव०
१७

तृष्णायद्रथे व तदपेक्षा तामसी वृत्तिः स्पृहा। तत्र च सुखदुःखयोः प्रारब्धकर्मप्रापितत्वा
त्सु स्थितचित्तस्य वृत्तिसंभवाद्वितद्भयमुपपद्यते उद्वेगस्य हेतु न विवेकिनः संभव
तः। तथा रागभयक्रोधाश्च ते भिसत्वेन कर्मप्रापितत्वाभावान्नास्य विद्यंते। एवंलक्षणः णा २
लक्षितः स्थितधीः स्वानुभवप्रकटनेन शिष्यशिक्षार्थमनुद्वेगनिःस्पृहत्वादिकं वाचो भाषेते गम
इत्यर्थः। यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं। नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रति
ष्ठिता। यस्मिन्सर्वत्र स्वदीये हानिवृद्धी स्वस्मिन्नारोप्यते तादृशोन्यविषयस्तामसवृत्ति
प:३ विशेषः स्नेहः सुखहेतुः स्वकलत्रादिशुभवस्तुगुणकथनादिप्रवृत्तिकाधीवृत्तिरभि
नंदः॥ अत्र गुणकथनस्य परप्ररोचनार्थत्वाभावेन व्यर्थत्वात्तद्धेतुरभिनंदस्तामसः अप १७
स्थ्योत्पादनेन दुःखहेतुः परकीयविद्यादिरेनं प्रत्यशुभो विषयस्तन्निंदाप्रवृत्तिकाधी

च निर्दोषः सोपि तामसस्तन्निद्रानिवारणार्थत्वाभावेन व्यर्थत्वात्तेन तेन तामसा धर्माः कृ
र्थं विवेकिनि संभवेयुः॥ यदा संहरते चायं कूर्मोंगानीव सर्वशः॥ इंद्रियाणींद्रियार्थेभ्य
स्तस्य प्रज्ञा प्रतिष्ठिता॥ व्युत्थितस्य समस्ततामसवृत्त्यभावः एवं श्लोकाभ्याम भिहि
तः समाहितस्य तु वृत्तय एव न संति कुतस्तामसत्वशंकेत्यभिप्रायः॥ विषया विनिव
र्तंते निराहारस्य देहिनः॥ रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते॥ प्रारब्धं कर्म सुखदुःख
हेतून्कांश्चिद्विषयांश्चंद्रोदयांधकारादिरूपान्स्वयमेव संपादयति अन्यांश्च गृह
क्षेत्रादीन्पुरुषो योगद्वारेण तत्र चंद्रोदयादयस्तु समाधिनैव निवर्त्तंते। आहर
णमाहार उद्योगः स्य गृहादिविषया निवर्त्तंते रसस्तु न निवर्त्तते रसो मानसी तृष्णा सा
पि परमानंदरूपस्य ब्रह्मणो दर्शने सति स्वस्यानंदहेतुभ्यो निवर्त्तते॥ किं प्रज्ञयाकरि

निरुद्योग २ पूर्वेंद्रियादिसंहारलक्षणेन २
णें नान्यथा॥ गृहादयस्तु समाधिमंतरेणापि निवर्तंते॥

गीव०
१९

ष्यामीयेषांनोयमात्मायंलोकइतिश्रुतेः॥यततोह्यपिकौंतेयपुरुषस्यविपश्चितः।
इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः॥तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः।
वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता॥उद्योगत्यागब्रह्मदर्शनप्रयत्नंकुर्वतोपि
कादाचित्कप्रमादपरिहारायसमाध्यभ्यासःतदेतत्किमासीतेतिप्रश्नस्योत्तरं॥ध्या
यतोविषयान्पुंसःसंगस्तेषूपजायते।संगात्संजायतेकामःकामात्क्रोधोभिजायते॥
क्रोधाद्भवतिसंमोहःसंमोहात्स्मृतिविभ्रमः।स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्र
णश्यति॥असतिसमाध्यभ्यासेप्रमादप्रकारमुपन्यस्तः।संगोध्येयविषयसंनि
धिःसंमोहोविवेकपराङ्मुखत्वंस्मृतिविभ्रमस्तत्वानुसंधानाभावः॥रागद्वेषवि
युक्तैस्तुविषयानिंद्रियैश्चरन्।आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति॥विधेया
बुद्धिनाशोविपरीतभावनोपचितदोषेणप्रतिबद्धस्यज्ञानस्यमोक्षप्रदत्वसामर्थ्याभावः

१९

त्मत्वं वशीकृतमनस्त्वं प्रसादो नैर्मल्यं बंधराहित्यं समाध्यभ्यासयुक्तस्तद्वासनाव
त्ताच्युत्थानदशायामिंद्रियैर्व्यवहरन्नपि प्रसादं सम्यक्प्राप्नोतीति तदेतत्किं व्रजेतेति प्रश्न
स्योत्तरां तु परितते नापि बहुना ग्रंथेन स्थितप्रज्ञः प्रपंचितः। ननु प्रज्ञायाः स्थित्युत्पत्ति
भ्यां प्रागपि साधनत्वेन रागद्वेषादिराहित्यमपेक्षितं। बाढं। तथाप्यस्ति विशे
पे षः स च श्रेयोमार्गकारैर्दर्शितः। विद्यास्थितये साधनभूताः प्रयत्ननिष्पा पाकृ ७
द्याः लक्षणभूतास्तु पुनः स्वभावतस्ते स्थितप्रज्ञे जीवन्मुक्तिमिति। मामव
स्थांवदति स्थितात्मसंबोधां बाधितभेदप्रतिभामबाधितात्मावबोधसा
मर्थ्यादिति॥ भगवद्भक्तो द्वादशाध्याये भगवतावर्णितः। अद्वेष्टा सर्वभूतानां
मैत्रः करुण एव च। निर्ममो निरहंकारः समदुःखसुखः क्षमी॥ संतुष्टः सततं

स्थिता ४

जीव० १९ न

योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः। ईश्वरार्पित
मनस्त्वेन समाहितस्यात्म्यानुसंधानाभावात् व्युत्थितस्य सत्स्वप्युदासीनानुसंधा
नैर्हर्षविषादाभावाच्च सुखदुःखसाम्यं एवं वक्ष्यमाणेपि द्रष्टव्यं॥ यस्मान्नो
द्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥ अ
नपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः। सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः।
यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति। शुभाशुभपरित्यागी भक्तिमान्यः स मे
प्रियः॥ समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः सं
गविवर्जितः। तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित्। अनिकेतः स्थिरमति
र्भक्तिमान्मे प्रियो नर इति। अत्रापि पूर्ववद्विशेषो वार्तिककारैर्दर्शितः। उत्पन्नात्म

पु२

१९

प्रबोधस्यहेतुत्वादयोगुणाः॥अयत्नतोभवंस्यस्यनतुसाधनरूपिणाः॥गुणा
तीतस्यतुदंशाध्यायेवर्णितः॥अर्जुनउवाच॥कैर्लिंगैस्त्रीनुगुणानेतानतीतोभव
तिप्रभोकिमाचारःकथंचैतांस्त्रीनुगुणानतिवर्त्तते॥त्रयोगुणाःसत्वरजस्तमांसि
तेषांपरिणामविशेषात्सर्वसंसारःप्रवर्त्ततेतेतोगुणातीतत्वंअसंसारित्वंजीव
न्मुक्तत्वमितियावत॥लिंगानिपरेषामेतदीयगुणातीतत्वबोधकानि॥आचारस्त
दीयमनःसंचारप्रकारःकथमितिसाधनप्रश्नः॥श्रीभगवानुवाच॥प्रकाशंचप्रवृ
त्तिंचमोहमेवचपांडव॥नद्वेष्टिसंप्रवृत्तानिननिवृत्तानिकांक्षति॥उदासीनवदा
सीनोगुणैर्योनविचाल्यते॥गुणावर्त्ततइत्येवयोवतिष्ठतिनेंगते॥मानापमानयो
स्तुल्यस्तुल्योमित्रारिपक्षयोः॥सर्वारंभपरित्यागीगुणातीतःसउच्यते॥मांचयो

समदुःखसुखःस्वस्थःसमलोष्टाश्मकांचनः॥तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः

जीव०
२०

व्यभिचारेणभक्तियोगेनसेवते॥सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते॥प्रका
शप्रवृत्तिमोहाःसत्त्वरजस्तमोगुणाः।तेचजाग्रत्स्वप्नयोःप्रवर्त्तंते।तेसुषुप्तिसमा
धिशून्यवृत्तित्वावस्थासुनिवर्त्तंते।प्रवृत्तिश्चद्विविधाऽनुकूलाप्रतिकूलाचे
ति।तत्रमूढोजागरणेप्रतिकूलप्रवृत्तिंद्वेष्टिऽनुकूलप्रवृत्तिंकांक्षति।गुणातीत
स्तुऽनुकूलप्रतिकूलाध्यासाभावात्तद्वेषाकांक्षेनस्तः।यथाद्वयोःकलहंकुर्व
तोरवलोकयिताकश्चित्तटस्थःस्वयंकेवलमुदास्तेनतुजयपराजयाभ्यामि
तस्ततश्चाल्यते।तथागुणातीतोविवेकीस्वयमुदास्ते।गुणागुणेषुवर्त्तंतेनत्व
हमितिविवेकादौदासीन्यंऽहमेवकरोमीत्यध्यासोविचलनंनचास्यतदस्ति। २०
तदिदंकिमाचारइतिप्रश्नस्योत्तरं।समदुःखसुखादीनिलिंगानि।ऽव्यभिचारिभ

प्रश्नस्योत्तरं

इति

क्तिसहितज्ञानध्यानाभ्यासेन परमात्मसेवां गुणस्य यस्साधनं ॥ ब्राह्मणो व्यासादि
भिर्वर्णितः ॥ अनुत्तरीयवसनमनुपस्तीर्यशायिनं । बाहूपधानं येयं तं तं देवा ब्राह्म
णं विदुः ॥ ब्राह्मणत्वाश्रो ब्रह्मविद्याचिन्हस्य ब्राह्मण इति स्मृति विनिर्णीतः ॥ ब्रह्मवि
दस्त्वविद्वत्संन्यासाधिकारात् ॥ यथाजातरूपधरो नाच्छादनं चरति परमहंस इत्या
दिना परिग्रहराहित्यस्य मुख्यत्वाभिधानात् ॥ अनुत्तरीयादिकं तस्य युक्तं ॥ येन के
नचिदाच्छन्नो येन केनचिदाशितः । यत्र क्वचन शायी स्यात्तं देवा ॥ देहनिर्वाहाय या
त्रानाच्छादनस्थानापेक्षायामपि स्वच्छन्दागतेषु गुणदोषो नान्विष्येते उदरपूरणा
पुष्ट्यादिरूपस्य निर्वाहस्य समत्वात् निःप्रयोजनस्य गुणदोषविचारस्य चित्तदोष
त्वात् ॥ अत एवं पठ्यते ॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः । गुणदोषदृष्टिर्दोषो

श्रु — त्या — शायनं

भागवते

जीव०
२१

गुणसत्त्वमयवर्जितः॥ कंथाकौपीनवासास्तु दंडधृग्ध्यानतत्परः॥ एकाकी रमते नित्यं तं
देवाः॥ ब्रह्मोपदेशादिना प्राप्यानुजिघृक्षायां तत्त्वमस्यादिज्ञापनेन श्रद्धामुत्पादयितुं दंड
कौपीनादि लिंगं धारयेत्॥ कौपीनं दंडमाच्छादनं च स्वशरीरोपभोगार्थाय लोकस्योप
काराय च परिग्रहेदिति स्मृतेः॥ अनुजिघृक्षयापि तदीयाग्रहकृत्स्यादिवा नो न कुर्या
त्किंतु ध्यानपरो भवेत्॥ तमेवैकं [illegible] जानथ आत्मानमन्या वाचो विमुंचथेति श्रुतेः॥
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्ला
पनं हि तदिति श्रुतेः॥ ब्रह्मोपदेशास्तु न्यावाकं न भवतीति न ध्यानविरोधी तत्त्वध्या
नमेकाकित्वेन निर्विघ्नं संभवति॥ अत एव स्मृत्यंतरेऽप्यभिहितं॥ एको भिक्षुर्यथो
क्तः स्याद्द्वावेव मिथुनं स्मृतं॥ त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते॥ नगरं न हि कर्त्त

धर्मि — स्वयं

२१

व्यग्रामो वा मिथुनं तथा ॥ राजादिवा त्वौ तेर्ष्यस्या भिक्षावा त्वौ परस्परमिति ॥ निराशी-
षमनारंभं नित्यं नमस्कारमस्तु ते ॥ अक्षीणं क्षीणकर्माणं तं देवा० ॥ विशिष्टैः संसारिभिः
प्रणमतां पुरुषाणामाशीर्वादः न प्रयुज्यते यस्य यदपेक्षितं तं प्रति तदभिवृद्धिप्रा-
र्थनमाशीः तथा च पुरुषाणां भिन्नरुचित्वात्तत्तदभिमतान्वेषणो व्यग्रचित्तस्य
लोकवासनावर्द्धते सा च ज्ञानविरोधिनी ॥ तथास्मत्संतरे च ॥ लोकवासनया जंतोः
शास्त्रवासनयापि च । देहवासनया ज्ञानं यथावन्नैव जायते ॥ एतच्चारंभनमस्का-
रादिषु द्रष्टव्यं ॥ आरंभः स्वार्थं परोपकारार्थं वा गृहक्षेत्रसंपादनप्रयत्नः तावेता-
वाशीर्वादारंभौ युक्तेन साध्यो न चाशीर्वादाभावे प्रणमतां न्यूनं खेदः शंकनीयः
लोकवासनाखेदयोरुभयोः परिहाराय निखिलाशीर्वादप्रतिनिधित्वेन नाराय

जीव०
२२

णक्षाण्ष्वयोगात्त।ऽऽरंभस्तु सर्वोपि दुष्ट एव।तथा च स्मृतिः।सर्वारंभाहि दोषेण
धूमेनाग्निरिवावृताऽइति।नमस्कारोपि विविदिषासंन्यासिनोभिहितः।योमवेस्
र्वै संन्यासी तुल्यश्चेद्धर्मतो यदि।न तस्मै प्रणमः कर्तव्यो नेतराय कदाचनेति।तत्र
सर्वे स्वे धर्मतस्तुल्यत्वविचारे चित्तं विक्षिप्यते।अत एव नमस्कारमात्रे बहवः क
लहायमाना उपलभ्यंते तन्निमित्तं वार्तिककारैर्दर्शितं।प्रमादिनो बहिश्चित्ताः
पिशुनाः कलहोत्सुकाः।संन्यासिनोपि दृश्यंते दैवसंदूषिताशयाः।मुक्तस्य नम
स्काराभावो भगवत्पादैर्दर्शितः।नामादिभ्यः परे भूम्नि स्वाराज्ये चेत्स्थितोद्वयः।प्रण
मेत्कं तदात्मज्ञो न कार्यं कर्मणा तदेति।चित्तकालुष्यहेतोर्नमस्कारस्य प्रतिषे
धे सर्वसाम्यबुद्धिप्रसादहेतुर्नमस्कारोभ्युपेयते।तथा च स्मृतिः।ईश्वरो जीवक

२२

लयाच विष्णो भगवानिति। प्रणमेहं त्वद्भावाप्ययांऽलगोचरमिति। स्तुतिर्मनु
ष्यविषयापतिषिध्यते न त्वीश्वरविषया। तथा च स्मृतिः॥ पादरेणयथास्तोतिधन
वंतं घेमेछया। तथा चेद्विश्वकर्तारं को मुच्येत बंधनात्॥ प्रक्षीणत्वमदीनत्वांञत
एव स्मृतिः॥ अस्त ज्ञानविषादेन कालेकालेऽज्ञानं क चितात्लब्धानुहृष्येद् इतिमा
नुमयं देव तं चितमिति। क्षीणकर्मत्वं विधिनिषेधातीतत्वं निस्त्रैगुण्यपथि विचर
तां को विधिको निषेध इति स्मरणात्। एतदेवाभिप्रेत्य भगवता प्रोक्तं त्रैगुण्यवि
षया वेदा निस्त्रैगुण्यो भवार्जुन। निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवानि
ति। नारदोपि। स्मर्त्तव्यः सततं विष्णुर्विस्मर्त्तव्यो न जातु चित्। सर्वे विधिनिषेधाः
स्युरेतयोरेव किंकरा इति॥ योऽहे शिवगणाद्भीतः सन्मानान्नरकादिवकुणपादिव

जीव०
२३

यः स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः। राजा दिवाकीर्तिनेषां स्यादित्युक्तत्वात्सर्पवद्रूणाङ्गी
निरूपपद्यते। सन्मानस्यासक्तिकारणतया पुरुषार्थविध्वंसकत्वान्नरकवद्धेय
त्वं। उक्तं एव स्मृतिः। अपूसन्मानात्तपोवृद्धिः सन्मानात्तु तपःक्षयः। अर्चितः पूजि
तो विप्रो दुग्धा गौरिव गच्छति। एतदेवाभिप्रेत्यावमानः पादेयत्वात्स्मर्य्यते। न
था चरेद्वै योगी सतां धर्ममनुस्मरन्। जना यथावमन्येरन् गच्छेयुर्नैव संगतामि
ति। स्त्रीशुद्धिविधौ दोषः प्रतिषिद्धत्वं जुगुप्सितत्वं चेति। तत्र प्रतिषिद्धत्वमात्रं
कदाचिद्रागवशाद् दुष्टं स्यात्तेन तदेतदभिप्रेत्याह स्मृतिः। मात्रा स्वस्रा दुहित्रा वा न
विविक्तासनो भवेत्। बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति। तथा स्मृतिभिः जु
गुप्सावर्णिता। स्त्री णाम वाच्यदेशस्य क्लिन्ननाडीव्रणस्य च। अभेदेपि मनोभेदा-

सीदति
न

२३

ज्ञनः प्रायेणवंचाप्ते।च्चमर्मखंडं द्विधा भिन्नमपानोज्ञारद्धूपितं॥ येरमंति नमस्तेभ्यः
साहसं किं मतः परमिति। अतः प्रतिषेधजुगुप्सयोः सभयोर्विवक्षयाक्रुणपद्रष्टणेत्तो
क्तामिहितः॥ येन पूर्णमिवाकाशं भवत्येकेन सर्वदा। शून्यं यस्य जनाकीर्णं तं देवा०॥
संसारिणामेकाकित्वेनावस्थानं भयात्तस्यादिहेतुत्वाद्वर्ज्यं जनसंमर्दस्त्वतथावि
धत्वादभ्युपेयः योगिनस्तद्विपरीतत्वं एकाकित्वे सत्य विघ्नेन ध्यानानुवृत्तोपरिपू
र्णेन परमानंदात्मना सर्वमाकाशं पूर्णमिव भासते। अतो भयात्तस्य शोकमोहादयो
न भवंति। तत्र को मोहः कः शोक एकत्वमनुपश्यत इति श्रुतेः। जनाकीर्णस्थानं राजवा
र्तादिना ध्यानविरोधित्वादानंदात्मा प्रतीतिरहितं तच्छून्यमिव चित्तं लक्षयति जग
तो मिथ्यात्वादात्मनः पूर्णत्वाच्चेत्यर्थः॥ अतिवर्णाश्रमी सूतसंहितायां मुक्तिखंडे यं

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ३

जीव० २४ २५

चमाध्यायैं परमेश्वरेण वर्णितः॥ ब्रह्मचारी गृहस्थश्च वानप्र स्थोथ भिक्षुकः॥ अति
वर्णाश्रमी तेपि क्रमाद्वृक्षावि चक्षणाः॥ अतिवर्णाश्रमी प्रोक्तो गुरुः सर्वाधिकारिणां॥ नक
स्यापि भवेच्छिष्यो यथाहं पुरुषोत्तम॥ अतिवर्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते॥ त
त्समो नाधिकश्चास्मिंल्लोके स्त्येव न संशयः॥ यः शरीरेंद्रियादिभ्यो विभिन्नं सर्वसा
क्षिणां पारमार्थिक विज्ञानं सुखात्मानं स्वयंप्रभुं परं तत्वं विजानाति सोतिवर्णा
श्रमी भवेत्॥ यो वेदांत महावाक्यश्रवणेनैव केवलं॥ आत्मानमीश्वरं वेद सोति०॥ यो
वस्थात्रयनिर्मुक्तमवस्थासाक्षिणं सदा॥ महादेवं विजानाति सोति०॥ वर्णाश्रमाद
यो देहे मायया परिकल्पिताः॥ नात्मनो बोधरूपस्य मम ते संति सर्वदा॥ इति यो वेद
वेदांतैः सोति०॥ आदित्य संनिधौ लोकश्चेष्टते स्वयमेव तु॥ तथा मत्संनिधानेन समस्तं

वल्ले ४ त्रय २

२४ २५

चेष्टते जगत्॥ इति यो वेदवेदांतैः सोऽति०॥ सुवर्णाद्धारकेयूरकटकस्वस्तिकादयः॥ क
ल्पिताः मायया तद्वज्जगन्मय्येव सर्वदा॥ इति यो वेदवेदांतैः सोऽति०॥ शुक्तिकायां य
थारूप्यं कल्पितं मायया तथा॥ महदादि जगन्मायामयं मय्येव कल्पितं॥ इति यो वेद
वेदांतैः सोऽति०॥ चंडाले तद्देहे पश्वादिशरीरके ब्रह्मविग्रहे॥ अन्येषु तारतम्येन स्थितेषु
पुरुषोत्तमाः॥ व्योमवत्सर्वदा व्याप्तः सर्वसंबंधवर्जितः॥ एकरूपो महादेवः स्थितः सो
ऽहं परामृतः॥ इति यो वेदवेदांतैः सोऽति०॥ विनष्टदिग्भ्रमस्यापि यथापूर्वं विभाति दि
क्॥ तथा विज्ञानविध्वस्तं जगन्मे भाति तन्न हि॥ इति यो०॥ यथा स्वप्नप्रपंचोऽयं मयि
मायाविजृंभितः॥ तथा जाग्रत्प्रपंचोऽपि मयि मायाविजृंभितः॥ इति यो०॥ यस्य वर्णा
श्रमाचारो गलितः स्वात्मदर्शनात्॥ स वर्णानाश्रमान्सर्वानतीत्य स्वात्मनि स्थितः॥

गी

जीव०
२५

यस्यस्या स्वाश्रमा...वौँस्त्वात्मन्येवस्थितः पुमान्। सोतिवर्णाश्रमी प्रोक्तः सर्ववेदार्थ
वेदिभिः। न देहो नेंद्रियं प्राणो न मनो बुद्ध्यहंकृती। न चित्तं नैव सा माया नच व्योमादि
कं जगत्। न कर्त्ता न च भोक्ता च न च भोजयिता तथा। केवलं चित्सदानंदं ब्रह्मैवात्मा
यथार्थतः। जलस्य चलनादेव चंचलत्वं यथा रवेः। तथाहंकारसंसर्गादेव संसार-
ऽऽत्मनः। तस्मादन्यगता वर्णाश्रमाऽपि केशवा। आत्मन्यारोपिता एव भ्रांत्या ते
ऽनात्मवेदिनां। न विधिर्न निषेधश्च न वर्ज्यावर्ज्यकल्पना। आत्मविज्ञानिनां नास्ति त
थान्यज्जनार्द्दन। आत्मविज्ञानिनां निष्ठामीदृशीं मंबुजेक्षण। मायया मोहितामस्मी
नैव जानंति सर्वदा। न मांसचक्षुषा निष्ठा ब्रह्मविज्ञानिनामियं। दृष्टुं शक्या स्वतः सि
द्धाविदुषां सैव केशव। यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र संयमी। प्रबुद्धा यत्र ते विद्वा

सुषुप्तसक्तत्वकेत्र्याबा। एवमात्मानमहं हं निराकारं निरंजनं। नित्यशुद्धं निराभासं सच्चि
न्मात्रं परामृतं। यो विजानाति वेदांतैः स्वानुभूत्या च निश्चितं। सोतिवर्णाश्रमी प्रोक्तः स
रु २ एव गुरुरुत्तम इति। तदेवं विमुक्तश्च विमुच्यत इत्यादिश्रुतयो जीवन्मुक्तस्थितप्रज्ञभ
गवद्भक्तगुणातीतब्राह्मणातिवर्णाश्रमीप्रतिपादकस्मृतिवाक्यानि च जीवन्मुक्ति
सद्भावे प्रमाणानीति स्थितं। इति जीवन्मुक्तिप्रमाणप्रकरणं॥ अथ जीवन्मुक्तिसाध
नं निरूपयामः। तत्त्वज्ञानमनोनाशवासनाक्षयस्तत्साधनं। अत एव वासिष्ठरामाय
स्प २ णावसाने जीवन्मुक्तशरीराणामेतस्मिन्नवस्थावेवसिष्ठ आह। वासनाक्षयविज्ञा
नमनोनाशो महामते। समकालं चिराभ्यस्ता भवंति फलदायिन इति। अन्वयमु
खेनाव्यतिरेकमाह। त्रय एते समं यावन्नस्वभ्यस्ता मुहुर्मुहुः। तावन्न पदसंप्राप्तिर्भ

जीव०
२६

विप्सलिसमासानेरिति। समकालाभ्यासाभावे बाधकमाह। एकैकशो निषेव्यंते यद्ये
ते चिरयत्नतः। तन्न सिद्धिं प्रयच्छंति मंत्राः संकलिता इवेति। यथा संध्यावंदनमार्ज्ज
नेन सह नियुक्तानामापो हिष्ठेत्यादिनां तिसृणामृचां मध्ये प्रतिदिनमेकैकस्या ऋचः
पाठेनाखिलीयानुष्ठानं न सिध्यति। यथा वा षडंगमंत्राणां एकैकमंत्रेण न सिद्धिः। यथा
च लोके न्नाकसूपोदनादीनामेकैकेन न भोजनसिद्धिस्तद्वत्। चिराभ्यासस्य प्रयोज
नमाह। चिमिरेमिश्चिराभ्यस्तैर्हृदयग्रंथयो दृढाः। निःशंकमेव त्रुट्यंति विसच्छेदं गु
णा इवेति। नस्यैव व्यतिरेकमाह। जन्मांतरशताभ्यस्ता राम संसारसंस्थितिः। सा चि
राभ्यासयोगेन विना न क्षीयते क्वचिदिति। न केवलमेकैकाभ्यासे फलाभावः किंतु त
त्स्वरूपमपि न सिध्यतीत्याह। तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च। मिथः कारण

दृ

२६

न

तांगत्वा दुःसाध्यानि स्थितानि हीति। त्रयाणामेतेषां मध्ये द्वयोर्द्वयोर्मेलने त्रीणि द्वंद्वा
नि भवंति। तत्र मनोनाशवासनाक्षयद्वंद्वस्यान्योन्यकारणत्वं व्यतिरेकमुखेनाह।
यावद्विलीनं न मनो न तावद्वासनाक्षयः। न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति।
प्रदीपज्वालासंतानवद्वृत्तिसंतानरूपेण परिणममाणमंतःकरणद्रव्यं मननात्मकत्वा
परिणामं न्मन इत्युच्यते। तस्य नाशो नाम वृत्तिरूपं परित्यज्य निरुद्धत्वाकारेण परिणामः। तथा च
पतंजलिर्योगशास्त्रे सूत्रयामास॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरो
उ धक्षणचित्तान्वयो निरोधपरिणाम इति॥ व्युत्थानसंस्काराः प्रभिभूयंते निरोधसंस्का
राः प्रादुर्भवंति निरोधयुक्तःक्षणश्चित्तेनान्वीयते सोयं मनोनाश इत्यवगंतव्यं॥ पूर्वा
परपरामर्शमंतरेण सहसोत्पद्यमानस्य क्रोधादिवृत्तिविशेषस्य हेतुश्चित्तगतसंस्का

दोत्यादि

जीव०
२७

रो वासनापूर्वापूर्वाभ्यासेन चित्ते वास्यमानत्वात्। तस्याश्च वासनायाः क्षयो नाम विवेक
जन्यायां शांतिवासनायां दृढायां सत्यपि बाह्यनिमित्ते क्रोधाद्यनुत्पत्तिः॥ तत्र मनोनाशा
भावे वृत्तिषूत्पद्यमानासु कदाचिद्बाह्यनिमित्तेन क्रोधाद्युत्पत्तेर्नास्ति वासनाक्षयः। प्र
क्षीणायां तु वासनायां तथैव वृत्त्युत्पादनान्नास्ति मनोनाशः॥ तत्त्वज्ञानमनोनाशयोः प
रस्परकारणत्वं व्यतिरेकमुखेनाह॥ यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः। यावन्न
चित्तोपरमो न तावत्तत्त्ववेदनमिति। इदं सर्वमात्मैव प्रतीयमानं तु रूपरसादिकं जगन्मा
यामयं नत्वेतद्वस्तुतोस्तीति निश्चयस्तत्त्वज्ञानं तस्यानुत्पत्तौ रूपरसादिविषयाणां स
द्भावे सति तद्गोचराश्चित्तवृत्तयो न निवारयितुं शक्यंते। यथा प्रक्षिप्यमाणेष्विंधनादिषु
वह्निज्वाला न निवार्यते। तद्वदसति [illegible] चित्तोपशमे वृत्तिभिर्गृह्यमाणेषु रूपादिषु नेदंता

२७

नास्तिकिंचनेतिश्रुतेर्यजमानः प्र स्तरइत्यादेरिव प्रत्यक्षविरोधशंकया ब्रह्माद्वितीयमि

स्तल २

सेतादृशोनिश्चयोनोदियात्॥ वासनाक्षयतत्त्वज्ञानयोः परस्परकारणत्वं व्यतिरेकमु
खेनाह॥ यावन्नवासनानाशस्तावत्तत्त्वागमः कुतः। यावन्नतत्त्वसंप्राप्तिर्नतावद्वासनाक्ष
यइति॥ क्रोधादिवासनास्वनष्टासु शमदमादिसाधनाभावान्नतत्त्वज्ञानमुदेति। श्रुता
तेचाद्वितीयब्रह्मतत्त्वे क्रोधादिनिमित्तस्यसत्यत्वभ्रमस्यानपायान्नवासनाक्षीयते॥

स्थाव १

यथोक्तानां त्रयाणां द्वन्द्वानामन्योन्यकारणत्वमन्वयमुखेनवयमुदाहरामः। मनसि
नष्टे सतिसंस्कारोक्रोधकस्य बाह्यनिमित्तस्याप्रतीतौ वासनाक्षीयते क्षीणायां च वा
सनायां हेत्वभावेनक्रोधादिवृत्त्यनुदयान्मनोनश्यतीति तदिदं मनोनाशवासनाक्षयद्वं
द्वं॥ दृश्यतेत्वग्र्यया बुद्ध्येति श्रुतेरात्मैकाग्राभिमुखवृत्तेर्दर्शनहेतुत्वादिनरुद्धतत्त्ववृत्ति

जीव०
२९

नाशस्यतत्त्वज्ञानहेतुत्वमवगम्यते। सति च तत्त्वज्ञाने मिथ्याभूते जगति नरविषाणादावि
वधीवृत्त्यनुदयाद्दाह्यमनस्यादृष्टत्वेन पुनर्दृश्यस्यानुपयोगान्निरिंधनाग्निवन्मनो नश्यति। त
दिदं मनोनाशतत्त्वज्ञानयोर्द्वंद्वं। तत्त्वज्ञानस्य क्रोधादिवासनाक्षयहेतुत्वं वार्त्तिकका
रोप्याह। रिपौ बंधौ स्वदेहे च समैकात्म्यं प्रपश्यतः। विवेकिनः कुतः कोपः स्वदेहावय
वेष्विवेति। क्रोधादिवासनाक्षयरूपस्य शमादेर्ज्ञानहेतुत्वं प्रसिद्धं। वसिष्ठोपि। गुणाः
शमादयो ज्ञानाच्छमादिभ्यस्तथा ज्ञता। परस्परं विवर्धेते ते द्वे पद्मसरसी इवेति। तदिदं
वासनाक्षयतत्त्वज्ञानयोर्द्वंद्वं॥ तत्त्वज्ञानादीनां त्रयाणां संपादने साधनमाह। तस्माद्रा
घव यत्नेन पौरुषेण विवेकिना। भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रयेत्। पौरुषो यत्नः २८
केनाप्युपायेनावश्यं संपादयिष्यामीत्येवंविधोत्साहरूपो निर्बंधः विवेको नाम विभ
दि

ज्यनिश्चयः तत्वज्ञानस्य श्रवणादिकं साधनं मनोनाशस्य योगः। वासनाक्षयस्य प्रति-
कूलवासनोत्पादनमिति। भोगेच्छायाः स्वल्पायाऽप्युपगमे हविषा कृष्णवर्त्मेव भूय
एवाभिवर्द्धत इति न्यायेनातिप्रसंगस्य दुर्वारत्वात् दूरत इत्युक्तं। ननु पूर्वोक्तविविदिषा-
संन्यासस्य तत्वज्ञानं फलं विद्वत्संन्यासस्य जीवन्मुक्तिरिति व्यवस्था वर्णिता। तथा च स
(पश्चात्) ति प्रथमतः तत्वज्ञानं संपाद्य विद्वत्संन्यासं कृत्वा जीवतः स्वस्य बंधरूपयोर्वासनाम-
नोवृत्त्योर्विनाशः संपादनीय इति भाति। अत्र तु तत्वज्ञानादीनां सहैवाभ्यासो नियम्यते
ऽतः पूर्वोत्तरविरोध इति चेन्नायं दोषः प्रधानोपसर्जनभावेन व्यवस्थोपपत्तेः। वि-
विदिषासंन्यासिनः तत्वज्ञानं प्रधानं मनोनाशवासनाक्षयावुपसर्जनभूतौ विद्वत्सं-
न्यासिनस्तद्विपरीतं। अतः सहाभ्यास उभयत्राप्यविरुद्धः। न च तत्वज्ञानोत्पत्तिमात्रेण

जीव०
२९

कृतार्थस्य किमुत्तरकालीनेनाभ्यासप्रयासेनेति शंकनीयं। जीवन्मुक्तिप्रयोजननिरू
पणेन परिहरिष्यमाणत्वात्। ननु विद्वत्संन्यासिनो वेदनसाधनश्रवणाद्यनुष्ठानवै
फल्यात् तद्वेदनस्य च स्वरूपेणाकर्तुमकर्तुमन्यथाकर्तुमशक्यस्याननुष्ठेयत्वा
दुपसर्जनत्वेनापि उत्तरकालीनोऽभ्यासः कीदृश इति चेत् तैकेनापि द्वारेण पुनःपु
नस्तत्त्वानुस्मरणमिति ब्रूमः। तादृशश्चाभ्यासो लीलोपाख्याने दर्शितः। तच्चिंतनं तत्क
थनमन्योन्यं तत्प्रबोधनं। एतदेकपरत्वं च ज्ञानाभ्यासं विदुर्बुधाः। सर्गादावेव नोत्पन्नं
दृश्यं नास्त्येव तत्सदा। इदं जगदहं चेति बोधाभ्यासं विदुः परमिति॥ ननु मनोनाशवा
सनाक्षययाभ्यासावपि तत्रैव दर्शितौ। अत्यंताभावसंपत्तौ ज्ञातुर्ज्ञेयस्य वस्तुनः। युक्त्या
शास्त्रैर्यतंते ये ते प्यत्राभ्यासिनः स्थिता इति। ज्ञातृज्ञेययोर्मिथ्यात्वधीरभावसंपत्तिः

२९

स्वरूपेणाप्यप्रतीतिरत्यंताभावसंपत्तिः॥युक्तिर्योगः सोयंमनोनाशाभ्यासः॥दृश्या
संभवबोधेनरागद्वेषादितानवेः॥रतिर्घनोदिता यासौ ब्रह्माभ्यासः स उच्यते॥सोयं
वासनाक्षयाभ्यासः॥तेषुतेषुत्रिष्वभ्यासेषु सामान्येन प्रतीयमानेषु प्रधानोपसर्जनभा स
कथं॰ वेन न विवेक्तुं शक्यते इति चेत्तमेवं प्रयोजनानुसारेण विवेक्तुं शक्यत्वात्॥मुमुक्षोः
पुरुषस्य जीवन्मुक्तिर्विदेहमुक्तिश्चेति प्रयोजनद्वयं॥एतत एव विमुक्तश्च विमुच्य
ते इति श्रूयते॥तत्र जीवतः पुरुषस्य दैवसंपदा मोक्षः॥आसुरसंपदा बंधः॥तत्र षो
डशाध्याये भगवताभिहितं॥दैवी संपद्विमोक्षाय निबंधायासुरी मतेति॥ते च संप
दौ तत्रैवाभिहिते॥अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः॥दानं दमश्च यज्ञश्च
स्वाध्यायस्तप आर्जवं॥अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं॥दया भूतेष्वलो

अथेदानीं आसुरीसंपदं उच्यते दंभेत्यादि २



नत्वं मार्दवं ह्रीरचापलं॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता॥ भवंति संपदं दैवी
मभिजातस्य भारत॥ दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च॥ अज्ञानं चाभिजातस्य
पार्थ संपदमासुरामिति॥ पुनरप्यध्यायसमाप्तेरासुरसंपत्प्रपंचिता॥ तत्राशास्त्रीया
याः स्वभावसिद्धाया आसुरसंपदोद्भवासनायाः शास्त्रीयया पुरुषप्रयत्नसाध्यया दैवसं
पदा सह वासनया क्षये सति जीवन्मुक्तिर्भवति॥ वासनाक्षयवन्मनोनाशस्यापि जीवन्मुक्ति
हेतुत्वं श्रूयते॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः॥ बंधाय विषयासक्तं मुक्त्यै निर्विष
यं स्मृतं॥ यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते॥ अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षु
णा॥ निरस्तविषयासंगं संनिरुद्धं मनो हृदि॥ यदा यात्युन्मनीभावं तदा तत्परमं पदं॥ ताव
देवं निरोधव्यं यावद्धृदि गतं क्षयं॥ एतज्ज्ञानं च ध्यानं च शेषोन्यायस्य विस्तर इति॥ बंधो

द्विविधः तीव्रो मृदुश्च। तत्रासुरसंपत्साक्षात्क्लेशहेतुत्वात्तीव्रो बंधः। दैतमात्रप्र
तीतिस्तु स्वयमक्लेशरूपत्वादासुरसंपद्व्यावर्तकत्वाच्च मृदुबंधः। तत्र वासनाक्षये
णा तीव्रबंध एव निवर्तते। मनोनाशेन तु कथं। तर्हि मनोनाशेनैवास्तं वासनाक्षयस्तु
निरर्थक इति चेत् न। भोगहेतुना प्रबलेन प्रारब्धेन वृद्धस्यापि तेमनसि तीव्रबंधनिवार
णार्थत्वात्। भोगस्य मृदुबंधत्वेनाप्युपपत्तेः। तामसवृत्तितीव्रबंधः सात्विकराज
सवृत्तिद्वये मृदुभोगः। एतच्च दुःखेष्वनुद्विग्नमना इत्यत्र स्पष्टीकृतं। एवं च सति मृदु
बंधस्याप्युपपत्त्वात्तीव्रबंधस्य वासनाक्षयेणैव निवृत्तेः अनर्थको मनोनाश इति चे
त् न। दुर्बलप्रारब्धापादितावश्यंभाविभोगानां प्रतिकारार्थत्वात् तादृग्भोगस्य प्रतीका
रानिवृत्त्यर्थमभिप्रेत्येदमाह। अवश्यंभाविभोगानां प्रतीकारो भवेद्यदि। तदा दुःखैर्न

यं

जीव०
३१

लिंप्येरन्नन्त्वरामयुधिष्ठिराः। तदेवं जीवन्मुक्तिं प्रति वासनाक्षयमनोनाशयोः साक्षात्सा
धनत्वात्साधनांतं तत्त्वज्ञानं तत्र भयोत्पादनेन व्यवहितत्वादुपसर्जनं। तत्त्वज्ञानस्य वा
सनाक्षयहेतुत्वं बहुशः श्रूयते स्मृतौ। ज्ञात्वा देवं सर्वपाशापहानिः। अध्यात्मयोगाधि
गमेन देवं मत्वा धीरो हर्षशोकौ जहाति। तरति शोकमात्मवित्। तत्र को मोहः कः शोक ए
कत्वमनुपश्यतः। ज्ञात्वा देवं मुच्यते सर्वपाशैरिति। मनोनाशहेतुत्वं च तत्त्वज्ञानस्य श्रु
तिसिद्धं विद्यारण्यायामभिप्रेत्येदं श्रूयते। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत
केन कं जिघ्रेदित्यादि। गौडपादाचार्याश्चाहुः। आत्मसत्यानुरोधेन न संकल्पयते य
दा। अमनस्तां तदा याति ग्राह्याभावे तदग्रहमिति। जीवन्मुक्तेर्वासनाक्षयमनोनाशावि
व विदेहमुक्तेः साक्षात्साधनत्वाज्ज्ञानं प्रधानं ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यत

३१

इति स्मृतेः ।केवलस्यात्मनो भावं कैवल्यं देहादिरहितत्वं तच्च ज्ञानादेव प्राप्यते। सदेह
त्वस्याज्ञानकल्पितत्वेन ज्ञानैकनिवर्त्यत्वाज्ज्ञानादेवेत्येवकारेण कर्मव्यावृत्तिः नकर्म
न२ णा प्रजयेति श्रुतेः यस्तु ज्ञानज्ञानस्त्वमनभ्यस्य यथा संभवं वासनाक्षयमनोनाशावभ्यस्य
सगुणब्रह्मोपास्ते न तस्य कैवल्यमस्ति लिंगदेहस्यानपायात् अत एवकारेण तावपि व्या
वर्त्येते येन मुच्यत इत्यस्यायमर्थः येन ज्ञानप्रापितकैवल्यत्वेन कृत्स्नबंधाद्विमुच्यत
इति।बंधश्चानेकविधः अविद्याग्रंथिर्ब्रह्मत्वं हृदयग्रंथिसंज्ञायः कर्माणि अपसर्वका कर्मग्रं
मत्वं मम स्युः पुनर्जन्मेत्यादीनां बंधस्त्वाष्टेस्तत्र तत्र व्यवहारात्।एते बंधाः सर्वेपि ज्ञाननिव
र्त्याः तथाश्रुतयः एतद्यो वेद निहितं गुहायां सोविद्याग्रंथिं विकिरतीह सोम्य ब्रह्म वेद ब्र
ह्मैव भवति भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे

अज्ञान २

जी॰ब॰
३२

परावरे। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान्कामान्सहेति। तमेव विदित्वा तिमृत्युमेतीति॥ यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते। य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति इत्यादीन्यत्वात्त्वादि बंधनिवृत्तिपराणि वाक्यान्यत्रोदाहरणीयानि। सेयं विदेहमुक्तिर्ज्ञानोत्पत्तिसमकालीना सेयं ब्रह्मणि विद्यारोपितानामेतेषां बंधानां विद्यया विनाशः सति पुनरुत्पत्त्यसंभवात् ननु भवत्वेतद्विद्यासमकालीनत्वं भाष्यकारे समन्वयसूत्रे प्रपंचयामास। तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥ तस्य ब्रह्मणोऽ(धिगम उत्तराघस्याश्लेषः पूर्वाघस्य विनाशः कुतस्तद्व्यपदेशात् तयोरश्लेषविनाश)
(योर्व्यपदेशात् यथा पुष्करपलाशा इत्यादिः विनाशस्य यथैषीकातूलमि) ३२

त्यादि॥ अघाश्लेषविनाशौ मुक्तो भवेत्तां तौ मा स्तु कृतस्या मुक्तस्येत्याशिष्य समाधत्ते॥
ननु वर्त्तमानदेहपातानंतर भाविनी विदेहमुक्तिरिति बहवो वर्णयंति॥ तथा च श्रुतिः
तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति॥ वाक्य वृत्तावप्युक्तं॥ प्रारब्धकर्मवेगे
न जीवन्मुक्तो यदा भवेत्॥ कंचित्कालमथारब्धकर्मबंधस्य संक्षये॥ निरस्तातिशयानं
दं वैष्णवं परमं पदं॥ पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते॥ सूत्रकारोप्याह॥ भोगेन त्वित
रे क्षपयित्वा संपद्यत इति॥ इतरे प्रारब्धपुण्यपापे॥ वसिष्ठोप्याह॥ जीवन्मुक्तपदं त्यक्त्वा
स्वदेहे कालसात्कृते॥ विशत्यदेहमुक्तित्वं पवनोस्पंदतामिवेति॥ नायं दोषः॥ विवक्षाया
विशेषेण मतद्वयस्याविरोधात्॥ विदेहमुक्तिरित्यत्रत्येन देहशब्देन कृत्स्नं देहजातं वि
वक्षित्वा बहुभिर्वर्णितं॥ अस्माभिस्तु भाविविदेहभावविवक्षयोच्यते तदनारंभायैव

जीव०
३३

ज्ञानसंपादनात्। अयं तु देहः पूर्वमेवारब्धः अतो ज्ञानेनापि नास्यारंभो वारयितुं शक्यते।
एतद्देहनिवृत्तिरपि न ज्ञानफलं। अज्ञानिनामप्यारब्धकर्मक्षये तन्निवृत्तेः। तर्हि वर्त्तमा
नलिंगदेहनिवृत्तिर्ज्ञानफलमस्तु ज्ञानमंतरेण तदनिवृत्तेरिति चेत् न। सत्यपि ज्ञाने
जीवन्मुक्ते तन्निवृत्त्यभावात्। ननु ज्ञानस्य कंचित्कालं प्रारब्धेन कर्मणा प्रतिबद्धत्वे
नानिवर्त्तकत्वेपि प्रतिबंधक्षये लिंगदेहनिवर्त्तकत्वं भविष्यतीति चेत् न। पंचपादि
काचार्येण यतो ज्ञानमज्ञानस्यैव निवर्त्तकमित्युपपादितत्वात्। तर्हि लिंगनिवृत्तेः
किं साधनमिति चेत् सामग्रीनिवृत्तिरिति ब्रूमः। द्विविधं हि कार्यनिवर्त्तकं विरोधि
सद्भावः सामग्रीनिवृत्तिश्च। तद्यथा विरोधिना वायुना तैलवर्त्तिसामग्रीनिवृत्त्या वा
प्रदीपो निवर्त्तते। लिंगदेहस्य साक्षाद्विरोधिनं न पश्यामः सामग्री द्विविधा प्रारब्धमना

३३

रब्धं चेति। ताभ्यामुभाभ्यामज्ञानिनां लिंगदेह इहामुत्र चावतिष्ठते। ज्ञानिनां त्वनारब्धे
ज्ञानेन निवर्त्ते प्रारब्धे च भोगेन निवर्त्तते तैलवर्त्तिरहितप्रदीपवत्सामग्रीनिवृत्त्या लिंग
देहो विनिवर्त्तते। अतो न तन्निवृत्तिर्ज्ञानफलं। नन्वेतेन न्यायेन भाविदेहानारंभोपि न ज्ञा
नफलं। तथा हि। किमनारंभ एव फलं किं वा तत्परिपालनं। नाद्यः तस्य प्रागभावरूपत्वे
नानादिसिद्धत्वात्। न द्वितीयः अनारब्धकर्मरूपसामग्रीनिवृत्त्यैव भाविदेहारंभप्रा
गभावप्रतिपालनसिद्धेः। न च तन्निवृत्तिं फलं। सापि विद्यानिवृत्तेरेव विद्याफलत्वात्। नैष
दोषः। भाविजन्मानारंभादीनां विद्याफलत्वस्य प्रामाणिकत्वात्। भूयो न जायत इत्यु
दाहृताः श्रुतयस्तत्र प्रमाणं। न च ज्ञानमज्ञानस्यैव निवर्त्तकमिति न्यायेन विरोधः। अ
ज्ञानसहभावनियतानामब्रह्मत्वादीनामज्ञानशब्देन पंचपादिकाचार्यैर्विवक्षितत्वा

तात्पर्यानुभवविरोधः॥ अनुभूयते ह्यज्ञाननिवृत्तिवद्ब्रह्मत्वादिनिवृत्तिरपि तत्
स्मात्तद्विदेहराहित्यलक्षणा विदेहमुक्तिर्ज्ञानसमकालीना तथा च याज्ञवल्क्यव
चनं अभयं वै जनक प्राप्तोसीति एतावदरे खल्वमृतत्वमिति चाश्रुत्यंतरेपि॥
तमेवं विद्वानमृत इह भवति य एतत्पन्नेपि तत्वज्ञाने तत्फलभूता विदेहमुक्तिस्तदा
नीन भवेत्कालांतरे च भवेत्तदा ज्योतिष्टोमादाविव ज्ञानजन्यमपूर्वं किंचित्कल्प्यत॥
तथा चैकमन्त्रास्त्र एव ज्ञानशास्त्रमंतर्भवेत्॥ अथोच्यते मंत्रादिप्रतिबद्धाग्निवत्प्रा
रब्धप्रतिबद्धं ज्ञानं कालांतरे विदेहमुक्तिं दास्यतीति मैवं अविरोधात्॥ न ह्यस्मदभि
मताभाविदेहात्यंताभावलक्षणा विदेहमुक्तिर्वर्त्तमानदेहमात्रस्थापकेन प्रारब्धे
न विरुध्यते॥ येन प्रतिबध्येत॥ किंच क्षणिकत्वेन कालांतरे स्वयमविद्यमानं ज्ञानं क

के १

ष्यं मुक्तिं दद्यात्। ज्ञानांतरं चरमसाक्षात्कारलक्षणमुत्पत्स्यत इति चेत्तं॥ साधना
भावात्। प्रतिबंधप्रारब्धनिवृत्त्यैव सह गुरुणा स्वदेहेंद्रियाद्यशेषजगत्प्रतिभास
निवृत्तेः किं तत्साधनं स्यात्। तर्हि भूयश्चांते विश्वमायानिवृत्तिरित्यस्याः श्रुतेः को
र्थ इति चेत्तं प्रारब्धांते निमित्ताभावाद्देहेंद्रियाद्यशेषनैमित्तिकनिवृत्तिरित्ये
वार्थः। ततो भवदभिमतावर्त्तमानदेहराहित्यलक्षणविदेहमुक्तिः पश्चाद्रस्तु अ

मम ४

स्मदभिमता तु ज्ञानंकाली नैव एतदेवाभिप्रेत्य भगवानशेषज्ञ आह। तीर्थे श्वपचगृहे
वा नष्टस्मृतिरपि परित्यजन्देहं। ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक इति।
तस्माद्विदेहमुक्तौ साक्षात्साधनस्य तत्त्वज्ञानस्य प्रधानत्वमुपपन्नं॥ वासनाक्षय
मनोनाशयोः ज्ञानसाधनत्वेनाव्यवहितत्वादुपसर्जनत्वं। अथ सुरवासनाक्षयका

रिरापादेवंवासनाया ज्ञानसाधनत्वं श्रुतिस्मृत्योरुपलभ्यते शांतो दांत उपरतस्तिति
क्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिः स्मृतिरपि। अमानित्वमदंभि
त्वमहिंसा क्षांतिरार्जवं। आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः। इंद्रियार्थेषु
वैराग्यमनहंकार एव च। जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं। असक्तिरनभि
ष्वंगः पुत्रदारगृहादिषु। नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु। मयि चानन्य
योगेन भक्तिरव्यभिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि। अध्यात्मज्ञा
ननित्यत्वं तत्त्वज्ञानार्थदर्शनं। एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथेति। अन्यस्मि
न्नहं बुद्धिरभिष्वंगः ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानसाधनमित्यर्थः। मनोनाशस्यापि



ज्ञानसाधनत्वं श्रुतिस्मृतिप्रसिद्धं। ततस्तु तं पश्यते निष्कलं ध्यायमान इति श्रुतिः।

वन्मुक्तिं २

अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति च। प्रत्यगात्मसमाधिप्रा
प्त्यादेवं ज्ञात्वेत्यर्थः। यं विनिद्रा जितश्वासाः संतुष्टाः संयतेंद्रियाः। ज्योतिः पश्यंति युंजाना
स्तस्मै योगात्मने नमः इति स्मृतिः। तदेवं तत्त्वज्ञानादीनां त्रयाणां विदेहमुक्तिं जीवंगु
णप्रधानभावव्यवस्था सिद्धा। ननु विविदिषासंन्यासिना संपादितानामेतेषां किं वि
द्वत्संन्यासादूर्ध्वमनुवृत्तिमात्रं किं वा पुनरपि संपादनप्रयत्नोपेक्षितः। नाद्यः तत्त्वज्ञा
नस्येवान्ययोरप्ययत्नसिद्धत्वे प्राधान्यप्रयुक्तादराभावप्रसंगात्। न द्वितीयः इतर
प्र २ योरिव ज्ञानस्यापि यत्नसापेक्षत्वे सत्युपसर्जनप्रयुक्तौदासीन्याभावप्रसंगात्। नायं त्व २
दोषः। ज्ञानस्यानुवृत्तिमात्रं इतरयोर्यत्नसाध्यत्वमित्यंगीकारात्। तथा हि विद्याधि
कारी द्विविधः। कृतोपास्तिरकृतोपास्तिश्चेति। तत्रोपास्यसाक्षात्कारपर्यंतामुपास्तिं

जीव०
३६

रूढत्वाद्यदि ज्ञाने प्रवर्त्तेत तदा वासनाक्षयमनोनाशयोर्दृढतरत्वेन ज्ञानादूर्ध्वं विद
त्संन्यासः जीवन्मुक्तिश्चतःस्वत एव सिध्यतः । तादृश एव च मुख्याभिमतो मुख्यो विद्याधिका
री । ततस्तं प्रतिज्ञास्त्रेषु सहोपन्यासात्स्वरूपेण विविक्तावपि विद्वत्संन्यासविविदि
षासंन्यासौ संकीर्णाविव प्रतिभासेते । इदानींतनास्तु प्रायेण कृतोपास्तय एवोत्सु
कमात्रात्सहसा विद्यायां प्रवर्त्तेते । वासनाक्षयमनोनाशौ च तात्कालिकौ संपाद
यंति । तावता श्रवणमनननिदिध्यासनानि निष्पाद्यंते । तैश्च दृढाभ्यस्तैरज्ञानसंश
यविपर्ययनिरासात्तत्त्वज्ञानं सम्युदेति । तस्य बाधकप्रमाणाभावान्निवृत्तायां स्प
विद्यायां पुनरुत्पत्तिकारणाभावाच्च नास्ति तस्य प्रोथिल्यं । वासनाक्षयमनोनाशौ तु ३६
दृढाभ्यासाभावाद्भोगप्रदेन प्रारब्धेन तदा तदा बाध्यमानत्वाच्च सवातप्रदेशप्रदीपव

त्सरहसानि वर्ततेः। तथा च वसिष्ठः। पूर्वैरभ्यस्त प्रयत्नेभ्यो विषमोयं हि संमतः। दुःसाध्यो
वासनात्यागः सुमेरून्मूलनादपीति। अर्जुनोपि। चंचलं हि मनः कृष्ण प्रमाथि बलवद्
दृढं। तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करमिति। तस्मादिदानीतनानां विद्वत्संन्यासि
नां स्नान स्यानुवृत्तिमात्रं वासनाक्षयमनोनाशौ तु प्रयत्नसाध्याविति सिद्धं। ननु के
प्र२ यं वासना यस्याः क्षयाय यतितव्यमिति चेत्तत्स्वरूपमाह वसिष्ठः। दृढभावनया त्य
क्तपूर्वापरविचारणं। यदादानं पदार्थस्य वासना सा प्रकीर्तिता। भावितं तीव्रसंवे
गादात्मना यत्तदेव सः। भवत्याशु महाबाहो विगतेतरसंस्मृतिः। तादृग्रूपो हि पुरुषो
वासनाविवशीकृतः। संपश्यति यदेवैतत्सद्वस्त्विति विमुह्यति। वासनावेगवैव
श्यात्स्वरूपं प्रजहाति तत्। भ्रांतं पश्यति दुर्दृष्टिः सर्वं मदवशादिवेति॥ अत्र च

जीव॰ ३७ भवति २ हेतुः स्यात्

स्वस्वदेशाचारकुलधर्मभाषाभेदनरूतापत्रोक्ष्टादिषु प्राणिनामभिनिवेशः॥ सामान्यत
उदाहरणं विशेषतस्तु भेदात्तु स्वापश्चादुदाहरामः॥ यथोक्तां वासनामभिप्रेत्य वृहदा
रण्यकेप्युच्यते॥ स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तद
भिसंपद्यत इति वासनाभेदो वाल्मीकिना दर्शितः॥ वासना द्विविधा प्रोक्ता शुद्धा च म
लिना तथा॥ मलिना जन्मकरी प्रोक्ता शुद्धा जन्मविनाशिनी॥ अज्ञानसुघनाकारा घनाहं
कारशालिनी॥ जन्ममत्सुकरी प्रोक्ता मलिना वासना बुधैः॥ पुनर्जन्मांकुरं त्यक्त्वा स्थि
ता संभ्रष्टबीजवत्॥ देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते॥ देहादीनां पंचकोशा
नां तत्साक्षिणश्चिदात्मनश्चाभेदावरकमज्ञानं तेन सुष्ठु घनीभूतत्वाकारो यस्याः से
यमज्ञानसुघनाकारा यथा क्षीरं तक्रसेचनेन घनीभवति यथा वा विलीनं घृतम

३७

त्यंतशीतलप्रदेशे चिरमवस्थापितं सुघनीभवति तथा वासनाऽदृढत्वं घनीभावश्चा
नभ्यांतिपरंपरा तां चासुरसंपद्विस्तरेण भगवानाह। प्रवृत्तिं च निवृत्तिं च जना न वि
दुरासुराः। न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥ असत्यमप्रतिष्ठं ते जगदाहुरनी
श्वरं। अपरस्परसंभूतं किमन्यत्कामहैतुकं॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबु
द्धयः। प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः॥ काममाश्रित्य दुःपूरं दंभमानमदा
न्विताः। मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तंतेऽशुचिव्रताः॥ चिंतामपरिमेयां च प्रलयां
तामुपाश्रिताः। कामोपभोगपरमा एतावदिति निश्चिताः॥ आशापाशशतैर्बद्धाः
कामक्रोधपरायणाः। ईहंते कामभोगार्थमन्यायेनार्थसंचयानिति॥ घनाहेका
रश्चितत्तैर्वोदाहृतः। इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं। इदमस्तीदमपि मे भ

जीव०
३९

विष्यति पुनर्द्धनं। असौ मया हतः शत्रुर्हनिष्ये चापरानपि। ईश्वरोहमहं भोगी सि
द्धोहं बलवान्सुखी॥ आढ्योभिजनवानस्मि कोन्योस्ति सदृशो मया। यक्ष्ये दास्यामि
मोदिष्य इत्यज्ञानविमोहिताः॥ अनेकचित्तविभ्रांता मोहजालसमावृताः। प्रसक्ताः
कामभोगेषु पतंति नरकेशुचौ॥ इति। एतेन पुनर्जन्मकारकत्वमुदाहृतं भवति।
तच्च पुनः प्रपंचितं। आत्मसंभाविताः स्तब्धा धनमानमदान्विताः॥ यजंते नाम
यज्ञैस्ते दंभेनाविधिपूर्वकं। अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः॥ मामात्मप
रदेहेषु प्रद्विषंतोभ्यसूयकाः॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान्। क्षिपाम्य
जस्रमशुभानासुरीष्वेव योनिषु॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। माम
प्राप्यैव कौंतेय ततो यांत्यधमां गतिम्॥ इति। शुद्धवासनानुज्ञातसैया। ज्ञेयस्वरूपं च

३९

ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितं ६

त

योदशाध्याये भगवानाह॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते। अनादिमत्परं ब्र
ह्म न सत्तन्नासदुच्यते। सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखं। सर्वतः श्रुतिमल्लो
के सर्वमावृत्य तिष्ठति। सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं। असक्तं सर्वभृच्चैव
निर्गुणं गुणभोक्तृ च। बहिरंतश्च भूतानामचरं चरमेव च। सूक्ष्मत्वात्तदविज्ञेयं दूर-
स्थं चांतिके च तत्। अविभक्तं च भूतेषु विभक्तमिव च स्थितं। भूतभर्तृ च तज्ज्ञेयं ग्रसि
ष्णु प्रभविष्णु च। ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते॥ इति। अत्र तटस्थलक्ष
णस्वरूपलक्षणाभ्यामवगंतुं सोपाधिकनिरुपाधिकस्वरूपद्वय मुपन्यस्तं॥ न
नु तत्सक्त पूर्वापरविचार [illegible] त्वे वासना लक्षणमुक्तं ज्ञेयज्ञाने च विचारजन्मं अतो न
पृथग्यांतल्लक्षणमस्तिमेवं लक्षणे दृढभावनयेत्युक्तत्वात् यथा बहुषु जन्मसु दृढ

या २

जीव०
३९

भावितत्वेनास्तिजन्मनिविनैवपरोपदेशमहंकारममकारकामक्रोधादयोमलि
नवासनानुत्पद्यंते। तथाप्राथमिकबोधस्यविचारजन्यत्वेपिदीर्घकालनैरंतर्य
सत्कारैर्भावितेनत्वेपश्चाद्वाक्ययुक्तिपरामर्शमंतरेणैवपुरोवर्तिघटादिवत्स
हसातत्त्वंपरिस्फुरतितादृशबोधानुवृत्त्यासहितंइंद्रियव्यवहारःशुद्धवासना
साचदेहजीवनमात्रायोपयुज्यतेनतुदंभदर्पाद्यासुरसंपदुत्पादनायनापिजन्मां
तरहेतुधर्माधर्मोत्पादनाययथाभृष्टानिव्रीह्यादिबीजानिकुक्षिपूरणमात्रायो
पयुक्तानिनतुरुचिकरान्नायनापिसस्यनिष्पत्तयेतद्वत्॥ मलिनाचवासनात्रि
विधालोकवासनाशास्त्रवासनादेहवासनाचेति। सर्वेजनायथाननिंदंतियथा ३९
स्तुवंतितथैवसर्वदाचरिष्यामीत्यभिनिवेशोलोकवासनातस्याःसंपादयितुम

शक्यत्वान्नास्तित्वं। तथाहि। कोन्वस्मिन्न लोके सांप्रतं गुणवान् कश्च वीर्यवा
नित्यादिना बहुधा वाल्मीकिं पप्रच्छ। इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः इत्या
दिना प्रत्युत्तरं नारदो ददौ। तादृशस्यापि रामस्य पतिव्रताशिरोमणिभूता या जग
न्मातुः सीता यास्य श्रोतुमशक्यो जनापवादः संप्रवृत्तः किमु वक्तव्यमन्येषां। त
देश थादेश। विशेषेण परस्परनिंदाबाहुल्यं उपलभ्यते। दाक्षिणात्यैर्विप्रैरौत्तरी
या वेदविदो विप्रा मांसभक्षिणो निंद्यंते चोत्तरैश्च मातुलसुतोद्वाहिनो यात्रा
सु मज्जाडवाहिनो दाक्षिणात्या निंद्यंते। बह्वृचाश्चाश्वलायनशाखीयाः काण्व
मर शाखीयांश्च अशास्तां मन्यंते। वाजसनेयिनस्तु वैपरीत्येन एवं स्वस्वकुलगोत्रं वंगेष्ट बंधु२
देवतादिप्रशंसा परकीयनिंदा चाविद्वदंगनागोपालं सर्वत्र प्रसिद्धा। एतदे

जीव०
४०

वाभिप्रेत्योक्तं कोऽलोकमाराधयितुं समर्थ इति। विद्यते न खलु कश्चिदुपायः
सर्वलोकपरितोषकरो यः सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुज
ल्प इति। अतो लोकवासनाया मलिनत्वमभिप्रेत्य योगेश्वरस्य तुल्यनिंदास्तु
तित्वं मोक्षशास्त्रेषु वर्णितं॥ शास्त्रवासना च त्रिविधा। पाठव्यसनं बहुशास्त्र
व्यसनं अनुष्ठानव्यसनं चेति। पाठव्यसनं भरद्वाजे वगम्यते। स हि पुरुषायु
षत्रयेण बहून्वेदानधीत्यैंद्रेण चतुर्थायुषि प्रलोभितः तत्रापि परिशिष्टान्वेदा
ध्ययनायोद्यमं चकार तस्यापि पाठस्याशक्यत्वान्मलिनवासनात्वं तां चासक्ति
मिंद्रः प्रतिबोध्य पाठान्निवर्त्य ततोप्यधिकपुरुषार्थाय सगुणब्रह्मविद्यामुप
दिदेश। तदेतत्सर्वं तैत्तिरीयब्राह्मणे द्रष्टव्यं। तथैवात्यंतिकपुरुषार्थाभा

४०

वाद्धहुशास्त्रव्यसनस्य मालिन्यं काव षेयगीतायामुपलभ्यते दुर्वासा मुनिर्बहु
विधशास्त्रपुस्तकभारैः सह महादेवं नमस्कर्तुमागतः तत्सभायां नारदेन मुनि
ना भारवाहा गर्दभसाम्यमापादितः कोपात्पुस्तकानि लवणार्णवे परित्यज्य महा
देवेनात्मविद्यायां प्रवर्त्तित इति। आत्मविद्या चानंतसुखस्य गुरुकारुण्यरहिते
स न वेदशास्त्रमात्रेण त्वध्येतात तथा च श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मे
धया न बहुधा नाश्रुतेनेति। अन्यत्राप्युक्तं। बहुशास्त्रकथाकंथारोमंथेन वृथैव
किं। अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरांतरमिति। अधीत्य चतुरो वेदान् धर्म
शास्त्राण्यनेकशः। ब्रह्मतत्त्वं न जानाति दर्वी पाकरसं यथेति च नारदश्चतुः
षष्टिकलाविद्याकुशलोप्यनात्मवित्त्वेनानुतप्तः सनत्कुमारमुपाससारेति छां

पं१

जीव० ४१

दोगाऽध्यीयंते। अनुष्ठानव्यसनं विष्णुपुराणे निदाघस्योपलभ्यते। वसिष्ठरामायणे
दाशूरस्य। निदाघो हि ऋभुणा पुनः पुनः प्रबोध्यमानोऽपि कर्मश्रद्धाजाड्यं चिरं न ज
हौ। दाशूरश्चालं तमश्रद्धाजाड्येनानुष्ठानाय शुद्धप्रदेशं भूमौ न क्वाप्युपलेभे। अस्या
श्च कर्मवासनायाः पुनर्जन्महेतुत्वान्मलिनत्वं। तथा चाथर्वणिका अध्यीयंते। प्ल
वा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनंदंति मूढा
जरामृत्युं ते पुनरेवापि यंति। अविद्यायामंतरे वर्त्तमानाः स्वयं धीराः पंडितं मन्यमा
नाः। जंघन्यमानाः परियंति मूढा अंधेनैव नीयमाना यथांधाः। अविद्यायां बहुधा वर्त्त
माना वयं कृतार्था इत्यभिमन्यंति बालाः। यत्कर्मिणो न प्रवेदयंति रागात्तेनातुराः ४१
क्षीणलोकाश्च्यवंते। इष्टापूर्त्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयंते प्रमूढाः। नाकस्य

पुण्ये ते सुकृते ऽनुभूत्वा मर्त्यलोकं हीनतरं वा विशंतीति। भगवताप्युक्तं। यामिमां
पुष्पितां वाचं प्रवदंत्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्तीति वादिनः। कामा
त्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति। भोगै
श्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसायात्मिका बुद्धिः समाधौ न विधीयते। त्रै
गुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन। निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवा
न्। यावानर्थ उदपाने सर्वतः संप्लुतोदके। तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानत इति
दर्पहेतुत्वाच्च शास्त्रीयवासनाया मलिनत्वं। श्वेतकेतुरप्येनेव कालेन सर्वान्वेदा
नधीत्य दर्पेण पितुरपि पुरतो विनयं न चकारेति छांदोग्याः षष्ठाध्याये पठंति। बाल्हा तथा२
किः कानिचिदुपासनान्यवगत्य दृप्तउशीनरादिषु बहुषु देशेषु दिग्विजयेन बहु

मेरा३

जी॰ब॰ ४२ न२

न्दिशा नवस्नायकाश्यामजातशत्रुं ब्रह्मविद्विरो मतिमनुशासितुं धार्ष्ट्यं चकारेति को
षीतकिनो वाजसनेयिनश्चाधीयते॥ देहवासनापि ह्यात्मत्वगुणाधानदोषापन
यैभ्रांतिं त्रिविधा तत्रात्मत्वं भाष्यकारउदाजहार देहमात्रं चैतन्यविशिष्टमात्मेति
प्राकृता जना लोकायतिकाश्च प्रतिपन्ना इति स वा एष पुरुषोऽन्नरसमय इत्या
रभ्य तस्मादन्नं तदुच्यत इत्यंतेन ग्रंथेन तामेव प्राकृतं प्रतिपत्तिं तैत्तिरीयाः स्प
ष्टीकुर्वंति विरोचनः प्रजापतिनानुशिष्टोऽपि स्वचित्तदोषेण देहे ह्यात्मबुद्धिं दृढी
कृत्यासुरान्सर्वाननुशशासेति छांदोग्याः स्पष्टमेवाध्याये समामनंति॥ गुणाधानं द्वि

न॰न॰

विधं लौकिकं शास्त्रीयं चासमीचीनशरीरादिसंपादनं लौकिकं कौमल्यध्वनिनागा ४२
तुमध्येतुं च तैलपानमरिचभक्षणादिना लोकाः प्रयतंते। मृदुस्पर्शार्थं पुष्टिकरा लोकाः

वौषधाहारानुपयुंजते। तावरण्यायाभ्यंगोद्वर्तनदुकूलालंकारानुपसेवंते सोगंधा
पस्रगालेपनेधारयंति। शास्त्रीयंगुणमाधातुं गंगास्नानशालग्रामतीर्थादिकं संपा
दयंति। दोषापनयनं च चिकित्सकोक्तैरौषधैर्मुखादिप्रक्षालनेन च लौकिकं। श्रौ
ताचमनादिना वैदिकमित्युभयविधं। अस्या अपि देहवासनाया मालिन्यं वक्ष्यते। देह
स्यात्यंतावदप्रामाणिकत्वात् दोषदुःखहेतुत्वाच्च मलिनं। अस्मिन्नर्थे पूर्वाचा
र्यैः सर्वैरपि पराकांतं गुणाधानं च प्रायेणानपन्नपामरः प्रसिद्धा एव गायका अध्या
पका अपि प्रयतमाना अपि वहवो ध्वनिसौष्ठवं न लभंते मद्गुस्वरंगोगुष्ठिश्चन निय
ता। तावणप सौगंध्येऽपि दुकूलस्रगादिनिष्ठेन तु देहनिष्ठे अत एव विष्णुपुराणे
भिहितं। मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ। देहे चेत्प्रीतिमान्मूढो भवि

चे धानं २

जीव० ४३

तानरकेऽपि सङ्गस्य देहास्थिचिरगंधेन न विरज्येत यः पुमान् । वैराग्यकारणं तस्य किमन्यदु
पदिश्यते । शास्त्रीयं गुणौ प्रबलेन शास्त्रेण योह्यते । यथा न हिंस्यात् सर्वा भूता नीत्यस्याः
श्रुतेः अग्नीषोमीयं पशुमालभेतेत्यनेनापवादः तद्वत् प्रबलं शास्त्रमेतत् अन्यशास्त्रापेक्ष तरं २
या । यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः यत्तीर्थबुद्धिः सलि
ले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः । अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः उभ
योरन्तरं ज्ञात्वा कस्य शौचं विधीयते इति च यद्यप्यनेन शास्त्रेण दोषापनयने प्रतिषि
द्धे तेन तु गुणाधानं तथापि समन्तिविरोधि प्रबलदोषे गुणं आधातुमशक्तत्वादित्यर्थः गुणा
धानस्य प्रतिषेधो ऽत्यन्तमालिन्ये चात्र मैत्रायणीय शाखायां श्रूयते । भगवन्नस्थिच
र्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिते विण्मूत्रवातपित्तसंघाते दुर्गंधे

राम ४३

निःसारेस्मिन् शरीरे किं कामोपभोगैरिति। शरीरमिदं मिथुनादेवोद्भूतं संविद्पेतं निरयएव।
मूत्रद्वारेण निष्क्रान्तं अस्थिभिश्चितं मांसेनानुलिप्तं चर्मणावनद्धं विण्मूत्रपित्तकफमज्जा
मेदोवसाभिरन्यैश्च मलैर्बहुभिः परिपूर्णं कोशइव वसुनेति। चिकित्सया च रोगशान्तिर्निमि
यता शान्तोपि रोगः कदाचित्पुनरुदेति नवच्छिद्रैर्निरंतरस्रवन्मलेषु रोमकूपैरसंख्यातैः
ः स्विन्ने गात्रे कोनाम स्वेदेन प्रक्षालयितुं शक्नुयात्। तदुक्तं पूर्वाचार्यैः नवच्छिद्रयुता देहाः
स्रवंति घटिका इव बाह्यशौचैर्न शुद्ध्यन्ति चान्तःशौचं न विद्यते। अतो देहवासनामलि
नां तदेतन्मालिन्यमभिप्रेत्य वसिष्ठः आपादमस्तकमहं मातापितृविनिर्मितः इत्ये
को निश्चयो राम बंधाय सद्विलोकनात्। सा कालसूत्रपदवी सा महावीचीवागुरा
असिपत्रवनश्रेणी या देहेहमिति स्थितिः। सात्याज्या सर्वयत्नेन सर्वनाशेप्युप

जी० वि०
४४

क्षिप्ते स्पृष्ट्वा स्नानमस्मिन्स मांसे वपुष्यसीति। तदेतल्लोकशास्त्रदेहवासनात्रय
मविवेकिनामुपादेयत्वेन प्रतिभासमानमपि विविदिषोर्वेदनोत्पत्तिविरोधित्वाद्दु
दुष्टोऽज्ञानप्रतिपत्तिविरोधित्वाच्च विवेकिभिर्हेयं। अत एव स्मर्यते। लोकवासनया जं
तोः शास्त्रवासनयापि च। देहवासनया ज्ञानं यथावन्नैव जायते इति। यातु दंभदर्पा
द्यासुरसंपद्रूपा मानसवासना तस्या नरकहेतुत्वान्मालिन्यं श्रुतिप्रसिद्धं। ततः केनाप्यु
पायेन वासनाचतुष्टयस्य क्षयः संपादनीयः। यथा वासनाक्षयः संपादनीयः तथा
मनसोऽपि ननु नाशः किं करणं नित्यद्रव्यमणुपरिमाणं मनो वैशेषिकाद्युपगच्छंति येन म
नोनाशो दुःसंपाद्यः स्यात्। किं तर्हि सावयवमनित्यं सर्वदा जतुसुवर्णादिवद्द्रुतविध
परिणामार्हद्रव्यं मनः तस्य लक्षणं प्रमाणं च वाजसनेयिनः समामनंति का
चै

राम
४४

उ

रजस्तमसी निर्बाध्यबाधकतां यान्ति कल्लोला इव सागरे॥ तत्र तमस उद्भवे सत्यासुरसंपदुदेति
रजस उद्भवे सति लोकादिवासनास्तिस्रो भवंति। सत्वस्योद्भवे सति दैवीसंपदुपजायते एतदे
वाभिप्रेत्योक्तं सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्यु
तेति। यद्यप्यंतःकरणं त्रिगुणात्मकं भासते तथापि सत्वमेवास्य मुख्यमुपादानकारणं र
जस्तमसी तूपष्टंभके। अत एव ज्ञानिनो योगाभ्यासेन रजस्तमसोरपनीतयोः। सत्वमेव स्वरू
पं परिशिष्यते। एतदेवाभिप्रेत्योक्तं ज्ञस्य चित्तमचित्तं स्यात् ज्ञचित्तं सत्व मुच्यत इति। त
त्र सत्वं चांचल्यहेतुरजोगुणशून्यत्वादेकाग्र्यं भ्रांतिकल्पितानात्मस्वरूपस्थूलपदार्थाका
रहेतुतमोगुणशून्यत्वात्सूक्ष्मं ततश्चात्मदर्शनयोग्यमत एव श्रुतिः। एषु सर्वेषु भूतेषु गूढो
त्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति। न खलु वायुनादोधू

जीव० ४६

पमानेन प्रदीपेन मणिमुक्तादिलक्षणानि निर्द्धारयितुं आकांते नापि स्थूलेन खनित्रेण सूक्ष्मेव
सूक्ष्मयवस्थूतिः संभवति नदेतदीदृशं सत्वमेवायोगिषु तमोगुणगर्भितेन रजोगुणे नोपष्ट
ब्धं बहुविधदैन्यसंकल्पेन नर्त्तेनयमानं चित्तं भवति। तस्मिन्नेतमो गुणाधिक्ये सति आसुरीसंपद
मुपाचिन्वं तोनं भवति तदा हवसिष्ठः अनात्मन्यात्मभावेन देहभावनयातथा। पुत्रदार
कुटुंबेश्च चेतो गच्छति पीनतां। आधिव्याधिविलासेन समाश्वासेन संसृतो। हेयादेयविभा
गेन चेतो० अहंकारविकारेण मम नाम ललीयया। इदं ममेति भावेन चेतो०। स्नेहेन धनलो
भेन लाभेन मणियोषितां। आपातरमणीयेन चे० दुराशाक्षीरपानेन भोगानिलबलेन च।
आस्वादनेन चारेण चेतो हि याति पीनतामिति। तदेवं वि नाज्ञानीयपोः
वासनामनसोः स्वरूपं निरूपितं अथ वासनाक्षय मनोनाशौ क्रमेण निरूप्येते तत्र वा

रामा ४६

ने४

ल

मनाशयप्रकारमाह वसिष्ठः बंधोहि वासनाबंधो मोक्षः स्याद्वासनाक्षयः वासनास्त्वंप
रित्यज्य मोक्षार्थित्वमपि त्यज मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः मैत्र्यादिभाव
नानाम्नीं गृहाणामलवासनाः। ता अप्यंतः परित्यज्याभिर्व्यवहरन्नपि। अंतः शांतं त्वमस्ने
होभव चिन्मात्रवासनः। तामप्यंततः परित्यज्य मनोबुद्धिसमन्वितो। शेषे स्थिरसमा[illegible]सी
नो येन त्यजसि तत्त्यजेति। अत्र मानसवासनाशब्देन पूर्वोक्ता भक्तिस्नेहो लोकशास्त्रदेहवास
ना विवक्षिताः। विषयवासनाशब्देन दंभदर्पाद्यासुरसंपद्विवक्षिताः मृदु[illegible]तीव्रत्वेन
हि वक्ष्यामेदकारणो। यद्वा शब्दस्पर्शरूपरसगंधविषयाः। तेषां काम्यमानत्वदशाज
न्यः संस्कारो मानसवासना। भुज्यमानत्वदशाजन्यः संस्कारो विषयवासना। अस्मिन्प वा॰२
क्षे पूर्वोक्तानां चतसृणामनयोरेवांतर्भावः। आंतर्बाह्यव्यतिरेकेण वासनांतराऽसंभा

वात्॥ ननु वासनायाः परित्यागः कथं घटते॥ न हि तासां मूर्त्तिरस्ति येन संमार्जन्या समूहितधूलि
तृणवदस्तेनोत्पत्य बहिस्त्यक्ष्यामः मैवं॥ उप[illegible]वासजागरणवत्तदुपपत्तेः॥ स्वभाववशात्तयोर्भुक्ति
क्रियानिद्रयोरमूर्त्तत्वेपि तत्परित्यागरूपेऽउपवासजागरणे सर्वैरनुष्ठीयेते तद्वदत्राप्यस्तु॥
अद्य स्थित्वा निराहार इति मंत्रेण संकल्पे कृते सावधानत्वेनावस्थानं। तत्र त्याग इति चे
दत्रापि न तद्दंडवारितं। शेषमंत्रेण संकल्प्याप्रमत्तत्वेनावस्थातुमशक्यत्वात्। द्वितीयमंत्रानधिका
रिणामनुभाष्यपासंकल्पोस्तु। यदि तत्रान्नाकसूपौदनादिसन्निधिस्त्यागस्तर्हि अत्रापि स्र
क्चंदनवनितादिसन्निधिपरित्यागोस्तु। अथ तत्र बुभुक्षानिद्रालस्यादिनिवर्त्तकैः पु
राणश्रवणदेवपूजानृत्यगीतवाद्यादिभिश्चित्तमुपलाल्यते॥ तर्हि अत्रापि मैत्र्यादिभि
स्तदुपलालयेत्। मैत्र्यादयस्तु पतंजलिना सूत्रिताः। मैत्रीकरुणामुदितोपेक्षाणांसु

सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति ॥ चित्तं हि रागद्वेषपुण्यपापैः कलु
षीक्रियते। रागद्वेषौ च पतंजलिरसूत्रयत् ॥ सुखानुशयी रागः ॥ दुःखानुशयी द्वेष इति ॥ सुखाद
नुभूयमाने सुखं मनुशेते कश्चिद्वृत्तिविशेषः सुखजातीयं मे सर्वं भूयादिति। तच्च दृष्टादृष्टसा ष२
माग्र्यभावान्न संपादयितुं शक्यं अतः स रागश्चित्तं कलुषीकरोति यदा तु सुखीष्वयं मैत्री
भावयेत्। सर्वेऽप्येते सुखिनो मदीया इति तदा तत्सुखं स्वकीयमेव संपन्नमिति भावय
तस्तत्र सुखे रागो निवर्तते यथा स्वस्य राज्याभावे स्वपुत्रादिराज्यमेव स्वकीयं तद्वत्। नि पि४
वृत्ते रागे वर्षास्वतीतासु शरन्नदीव चित्तं प्रसीदति॥ तथा दुःखमनुशेते कश्चित्प्रत्ययः
ईदृशं दुःखं सदा मे मा भूदिति। तच्छत्रुव्याघ्रादिषु सत्सु न निवारयितुं शक्यं न च सर्वे दुः
खहेतवो हंतुं शक्यंते। अतः स द्वेषः सदा हृदयं दहति। यदा स्वस्येव परेषां सर्वेषां प्रतिकू

योग २

प्राणिषु

नीव० ४८

लंदुःखं मा भूदिति अनेन प्रकारेण करुणां दुःखीषु भावयेत्। तदोवेर्ष्यादिद्वेषनिवृत्तौ चित्तं
प्रसीदति अत एव स्मर्यते। प्राणा यथात्मनोभीष्टा भूतानामपि ते तथा। आत्मौपम्येन भू
तानां दयां कुर्वीत मानव इति। तं प्रकारं च महात्मानो दर्शयंति। सर्वेत्र सुखिनः संतु सर्वे संतु
निरामयाः सर्वे भद्राणि पश्यंतु मा कश्चिद्दुःखमाप्नुयादिति। तथाहि प्राणिनः स्वभावत
एव पुण्यं नानुतिष्ठंति पापं त्वनुतिष्ठंति तदाहुः। पुण्यस्य फलमिच्छंति पुण्यं नेच्छंति मान
वाः न पापफलमिच्छंति पापं कुर्वंति यत्नतः इति। ते च पुण्यपापे पश्चात्तापं जनयतः स
च तापः श्रुत्यानूद्यते। किमहं साधु नाकरवं किमहं पापमकरवमिति। पूय सो पुण्यपुरु
षेषु मुदितां भावयेत् तदा तद्वासनावान् स्वयमेवाप्रमत्तः पुण्येषु प्रवर्त्तेत। तथा पापिपु
पेक्षां भावयन् स्वयमपि पापान्निवर्त्तेत। अतः पश्चात्तापस्याभावेन चित्तं प्रसीदति॥

राम ४८

पि

सुखीषु मैत्रीं भावयतो न केवलं रागनिवृत्तिः किंतु असूयेर्ष्यादयोऽपि निवर्त्तन्ते। गुणेषु दो
षाविष्करणमसूया परगुणासहनमीर्ष्या यदा मैत्रीवशात्परसुखं स्वकीयमेव संपद्यते
तदा गुणेषु कथमसूयादिकं संभवेत् एवं दोषांतरनिवृत्तिरपि यथायोग्यमनुमेया। दुः
खितेषु करुणां भावयतः शत्रुवधादिकरो द्वेषो यदा निवर्त्तते तदा दुःखित्वप्रतियोगि
कस्य सुखित्वस्य प्रयुक्तो दर्पोऽपि निवर्त्तते स च दर्पः सुरसंप  दहंकारप्रस्तावे पूर्व
मुदाहृतः ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखीत्यादि। ननु पुण्यात्मसु मुदितां भावय
तः पुण्यप्रवृत्तिः फलत्वेनोक्ता सा च योगिनो न युक्ता मलिना याज्ञासत्रवासनायां पुण्य
मंतर्भाव्यं पूर्वमुदाहृतत्वात्। मैवं पुनर्जन्मकरस्य काम्येष्टापूर्त्तादेस्तत्र मलिनत्वेनोदा
हरणात्। इदं तु योगाभ्यासजन्यमशुक्लकृष्णत्वेन जन्माद्यापादकं [illegible] विवक्षितं अत्र

रण
पर २

ण  पुण्यं

जीव०
४९

शुक्लकृष्णत्वं पतंजलिः सूत्रयामास। कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामिति। का
म्यं कर्म विहितत्वाच्छुक्लं निषिद्धं कृष्णं मिश्रं शुक्लकृष्णं तदेतत् त्रयमितरेषामयोगिनां
संपद्यते। तच्च त्रिविधं जन्म प्रयच्छति तदा ऊर्ध्वस्वरूपाचार्याः शुभेनाप्नोति देवत्वं
निषिद्धेन नारकीं गतिं। उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभते वचनात्। ननु योगस्यानिषि
द्धत्वादकृष्णत्वेपि विहितत्वाच्छुक्लत्वमिति चेत् मैवं अकाम्यत्वाभिप्रायेणाशुक्ल
त्वाभिधानात्। अतोऽशुक्लाकृष्णत्वे पुण्यपापे प्रवृत्तिर्योगिनो पेक्षिता। ननु योगिनोप्यने
नन्यायेन यथोचितं पुण्यान्यसमुदितानां भावयित्वा पुण्ये एव प्रवृत्तेरस्त्विति चेत् प्र
वृत्त नानानामयेमे इत्यादिभिस्त्वितं प्रसादयंतिते षामेव योगित्वान्मैत्र्यादि चतुष्टयमुप
लक्षणं तेनाभयं सत्वसंशुद्धिरित्यादिदैवसंपदमानित्वमदंभित्वमित्यादि ज्ञान

राम
४९

म.१

साधनानि जीवन्मुक्तस्थितप्रज्ञादिवचनोक्तधर्माश्चोपलक्ष्यंते। सर्वे ह्यमे तेषां शुभ
वासनारूपत्वेन मलिनवासनानिवर्तकत्वात्। ननु संत्यनेकाः शुभवासनाः नचताः
एकेन सर्वा अभ्यसितुं शक्यंते निरर्थकश्च तदभ्यासप्रयास इति चेत्। नन्न तन्निवर्त्या
नामनेतानां मलिनवासनानामेकस्य मनस्यसंभवात्। नह्यायुर्वेदोक्तानि सर्वाण्यौषधानि
एकेन सेवितुं शक्यंते नैतानापि तन्निवर्त्याः सर्वे रोगा एकस्य देहे संभवंति। एवं तर्हि स्वचित्तं
प्रथमतः परीक्ष्य यत्र यदा यावंतो मलिनवासनाः तदा तावतीः शुभवासनाविरोधिनी
रभ्यसेत्। यथा पुत्रमित्रकलत्रादिभिः पीड्यमानस्ततो विरक्तस्तन्निवर्तकं परि
व्राज्यं गृह्णाति। तथा विद्यामदधनमदकुलाचारमदादिमलिनवासनाभिः पीड्यमान
स्तद्विरोधिनं विवेकमभ्यसेत्। स च विवेको जनकेन दर्शितः। अद्ययेमद्रूनां मूर्ध्नि ते

जीव॰
५०

दिनैर्दिनैः पतत्यधः॥ हेन चित्तमहत्तायां कैषा विश्रब्धता तव॥ क्वधनानि महीपानां ब्रह्मणः
क्व जगंति वा। प्राक्तनानि प्रयातानि क्वेयं विश्रब्धता तव। कोटयो ब्रह्मणां याता गताः स
र्गपरंपराः॥ प्रयाताः पांशुवद्भूपाः का धृतिर्मम जीविते। येषां निमेषणोन्मेषौ जगतां प्र
लयोदयौ। तादृशाः पुरुषाः यात्र मादृशां गणनैव का॥ नन्वयं विवेकस्तत्त्वज्ञानोदया

स५

त्प्राचीनः नित्यानित्यवस्तुविवेकादिसाधनव्यतिरेकेण ब्रह्मज्ञानासंभावात्। इह त
त्त्वज्ञानस्य साक्षात्कारस्य जीवन्मुक्तये वासनाक्षयादिसाधनं वक्तुमुपक्रांतम् अतः कि
मिदमकांडे तांडवमिति चेन्नायं दोषः। साधनचतुष्टयसंपन्नस्य पश्चाद्ब्रह्मज्ञानमि
त्येष सर्वपुरुषसाधारणः क्षुण्णः श्रोतः प्रौढो राजमार्गः जनकस्य तु पुण्यपुंजपरि
पाकेनाकाशात्फलपातवदकस्मात्सिद्धगीतश्रवणमात्रेण तत्त्वज्ञानमुत्पन्नं। तत

राम
५०

अस्थिरत्वविश्रांतये विवेकोयं क्षिप्यत इति कांड एवेदमुचितं तांडवं । नन्वेवमप्यस्य विवे
कस्य ज्ञानसमनंतरभावित्वेन मलिनवासनानुवृत्त्यभावात् शुद्धवासनाभ्यासो नापे
क्षित इति चेन्न जनकस्य तदनुवृत्त्यभावेपि याज्ञवल्क्यभगीरथादेस्तदनुवृत्तिदर्श
नात् । अस्ति हि याज्ञवल्क्यस्य तत्प्रतिवादिनामुपस्तकहोलादीनां च भूयान् विद्यामदः
तैः सर्वैरपि विजिगीषुकथायां प्रवृत्तत्वात् । ननु तेषां विद्यांतरमेवास्ति न ब्रह्मविद्ये
ति चेत्तन्न कथागतयोः प्रश्नोत्तरयोः ब्रह्मविषयत्वात् । ननु ब्रह्मविषयत्वेपि तेषामा
पातज्ञानमेव न तु सम्यक् वेदनमिति चेन्न तथा सत्यस्माकमपि तदीयवाक्यैरुत्पन्ना
भ्रम२ याविद्याया असम्यक्त्वप्रसंगात् । ननु सम्यक्त्वेपि परोक्षमेवेति चेन्न यत्साक्षादपरो
क्षाद्ब्रह्मेति मुख्यापरोक्षविषयतयैव विशेषतः प्रश्नोपलंभात् । नन्वात्मज्ञानिनो

पा॰ ज्ञान२

जीव॰
५१

विद्यामदश्चाचार्यैर्नाभ्युपगम्यते। तथा चोपदेशसाहस्र्यामभिहितं। ब्रह्मवित्त्वं तथा मुक्त्वा
स आत्मज्ञो न चेतरः इति। नैष्कर्म्यसिद्धावपि "न चाध्यात्माभिमानोऽपि विदुषोऽस्त्यासुरत्वतः॥
विदुषोऽप्यासुरश्चेत्स्यान्निःफलं ब्रह्मदर्शनम्" इति चेन्नायं दोषः। जीवन्मुक्तिपर्यन्तस्य ज्ञ
ज्ञानस्य तत्र विवक्षितत्वात्। न खलु वयमपि जीवन्मुक्तानां विद्यामदमभ्युपगच्छामः।
ननु विजिगीषोरात्मबोध एव नास्ति। रागो लिंगमबोधस्य चित्तव्यायामभूमिषु। कुतः
शाद्वलता तस्य यस्याग्निः कोटरे तरोः इत्याचार्यैरभ्युपगमादिति चेत्। न। रागादयः सं
तु कामं न तन्नावोपराध्यन्ते उत्खातदंष्ट्रोरगवद्विद्या किं करिष्यतीति। अत्र तैरे
व रागाद्यभ्युपगमात्। न चात्र परस्परव्याहतिः। स्थितप्रज्ञे ज्ञानिमात्रे च वचनद्वय
स्य व्यवस्थापनीयत्वात्। ननु ज्ञानिनो रागाद्यभ्युपगमे धर्माधर्मद्वारेण जन्मान्त

न३

राम
५१

मात्रा

रप्रसंग इति चेन्नैवं दग्धबीजवदविद्यापूर्वकं कामादेरेव मुख्यरागादिमत्त्वे
न पुनर्जन्महेतुत्वात् ज्ञानिनस्तु दग्धबीजवदाभासा एव रागादयः। एतदेवाभिप्रेत्यो
क्तं। उत्पद्यमाना रागाद्या विवेकज्ञानवह्निना तदा तदैव दह्यन्ते कुतस्तेषां प्ररोहणमि
ति। तर्हि स्थितप्रज्ञस्यापि ते संतीति चेन्न। तत्काले मुख्यवदेवाभासमानानां बाधकत्वा
त्। रज्जुसर्पोपि मुख्यसर्पवदेव तदानीं भीषयत्युपलभ्यते तद्वत् तदाभासत्वानुसं
धानानुवृत्तौ न कोपि बाध इति चेत्। चिरंजीवतु भवान्। इयमेवास्मदभिमता जीवन्मु
क्तिः। न यावद्बलवत्तरस्तु विजिगीषुदशायां न हि दृढाः चित्तविश्रान्तये विद्वत्संन्यासस्यते
न करिष्यमाणत्वात्। न केवलमस्य विजिगीषा किंतु धनतृष्णापि महती जाता। ब
हूनां ब्रह्मविदां पुरस्तादपि तं साक्षात्कारगोसहस्रमपहृत्य स्वयमेवेदमाह नमोव

ल:१

जीव॰ पंचम
५२

यं ब्रह्म लिप्सायकुर्मी गोकामाएव स्वयं स्मरंति। इतरान् ब्रह्मविदो वज्ञातुं इयं कथं चिदृच्यो
मां लोति चेन्न। अयमपि तदीयपरो दोषः। इतरे च ब्रह्मविदः स्वकीयं धनमनेनापहृतमि
ति मत्वा चुक्रुधुः स्वयं च क्रोधपरवशाः सन्तः कल्यं जरा पेन मारयामासुः। न च तस्य ब्रह्मघ्नो
मो क्षाभावः। जनकनीयः कौषीतकिनः समामनंति। नास्य केन चित्कर्मणा लोको हीय
ते न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्ययेति। दोषोपि स्वकृतायामा
र्यां पंचाशत्यामिदमाह। हयमेधशतं ब्रह्मविदो याज्ञवल्क्यादीनामस्त्येव मलि
नवासनानुवृत्तिः। भगीरथस्तु तत्त्वं विदित्वापि राज्यं परिपालयन् मलिनवासना
भिश्चित्तविश्रांत्यभावे सति सर्वं परित्यज्य पश्चाद्विश्रांतवा[illegible]निति वसि
ष्ठेनोपाख्यायते। अतः स्वकीयं वर्त्तमानं मलिनवासनादोषं [illegible] परकीयदो

राम
५२

+ हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि॥ परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः॥ इति तस्मा षैं
लिंब हुना

षयस्तस्य प्रवृत्तौ सत्यां तत्प्रतीकारमभ्यसेत् अनेनैनैर्वभिप्रायेण समर्थितो यथा सुनिपुणः कश्चित् परदोषेक्षणे रतः॥ तथा चेन्निपुणः स्वे स्यात्को न मुच्येत बंधनात् इति नन्वादौ तावद्द्विधा मदस्य कः प्रतीकार इति चेत्। किं स्वनिष्ठमदस्य परविषयस्य किंवा स्वविषयस्य परनिष्ठस्य॥ आद्येऽभं गोऽस्मा कश्चिदेवंरूपं भविष्यतीति निरंतरं भावयेत्। तद्यथा। श्वेतकेतुर्विद्यामत्तः प्रवाहणस्य राज्ञः समागत्य तेन पंचाग्निविद्यायां पृष्टः स्वयमजानानो निरुत्तरो राज्ञा बहुविधं भर्त्सितः पितुः समीपमागत्य स्वनिर्वेदमुदाजहार॥ पितानुनिर्मदस्तमेव राजानमनुसृत्य तां विद्यां लेभे। इत्यवान्तां किं चाजातशत्रुर्णा राज्ञा भर्त्सितो दृप्तं संतत्य राजानमुपससाद गुरो मां निंदत्त्वमन्यतां वा सर्वथापि न मे हानिरितिभावयेत् तथा हि श्लो

= पश्यत कहोलादयप्यश्रमदेन कथां कृता पराजिताः॥ यदा स्वविजयः परनिष्ठो मदः प्रवर्तेत तदा मत्तः स्व

वर्

निंदंति

जीव० ५३

त्मानं यदि निंदंति स्वात्मानं स्वयमेव हि ॥ शरीरं यदि निंदंति सहायास्ते जना मम इति ।
तत्त्वाद्दत्त श्चाह ॥ निंदावमानावत्यंतं भूषणं यस्य योगिनः ॥ धीविक्षेपः कथं
तस्य वाचाटैः क्रियतामिहेति ॥ नैष्कर्म्यसिद्धौ ॥ संपरि [illegible] सर्वस्य केशोषत श्चावधा पुरीषे
से रिते । यदि यं वदेत्तस्मै किं न तोषकरि तु भवेत् । तद्वत्स्यूनेतुथा सत्क्ष्मे देहे त्यक्ते
विवेकतः यदि दोषं वदेत्तस्मै किं न तु विदुषो भवेत् ॥ शोकहर्षभयक्रोधलो
भमोहस्पृहादयः ॥ अहंकारस्य दृश्यंते जन्ममृत्युश्च नात्मनः । निंदायाम्भूषण
च त्वं ज्ञानां कुत्रादर्शितं ॥ मन्निंदया यदि जनः परितोषमेति नन्वप्रयत्नसुल
भोयमनुग्रहो मे ॥ श्रेयोर्थिनो हि पुरुषाः परतुष्टिहेतोर्दुःखार्जितान्यपि ध
नानि परित्यजंति ॥ सततसुलभदैन्ये निःसुखे जीवलोके यदि मम परिवा

राम ५३

दाम्नीति मामोप्ति कश्चित्। परिवदतु यथेष्टं मलमस्तं तिरो वाजगन्निहि बकुकुः
खे दुर्लभः प्रीति योगंजी वंतु मेन्नाचुगणाः सदैव येषां प्रमादात्सुविचक्षणो हं यदा
यदा मे विस्मृतिं भजंन्निनदा तदा मां प्रतिबोधयंति। यतेर्मुमुक्षोर्वै कुडुःखभागिनो
यदेयदेहो मदरिर्मे वानुगः। नमे वयो द्वेष्टि मराव मे सुहृत्। तदात्मदृकस्यामहमा
त्मनः सुकृतं स्वधर्मपीडामविचिंत्य योपमत्याय सुहृद्धर्मिद्मयत्नतः "न चेत्स्मा
मप्यहमस्य कुर्यामतः कृतघ्नो वदकीदृत्नोन्य इति। अवमानस्य भूषणत्वं स
र्पयते। नथा चरेत्तु वै योगी सतां धर्ममदूषयन्। जना यथावमन्येरन् गच्छेयुर्नैव
संगतिमिति याज्ञवल्क्योषसर्त्तदीनां यो स्वनिष्ठपरनिष्ठविघ्नामदोत्तयोर्यथा
विवेकेन प्रतीकारस्तथा धनाभिलाषक्रोधयोरप्यवगंतव्यः। अर्थानाम

जीव ० र्जने क्लेशास्तथैव परिरक्षणे नाशे दुःखं व्यये दुःखं धिगर्थान्क्लेशकारिणइति।
५४ धनविषयो विवेकः क्रोधोपि द्विविधः स्वनिष्ठः परविषयः परनिष्ठः स्वविषयश्चे
परविषयं १ ति तत्र स्वनिष्ठं प्रत्येवमुक्तं "अपकारिणि चेत्कोपः कोपे कोपः कथं न ते धर्मार्थ
काममोक्षाणां प्रसह्य परिपंथिनि॥ फलार्थिनो धर्मयत्नोऽर्थनाशनः स चेदपा
र्थः स्वशरीरतापनः। न चेह नामुत्र हिताय यः सतां मनांसि रोषः स समाश्रयेत्क
परनिष्ठं २ थमिति स्वविषयं प्रत्येवमीरितं। न मे पराधः किमकारणेन त्वां मदभ्यसूयेत्प
पि नैव चिंतयेत्। नयत्कृतानामप्यवबंधनि[illegible]ति स्ततो पराधः परमोनुचिंत्यतां॥
नमोस्तु कोपदेवाय स्वाश्रयज्वालिने भृशं कोप्यस्य मम वैराग्यदायिने दोषबो ताम
धिने इति। धनाभिलाषः क्रोधवधो विद्युत्राभिलाषावपि विवेकेन निवर्त्तनीयौ ५५

च्छू २

तत्रयोषिद्विवेकीव सिष्टेन दर्शितः॥ मांसपांचलिकाया स्तु यंत्रलोलेंगपंजरे॥ स्नाय्वस्थि
ग्रंथिशालिन्याः स्त्रियः किमिव शोभनं। त्वङ्मांसरक्तबाष्पांबु पृथक्कृत्वा विलोचने॥
समालोकय रम्यं चेत्किं मुधा परिमुह्यसि॥ मेरुशृंगतटोल्लासि गंगाजलरयोपमां॥ दृष्ट्वा
यस्मिं स्तने मुक्ताहारस्योच्छ्वासशालिनां॥ श्मशानेषु दिगंतेषु स एव ललनास्तनः॥ श्वभि
रास्वाद्यते काले लघुपिंड इवांधसः॥ केशाः कज्जलधारिण्यो दुःस्पर्शा लोचनप्रियाः॥
दुष्प्रता म्लिष्टशिखानायो दह्यंते तृणवन्नरान्। ज्वलतामपि दूरेपि सरसाद्र्यपि नीरसा॥
स्त्रियो हि नरकाग्नीनामिंधनं चारु दारुणं। कामनाम्ना किराते न विकीर्णा मुग्धचेतसां
नार्यो नरविहंगानामंगबंधनवागुरा। जन्मपल्वलमत्स्यानां चित्तकर्दमचारिणां पुं
सां दुर्वासनारज्जुर्नारी बडिशपिंडिका। सर्वेषां दोषरत्नानां सुसमुद्गिकयानया। दुःख

=संमलमस्तु मम स्त्रिया ॥ इतोमांसमितोरक्तमितोस्थीनीति वासरैः ॥ अलमन्कतिपयैरेवं गि +१

जीव० श्रेखलयानि:स्त्री विरक्तानां यस्य स्त्री तस्य भोगेच्छा निःस्त्रीकस्य क्व भोगभूः । स्त्रियं त्य

५५ क्त्वा जगत्त्यक्तं जगत्त्यक्त्वा सुखी भवेदिति पुत्रविवेको ब्रह्मानंदे दर्शितः । अलभ्यमानस्तन

यः पितरौ क्लेशयेच्चिरात् लब्धोपि गर्भपातेन प्रसवेन च बाधते । जातस्य ग्रहरोगादिः कुमा

स्वं~ रस्य च धूर्तता उपनीतेप्यविद्यत्वमनुद्वाहश्च पंडिते । यूनश्च परदारादि दारिद्र्यं च कुटुंबि

नः पित्रोर्दुःखस्य नास्त्यंतो धनी चेन्म्रियते तदेति । तथा विद्याधनक्षेत्रादिविषयेष्वपि विवि

च्य प्रतीकारं कुर्यात् कृते च प्रतीकारे जीवन्मुक्तिलक्षणं परमं पदं लभ्यते । तदाह वसिष्ठः

वासनानां परित्यागे यदि यत्नं करोष्यलं । तत्ते शिथिलतां यांति सर्वाधिव्याधयः क्षणा

त् । पौरुषेण प्रयत्नेन बलात्संत्यज्य वासनाः । स्थितिं बध्नासि चेत्तर्हि पदमासादय

स्यलमिति । ननु भवतु पौरुषः प्रयत्नो नाम पूर्वोक्तो विषयदोषविवेकः स च पुनःपुनः

राम ५५

= विषयाणां मलिनवासनानां विवेकेन प्रतीकारस्तत्पार्थ्यास्तामर्पये यथायोग्यं शास्त्रैः स्वयुक्त्या दोषं +५

वासनां

क्रियमाणो विप्रवत्सेंद्रियव्यापारेणाभिभूयते॥ तदुक्तं भगवता। यततो ह्यपि कौंतेय पुरुष
स्य विपश्चितः॥ इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः॥ इंद्रियाणां हि चरतां यन्मनोनु
विधीयते॥ तदस्य हरति प्रज्ञां वायुर्नावमिवांभसीति॥ एवं तत्पुरुषस्य विवेकरक्षार्थं इंद्रिया
णि निरोधव्यानीति दर्षितं ते वोत्तरश्लोकाभ्यां दर्शितं। तानि सर्वाणि संयम्य युक्त आसी
त मत्परः॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता। तस्माद्यस्य महाबाहो निगृहीतानि
सर्वशः॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठितेति॥ स्मृत्यंतरेपि॥ न पाणिपादचपलो
न नेत्रचपलो यतिः॥ न च वाक्चपलश्चैवमिति शिष्टस्य लक्षणं। एतद्देवान्यत्र संग्रहविवर
णाभ्यां स्पष्टीकृतं। अजिह्वः षंढकः पंगुरंधो बधिर एव च। मुग्धश्च मुच्यते भिक्षुः षड्भि
रेतैर्न संशयः॥ इदं मिष्टमिदं नेति योश्नन्नपि न सज्जते। हितं सत्यं मितं वक्ति तमजि

प　　　　　वि२

जीव०　द्दृष्टं न स्पृशेत्। अयुग्मातां यथा नारीं तथा षोडशवार्षिकीं। शतवर्षां च यो दृष्ट्वा निर्विकारः

५६　स षंडकः॥ भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च। योजनान्न परं याति सर्वथा पंगुरेव सः॥

तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगं। चतुर्युगां भुवं त्यक्त्वा परिव्राट् सोंध उच्यते। हितं मि

पि०　तं मनोरामं वचः शोकापहं च यत्। श्रुत्वा यो न शृणोतीव बधि　रः स प्रकीर्तितः॥ सान्निध्ये

विषयाणां च समर्थोऽविकलेंद्रियः॥ सुप्तवद्वर्तते नित्यं भिक्षुर्मुग्धः स उच्यते। न निंदां न

स्तुतिं कुर्यात् न कं चिन्मर्माणि स्पृशेत्। नातिवादी भवेत्तद्वत्सर्वत्रैव समो भवेत्। न सं

भाषेत् स्त्रियं कां चित्पूर्वदृष्टां च न स्मरेत्। कथां च वर्जयेत्तासां न पश्येल्लिखितामपीति॥

यथा कश्चिद् [illegible] तेन केन कोपवासमौनादिव्रतं संकल्प्य सावधानो ऽन्त्रामकृत्वा सम्प　राम

ग्पालयति तथैवाजिह्वत्वादिव्रते स्थितः सावधानो विवेकं पालयेत्। तदेवं विवेकं　५६

द्वियनिरोधाभ्यां दीर्घकालनैरंतर्यसत्कारसेविताभ्यां मैत्र्यादिभावना सुप्रतिष्ठिता
सुरासुरसंपद्रूपा मलिनवासनाः क्षीयंते ततो निश्वासोच्छ्वासवन्निमेषोन्मेषव
त्पुरुषप्रयत्नमंतरेण प्रवर्त्तमानाभिर्मैत्र्यादिवासनाभिर्लौकिकव्यवहरन्नपि तदी
यसाकल्यवैकल्यानुसंधानं चित्ते परित्यज्य निद्रातंद्रामनोराज्यादिरूपाः समस्त
चेष्टाः प्रयत्नेन त्यक्ताः कृत्वा चिन्मात्रवासनामभ्यसेत् स्वतस्तावदिदं जगच्चिज्ज
डोभयात्मकं भासते। यद्यपि ग्राह्यस्य घटादिजडवस्तुभासनायैवेंद्रियाणि सृष्टानि।
परांचि खानि व्यतृणत्स्वयंभूरिति श्रुतेः तथापि चैतन्यस्योपादानतया वर्जयितु
मशक्यत्वाच्चैतन्यपूर्वकमेव जडं भासते तमेव भांतमनुभाति सर्वं तस्य भासा सर्व
मिदं विभातीति श्रुतेः तथा सति पश्चाद्भासमानस्य जडस्य पृथमतो भासमा

जगत्

जीव० ५७

नं चैतन्यमेव वास्तवं रूपमिति निश्चित्य जडमुपेक्ष्य चिन्मात्रं चित्ते वासयेत्। एत
च्च लिङ्गदेहयोः अन्योन्याध्यासं विसृष्टमवगम्यते। किमिहास्तीह किं मात्रमिदं किं
मयमेव च याः कस्त्वं कोऽहं कतरे वा लोका इति वदाशु मे॥ चिदिहास्तीति चिन्मात्रमिदं
चिन्मयमेव च। चित्त्वं चिदहमेते च लोकाश्चिदिति संग्रह इति। यथा सुवर्णकारः क
टकं विक्रीणन्नपि तत्तदाकारस्य गुणदोषावुपेक्ष्य गुरुत्वे सुवर्णयोरेव मनः प्रणि सुवर्ण
धत्ते तथा चिन्मात्रे मनः प्रणिधातव्यं यावता कालेन जडं सर्वथैवोपेक्ष्य चिन्मात्रे
मनसः प्रवृत्तिर्निःश्वासादिवत् स्वाभाविकी संपद्येत तावन्तं कालं चिन्मात्रवासना
यां प्रयतेत। ननु आदावेव चिन्मात्रवासनास्तु तयैव मलिनवासनानिवृत्तेः किं मनो राम ५७
नाशादिना मैत्र्याद्यभ्यासेनेति चेन्न। चिद्वासनाया अप्रतिष्ठितत्वप्रसंगात्। यथा कु

न्मात्रे

ति

द्दिमदार्थव्यतिरेकेण क्रियमाणमपि स्तंभकुंभात्मकं सदनं प्रतिष्ठति यथा वा वि
रेचनं न भवत्यदोषमनिः सेव्यं सेवितमप्यौषधं नारोग्यकरं तद्वत् । ननु तामप्यथ
परित्यजेदिति चिन्मात्रवासनाया अपि परित्याज्यत्वमवगम्यते नैतद्युक्तं चिन्मात्रं परि
त्यज्य अन्यस्य कस्यचिद्रूपादेयत्वाभावात् नायं दोषः द्विविधा चिन्मात्रवासनाम
नोबुद्धिसमन्विता तद्रहिता चेति । करणं मनः कर्तृत्वोपाधिर्बुद्धिः तथा च सत्यहम
तोहमेकाग्रेण मनसा चिन्मात्रं भावयिष्यामीत्येतादृशेन कर्तृकरणानुसंधा
नेन समन्विता सा भूमिकीया चिन्मात्रवासना ध्यानशब्दाभिधेया तां परित्यजेत् ॥
या त्वभ्यासपाटवेन कर्त्राद्यनुसंधानेन व्यवधानरहिता समाधिशब्दाभिधेया
तामुपाददीत ध्यानसमाध्योस्तु लक्षणं पतंजलिः सूत्रयामास । तत्र प्रत्ययैकतानता

तत्र

जीव०
५८

ध्यानं। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति। द्वैतो शेसमाधौ दीर्घकाल
नैरंतर्यसत्कारैः सेविते स्थैर्ये लब्धे पश्चात्कर्तृकरणानुसंधानपरित्यागार्थयिः प्र
यत्नः तमपि परित्यजेत। नत्वेवं मति तत्त्यागप्रयत्नोपि परित्याज्य इत्यवेनस्थास्था
तमेवं कतकरजोन्यायेन स्वपरनिवर्त्तकत्वात् यथा कलुषिते जले प्रक्षिप्तं कतकर
ज इतररजसा सह स्वात्मानमपि निवर्त्तयति तथा त्यागार्थप्रयत्नः कर्तृकरणानुसंधा
नं निवर्त्य स्वात्मानमपि निवर्त्तयिष्यति। निवृत्ते तस्मिन्मलिनवासनावत् शुद्ध
वासनानामपि क्षीणतान्निर्वासनं मनो भवति। एतदेवाभिप्रेत्य वसिष्ठ आह। त
स्माद्वासनया बद्धं मुक्तं निर्वासनं मनः। राम निर्वासनीभावमाहराशु विवेकतः॥
सम्यगालोचनात्सत्याद्वासनाप्रविलीयते। वासनाविलये चेतः शममायाति दी

राम
५८

५ = धिमध्यकर्माणि मा करोतु करोतु वा॥ हृदयेनास्तसर्वास्थो मुक्त एवोत्तमाशयः॥ नैष्कर्म्येण न तस्यार्थस्त २५

एवंविदितिचः यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते। यस्य निर्वासनो बोधः स जीव
न्मुक्त उच्यते इति च। सुषुप्तवत्स्व ... शम्यित भाववृत्तिना स्थितं सदा जाग्रति
येन चेतसा। कलान्वितो विधुरिव यः स साधुधेर्निषेव्यते मुक्त इतीह संमत इति च। हृ
दयात्सं परित्यज्य सर्वमेव महामतिः। यस्तिष्ठति गतव्ययः स मुक्तः परमेश्वरः समा
धीं स्तिन कर्माणि न समाधानजप्याभ्यां यस्य निर्वासनं मनः॥ विचारितमलं शा
स्त्रं चिरमुद्राहितं मिथः॥ संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदमिति च। न च
निर्वासनमनस्कस्य जीवनहेतुव्यवहारलोपेन निशंकनीयं। किं च चक्षुरादिव्यवहा
रस्य लोपः किंवा मानसव्यवहारस्य लोपः। न चाद्य मुद्दालको निराचष्टे। वासना हि
न मप्यनत्र चक्षुरादीन्द्रियं स्पतंः॥ प्रवर्त्तते बहिः स्वार्थवासनानाचकारणमिति॥

जीव० हितायैव स्थितो निराग्रहः॥ अयत्नोपनीतेष्वक्षिदृग्द्रव्येषु यथा पुनः नीरागमेव पतन्ति त
५९ द्वत्कार्येषु धीरधीरिति। तादृश्या धिया आ स्व
भोगं समाचोपपादयति। परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये। विज्ञाय सेवित
श्चोरो मैत्रीमेति न चोरतां। अशंकितोपि संप्राप्ता ग्रामयात्रा यथाध्वगैः प्रेक्ष्यते त
द्वदेव ज्ञैर्भोगश्रीरवलोक्यत इति। भोगकालेपि सवासनेभ्यो निर्वासनानां विशेष
माह। नानादृश्यानि मायानि हेमपमं यथा निशि। नेहंते प्रकृतादन्यद्रमते शिष्ट
वर्त्मनि॥ नित्यमापूर्णतामंतरस्तु श्यामिंदुसुंदरीं आपद्यपि न मुंचंति ज्ञानिनः
शीततामिव। अपि बहुतमर्यादा भवंति तिनि यतात्मयाः नियतिं न विमुंचं
ति महांतो भास्करा इवेति जनकस्यापि समाधिव्युत्थितस्येदृशमेवाचरणं पश्य राम
५९

ते। तस्मीमया चिरं स्थित्वा जनको जनजीवितः॥ व्युत्थितश्चिंतयामास मनसा नु
मशालिना। किमुपादेयमस्तीह यत्नात्संसाधयामि किं। स्वतः स्थितविशुद्धस्य चि
तेः का मे स्ति कल्पना। नाभि वांछाम्यसंप्राप्तं संप्राप्तं न त्यजाम्यहं स्वस्थ आत्मनि
तिष्ठामि यन्ममास्ति तदस्तु मे। इति संचिंत्य जनको यथाप्राप्तक्रियामसौ असक्तः
कर्तुमुत्तस्थौ दिनं दिनपतिर्यथा॥ न विष्यं नानुसंधत्ते नातीतं चिंतयत्यसौ॥ वर्त
माननिमेषं तु हसन्नेवानुवर्तत इति। तदेवं यथोक्तेन वासनाक्षयेण यथोक्ता जीव
न्मुक्तिर्निर्विघ्नति इति स्थितं इति जीवन्मुक्तिविवेके वासनाक्षयनिरूपणं॥ अथ
जीवन्मुक्तिसाधनं मनोनाशं निरूपयामः यद्यप्यशेषवासनाक्षये सति अ
र्थान्मनो नश्यत्येव तथापि स्वातंत्र्येण मनोनाशे सम्यगभ्यस्ते सति वासनाक्षयोर

५१

जीव० क्षिप्तो भवति। नचाजितेंद्रियत्वपंडकर्त्तोऽभ्यासेनैव तद्रक्षासिद्धेति वाच्यं। न हि मनस्यजि-

६१ तेंद्रियत्वादीनामर्थसिद्धत्वेनाभ्यासप्रयासाभावात्। ननु मनोनाशाभ्यासप्रयासमस्त-

नाप्यस्तीति चेत्। अस्तु नाम तस्यावश्यकत्वादंतरेण मनोनाशं त्वभ्यस्तान्यपि जितेंद्रि-

त्वादयो न स्थिरा भवंति। अतो मनसो नाशनीयत्वं जनक आह॥ सहस्रांकुरशाखा-

यफलपल्लवशालिनः॥ अस्य संसारवृक्षस्य मनोमूलमिति स्थितं। संकल्पमेव

तन्मन्ये संकल्पोपशमेन तत्। शोषयामि यथा शोषमेति संसारपादपः॥ प्रबुद्धोस्मि प्र-

बुद्धोस्मि दुष्टश्चोरो मयात्मनः। मनो नाम निहन्म्येनं मनसास्मि चिरं हृतः इति। व-

सिष्ठोप्याह॥ अस्य संसारवृक्षस्य सर्वोपद्रवदायिनः। उपाय एक एवास्ति मनसः राम

स्वस्य निग्रहः॥ मनसोभ्युदयो नाशो मनोनाशो महोदयः। ज्ञमनोनाशमभ्येति मनो हं०

ड्रस्य हि स्थैर्यं खलु। तावन्निःशीथवेनाल्लावल्लां तिष्ठ दिवासनाः। एकतत्वदृढाभ्यासा
द्यावन्न विजितं मनः॥ प्रक्षीणचित्तदर्पस्य निगृहीतेंद्रियद्विषः। पद्मिन्य इव हेमंते
क्षीयंते भोगवासनाः॥ हस्तं हस्तेन संपीड्य दंतैर्दंतान्विचूर्ण्य च। अंगान्यंगैः समाक्रम्य
जयेदादौ स्वकं मनः। एतावति धरणितले सुभगास्ते साधुचेतसः पुरुषाः। पुरुषक
थासु च गण्या न जिता येन साधेन। हृदयबिले कृतकुंडल उल्बणकलनेर्विषी
चं.द.व.॥ मनोभुजंगः। यस्योपशांतिमागतस्तं दिनं तमभ्ययं वंदे इति। चित्तं नाभिः किलास्येदं
मायाचक्रस्य सर्वतः। स्थीयते चेत्तदाक्रम्य तन्न किंचित्प्रबाधते इति। गौडपादाचार्यै
रप्युक्तं। मनसो निग्रहायत्तमभयं सर्वयोगिनां॥ दुःखक्षयः प्रबोधश्चाप्यक्षया
शांतिरेव च॥ पूर्वमर्जुनेनोक्तं। चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं। तस्याहं नि

जीव० यहं मन्येवायोरिवसुदुष्करमित्येतद्धचनंहठयोगविषयं॥अतएववसिष्ठआहउपवि
६१५ २ श्योपविश्यैकं चिंतकेनमुहुर्मुहुः॥नशक्यतेमनोजेतुंविनायुक्तिमनिंदितां॥अंकुशे
नविनामत्तोयथादुष्टमतंगजः॥विजेतुंशक्यतेनैवतथायुक्त्याविनामनः॥मनोविल
यहेतूनांयुक्तीनांसम्प्रधारणं॥वसिष्ठेनकृतंतावत्तत्रैष्ठस्ववशोमनः॥हठतोयु
क्तितश्चापिद्विविधोनिग्रहोमनः॥निग्रहोधीविकिषाणांहठोगोलकनिग्रहात्॥क
दाचिज्जायतेकश्चिन्मनस्तेनविलीयते॥अध्यात्मविद्याधिगमःसाधुसंगमए
वच॥वासनासंपरित्यागःप्राणस्पंदनिरोधनं॥एतास्तायुक्तयःपुष्टाःसंतिचित्त
जयेकिल॥सतीषुयुक्तिष्वेतासुहठान्नियमयंतिये॥चेतस्तेदीपमुत्सृज्यविनि
घ्नंतितमोंजनैः॥विमूढाः^कर्मनिग्रहस्त्वेति॥तत्रचक्षुःश्रोत्रादिज्ञानेंद्रियाणि

^कर्तुमुद्युक्तायेहठाच्चेतसोजयं॥तेनिबध्नंतिनागेंद्रमुन्मत्तंबिसतंतुभिः॥निग्रहोद्विविधः

राम
६१

120

वाक्पाण्यादिकर्मेंद्रियाणि च। तत्तत्फलकोपरो भमात्रेण हठान्नियन्त्यंते नहृष्टांते
न मनोपि तथा निगृहीष्यामीति मूर्खस्य भ्रांतिर्भवति न तु न्निगृहीतेन फलक तुंशक्य॥
स्य हृदयकमलस्य निरोद्धुमशक्यत्वात् अतः क्रमनियह एव योग्यः क्रमनिय
हे बाधूर्नम् विद्यामार्गदर्पेन पूयाः सा च विद्या दृश्यमिथ्यात्वं दृग्वस्तुनः स्वप्र
कोशात्वं च बोधयति तथा च समस्ते तन्मनः स्वगोचरेषु दृश्येषु प्रयोजनाभावं प्रयो
जनवृत्ति दृग्वस्तुन्यगोचरत्वं बुध्वा निरिंधनाग्निवत् स्वयमेवोपशाम्यति। तथा च
सोऽर श्रूयते। यथा निरिंधनो वन्हिः स्वयोनावुपशाम्यति तथा वृत्तिक्षयाच्चित्तं स्व
योनावुपशाम्यति। योनिरात्मा॥ यस्तु बोधितमपि तिस्मारयति च। यस्तु वृषा
मदादिदुर्वासनयापिध्यमानो न सा धर्मनुवर्तितुमुत्सहते तस्य पूर्वोक्तविवेकेन
=पितत्वं न सम्यक् बुध्यते यश्च विस्मरति तयोरुभयोः साधुसमागम एवोपायः। साधवो हि पुनः पुनः बोध+२

जीव० ६२

वासनापरित्यागउपायः॥ वासनानां प्राबल्येन त्यक्तुमशक्यत्वे प्राणस्पंदनिरोध
नमुपायः॥ प्राणस्पंदवासनयोश्चित्तप्रेरकत्वात्। तयो निरोधे चित्तशांतिरुप
पद्यते। प्रेरकत्वं वसिष्ठ आह। द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः। एकं प्राण
परिस्पंदो द्वितीयं दृढवासना॥ सती सर्वगता संवित्प्राणस्पंदेन बोध्यते। संवेद
नादनंतानि ततो दुःखानि चेतसः। इति यथा भस्मच्छन्नमग्निं लोहकारा दृतिभ्यां ध
मंति तत्र चरत्स्फुटन्नवायुना सोऽग्निर्ज्वलति। तथा चित्तोपादानेन काष्ठस्थानीये
नाज्ञानेनावृता संवित्प्राणस्पंदेन बोध्यमाना चित्तवृत्तिरूपेण प्रज्वलति। तस्मा
च्चित्तवृत्तिनामकात्संवेदनाद्दुःखान्युत्पद्यंते सेयं प्राणस्पंदेन प्रेरिता चि
त्तोत्पत्तिः॥ अन्यां च स एव आह। भावसंवित्प्रकटितामनुभूतां च राघव चि

राम ६२

तस्योत्पत्तिमपरां वासनाजनितां शृणु। दृढाभ्यस्तपदार्थैकभावनादतिचंचलं। चित्तं
संजायते जन्मजरामरणकारणमिति। न केवलं प्राणवासनयोश्चित्तप्रेरकत्वं किंतु पर
स्परप्रेरकत्वमप्यस्तीत्याह द्वाविति। वासनावशतः प्राणस्पंदस्तेन च वासना। जय
दृक्ष ४ ते चित्तबीजस्य तेन बीजांकुरक्रमः इति। अनयोरन्यतरनाशेनोभयनाशमप्याह।
द्वे बीजे चित्तवृक्षस्य प्राणस्पंदनवासने। एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि न
श्यत इति। तयोर्नाशोपायं नाशफलं चाह। प्राणायामदृढाभ्यासैर्युक्त्या च गुरुद
त्तया। आसनाशनयोगेन प्राणस्पंदो निरुध्यते। असंगव्यवहारित्वाद्भवभावन
वर्जनात्। शरीरनाशदर्शित्वाद्वासना न प्रवर्तते। वासनासंपरित्यागाच्चित्तं गच्छ
त्यचित्तताम्। प्राणस्पंदनिरोधाच्च यथेच्छसि तथा कुरु। एतावन्मात्रकं मन्ये रूपं

जीव० ६३

विततस्य राघव । यस्माद्वनं वस्तु नो तद्वस्तु खेन रसेन च ॥ यदा न भाव्यते किंचिद्धेयोपादेयरू पा
पि यत् । स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते ॥ अवासनत्वात्सततं यदा न मनु
ते मनः । अमनस्ता तदोदेति परमोपशमप्रदेति । अमनस्तानुदये शांत्यभावमाह ॥ ५
चित्तयस्त दृढा कांतं न मित्राणि न बांधवाः । शक्नुवंति परित्रातुं गुरवो न च मानवा इ
ति । आसनाशनयोगेनेति यदुक्तं तत्रासनस्य लक्षणं उपायं फलं च त्रिभिः सूत्रैः
पूतंजलिः सूत्रयामास । स्थिरं सुखमासनं । प्रयत्नशैथिल्यानंतसमापत्तिभ्यां । त
घा तो द्वंद्वैर्नभिघात इति । पद्मकस्वस्तिकादिना यादृशेन देहस्थापनरूपेण यस्य पु
रुषस्यावयवकंपानुत्पत्तिलक्षणं सुखं देहचलनराहित्यलक्षणं स्थैर्यं च संप राम
द्यते तस्य तद्देहसुखमासनं तस्य च प्रयत्नशैथिल्यं लौकिक उपायः आनो ६३

अलौकिवश्च्वे ३

किंच स्वग मनयहकृत्यतीर्थयात्रास्नानयागहोमादिविषयोपः प्रयत्नैर्मान
सउत्साहस्तस्य शैथिल्यं कर्तव्यं॥ अन्यथा सउत्साहो बलादिहमुत्पाद्य प्रयत्नं क्वापि
प्रेरयति॥ फणासहस्रेणाधरणीं धारयित्वा स्थैर्येणावस्थितो योपमनंतंसमतावास्मी
ति ध्याने चित्तस्थाने तेसमापत्तिः॥ तयायथोक्तासनसंपादकमदृष्टं निष्पद्यते॥ सि
द्धे चासने शीतोष्णसुखदुःखमानापमानादिद्वंद्वैर्यथापूर्ववन्नाभिहन्यते॥ तथाविं
धस्य चासनस्य योग्यो देशः [illegible] रूपते॥ विविक्तदे
शे च सुखासनस्थः शुचिः समग्रीवशिरः शरीर इति॥ समेशुचौ शर्करवन्हिकवा
लुका विवर्जिते शब्दजलाश्रयादिभिः॥ मनोनुकूले न तु चक्षुःपीडके गुहानिवा
ताश्रयणे प्रयोजयेत्॥ सोयमासनयोगः॥ अशनयोगस्तु मिताहारत्वं अत्याहार

मनाहारं नित्यं योगी विवर्जयेदिति श्रुतेः भगवताप्युक्तं नात्यश्नतस्तु योगोऽस्ति न चैकां
तमनश्नतः नचातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥ युक्ताहारविहारस्य युक्तचे
ष्टस्य कर्मसु। युक्तस्वप्नावबोधस्य योगो भवति दुःखहेति॥ जितासनस्य प्राणायामेन
मनोनाशश्चेतोन्तरे राम्नायते॥ निरुद्धं तं स्थाप्य समं शरीरं हृदींद्रियाणि
मनसा संनिवेश्य। ब्रह्मोडुपेन प्रतरेद्धि विद्वान्स्रोतांसि सर्वाणि भयावहानि।
प्राणान्प्रपीड्येह स युक्तचेष्टः क्षीणे प्राणे नासिकयोः श्वसीत॥ तदुष्टाश्वयु
क्तमिव वाहमेनं विद्वान्मनो धारयेतोऽप्रमत्त इति॥ योगी द्विविधः॥ विद्याम
दाधास्तः सेपद्व हितस्तत्सहितश्चेति॥ तयोराद्यस्य बलध्यानेन मनसि नि
रुद्धे सति तन्नांतरीयकत्वात्प्राणो निरुध्यते तं प्रति त्रिरुद्धमिति मंत्रः प्रवृ
त्तः। प्राणपीडनप्रकारो वक्ष्यते॥ तेन च पीडनेन युक्तचेष्टो भवति॥ मनश्चेष्टा
+ द्वितीयस्याभ्यासेन प्राणे निरुद्धे तन्नांतरीयकतया मनो निरुध्यते तं प्रति प्राणान्पीड्येति मंत्रः प्रवृत्तः

विद्यामदादयो निरुध्यंते ॥ प्राणनिरोधेन चित्तदोषनिरोधे दृष्टांतोन्यत्रश्रूयते ॥ य
था पर्वतधातूनां दह्यंते धमतां मलाः ॥ तथेंद्रियकृता दोषा दह्यंते प्राणनिग्रहा
दिति ॥ अत्रोपपत्तिर्वसिष्ठेन दर्शिता ॥ यः प्राणपवनस्पंदश्चित्तस्पंदः स ए
व हि ॥ प्राणस्पंदक्षये यत्नः कर्त्तव्यो धीमतोच्चकैरिति ॥ मनोवाक्चक्षुरा
दींद्रियदेवताः स्वस्वव्यापारं निरंतरं करिष्याम इति व्रतं धृत्वा श्रमरूपेण
मृत्युना ग्रस्ताः स च मृत्युः प्राणं नाप्नोति ततो निरंतरमुच्छ्वासनिश्वासौ
कुर्वन्नप्ययं प्राणो न श्राम्यति तदा विचार्य देवताः प्राणरूपं प्राविशन् ॥
सोयमर्थो वाजसनेयिभिराम्नायते ॥ अयं वै नः श्रेष्ठो यः संचरंश्चासंच
रंश्च न व्यथते अथो रिष्यति हंतास्यैव सर्वे रूपं भवामेति त एतस्यैव सर्वे रू त
पमभवंस्तस्मादेत एतेनाख्यायंते प्राणा इति अत इंद्रियाणां प्राणरूप

जीव०

+ प्राणनिग्रहे मनोनिग्रह्यते॥ ननु सह स्पंदो न युक्तः सुषुप्तौ चेष्टमानेपि प्राणे मनसोऽचेष्टमानत्वात्॥ न

त्वं नाम प्राणाधीनचेष्टावत्त्वं तथां तर्यामिब्राह्मणे सूत्रात्मप्रस्तावे श्रूयते॥ वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंति तस्माद्वै गौतम पुरुषं प्रेतमाहुः॥ व्यस्रंसिषतास्यांगानीति हि गौतम सूत्रेण संदृब्धानि भवंतीति॥ अतः प्राणमनस्स्पंदनयोः सहभावित्वात्॥ न विलीनत्वेन तदानीं मनसः सत्त्वाभावात्॥ ननु क्षीणे प्राणे नासिकयोः श्वसितेतिव्याहतं॥ न हि क्षीणप्राणस्य मृतस्य श्वासंक्षेत्सरयामः॥ नापि श्वसतो जीवतः प्राणक्षयोस्ति मेवं॥ अनुत्क्रमणत्वस्य क्षयत्वेनात्र विवक्षितत्वात्॥ यथा खननछेदनादिषु व्याप्रियमाणस्य पर्वतमारोहतः शीघ्रं धावतो वा श्वासवेगो यावान्भवति न तावान् स्थितस्यासीनस्य निद्रितस्य वा श्वासो विद्यते॥ तथा प्राणायामपाटवोपेतस्येतरस्माद

६५

स्य श्वासो भवति ॥ एतदेवाभिप्रेत्य श्रूयते ॥ भस्त्रावत्तत्रायतप्राणः शनैरेव समुच्छ्वसे
दिति ॥ यथा दुष्टैरश्वैरुपेतो रथो मार्गं त्यक्त्वा यत्र क्वापि नीयते ॥ स च सारथिना
दृढमश्वरज्जुधृत्वाकृष्टः सुस्थमार्गे पुनर्धार्यते तथेंद्रियैर्वासनादिभिरितस्त
तो नीयमानं चित्तं प्राणरज्जौ दृढं धृत्वा यां धार्यते ॥ प्राणानप्रपीड्येति यदुक्तं ॥
तत्र प्राणपीडनप्रकारोन्यत्र श्रूयते ॥ सव्याहृतिं सप्रणवां गायत्रीं शिरसास
ह ॥ त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ प्राणायामास्त्रयः प्रोक्ता
रेचपूरककुंभकाः ॥ उत्क्षिप्य वायुमाकाशं शून्यं कृत्वा निरात्मकं ॥ शून्य
भावेन युंजीत रेचकस्येति लक्षणं ॥ वक्त्रेणोत्पलनालेन तोयमाकर्षयेन्न
रः ॥ एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणं ॥ श्वसेन्नैव तु निःश्वासो गात्रा
णि चैव न चालयेत् ॥ एवं तावन्नियुंजीत कुंभकस्येति लक्षणमिति ॥ अत्र

डीके॰

शरीरांतर्गतं वायुं बहिर्निःसार्योत्क्षिप्य शरीरमाकाशं शून्यं निरालम्बं वायुरहितं
कृत्वा स्वल्पमपि वायुमप्रवेश्य शून्यभावेनैव नियमेत् ॥ तदिदं रेचकं भ
वति ॥ कुंभको द्विविधः आंतरो बाह्यश्च तदुभयं च वसिष्ठ आह ॥ अपाने
स्तंभितः प्राणो यावन्नास्फुरितो हृदि ॥ तावत्सौ कुंभकावस्था योगिभिर्यानुभू
यते ॥ बहिरस्तंगते प्राणे यावन्नापान उद्गतः ॥ तावत्पूर्णसमावस्थां बहिस्थं
कुंभकं विदुरिति ॥ तन्नोच्छ्वास आंतरकुंभकविरोधी ॥ निःश्वासो बाह्यकुंभ
कविरोधी ॥ गात्रचालनं तूभयविरोधी ॥ तस्मिन्सति निःश्वासोच्छ्वासयो
रंतरस्यावश्यंभावित्वात् पतंजलिरपि आसनानंतरभाविनं प्राणायामं
सूत्रयामास तस्मिन्सति निःश्वासोच्छ्वासयोर्गतिविच्छेदः प्राणायामः ॥ ननु कुं
भकेण सभावेपि रेचकपूरकयोरुच्छ्वासनिःश्वासगती विद्येते इति चेन्नाधि

४
राम
६६

[illegible] इति [illegible] क मात्राभ्यासेन स्वभावमात्रसिद्धायाः
समप्राणगतेर्विच्छेदात् तमेवाभ्यासं सूत्रयति ॥ बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्या
भिः परिदृष्टो दीर्घसूक्ष्म इति । रेचको बाह्यवृत्तिः पूरक आंतरवृत्तिः कुंभकस्तंभवृत्तिः
तत्रैकैको देशादिभिः परीक्षितो यः । तद्यथा स्वभावसिद्धे रेचके हृदयान्निर्गसनासाग्र
संमुखे द्वादशांगुलपर्यंते श्वासः समाप्यते अभ्यासेन तु क्रमेण नाभेराधारात् वावा
पु निर्गच्छति ॥ चतुर्विंशत्यंगुलपर्यंते षट्त्रिंशदंगुलपर्यंते वा समाप्तिः ॥ अत्र रेचकेप्र
यत्नातिशये सति नाभ्यादिप्रदेशक्षोभेण तन्निश्वतुंशकं ॥ बहिश्च सूक्ष्मं तूलं धृत्वा
तच्चालनेन निश्वतयं सेयं देशपरीक्षा रेचककाले प्राणवस्यावृत्तयो दशविंशतित्रिं
शदित्यादिकालं परीक्ष्य अस्मिन्मासे प्रतिदिनं दश रेचका आगामिमासे विंशति उत्त

सु २

जीवः रमासे त्रिंशद्दिसादि कालपरीक्षाभिः संख्यापरीक्षा यथोक्तदेशकालविशिष्टाः प्राणाया
मा एकस्मिन् दिने दशविंशति त्रिंशद्दिसादिभि[illegible]ख्यापरीक्षापूरकेष्वेवं योजनी
व्याप्ति यं "यद्यपि कुंभके देशविशेषो नावगम्यते" तथापि कालसंख्याव्याप्तिरवगम्यत एवं य
था घनीभूत तूललापिंडः प्रसार्यमाणो दीर्घो विरलतया सूक्ष्मश्च भवति" तथा प्राणो
पि देशकालसंख्याधिको नाभ्यस्यमानो दीर्घो दुर्लक्ष्य[illegible]सूक्ष्मश्च संपद्यते" रेचकादि
भ्यः त्रिभ्यो न्यं प्रकारं सूचयति" बाह्याभ्यंतर[illegible]विषया[illegible]क्षेपि चतुर्थ इति" यथाशक्ति स
र्वे वायुं विरेच्यानंतरं क्रियमाणो बहिः कुंभको यथाशक्ति वायुमापूर्यानंतरं क्रिय
माणो तः कुंभक इति रेचकपूरकाव नादृत्स केवलं कुंभकोभ्यस्यमानः पूर्वत्रयापे
क्षया चतुर्थो भवति निद्रातंद्रादि प्रबलदोषप्रयुक्तानां रेचकादित्रयं तद्दोषरहितानां

६७

क्षयेसति २

चतुर्थ इति विवेकः॥ प्राणायामफलं सूचयति ततः क्षीयते प्रकाशावरणमिति॥ प्र
काशस्य सत्वस्यावरणं तमोनिद्रालस्यादिहेतुः तस्य क्षयो भवति॥ फलांतरं सूचय
ति॥ धारणासु योग्यता मनस इति॥ आधारनाभिचक्रहृदयभ्रूमध्यब्रह्मरंध्रादि
देशविशेषे विलक्षणचित्तस्य स्थापनं धारणा। देशबंधश्चित्तस्य धारणेति सूत्रणा
त्॥ स्मृतिश्च मनः संकल्पकं ध्याता संक्षिप्यात्मनि बुद्धिमान्॥ धारयित्वा तथात्मा
नं धारणा परिकीर्तितेति॥ प्राणायामेन रजोगुणकारिता चांचल्यात्तमोगुणका
रितालस्यादेश्च निवारितं मनः तस्य धारणायां योग्यं भवति॥ प्राणायामदृढा
भ्यासे युक्त्या च गुरुदत्तया इत्यत्र तेन युक्तिशब्देन योगीजनप्रसिद्धं शिरोरूपप
रिमेरुचालनं जिह्वायेणांटिकाभ्रमणं नाभिचक्रे हृदये ज्योतिर्ध्यानं विस्मृति

प्रकरणं तृतीयं समाप्तं॥ २

जीव

प्रदोषघर्षसेवा चेत्सेवमादिकं द्रष्टं तद्देवं अध्यात्मविद्यासाधकसंगमवासनाक्षयप्राण
निरोधाश्चित्तनाशोपायदर्शिताः॥ अथ तदुपायभूतं समाधिं वक्ष्यामः॥ पंचभूमू
पेतस्य चित्तस्य भूमित्रयत्यागेनावशिष्टं भूमिद्वयं समाधिः॥ भूमयश्च योगभा
ष्यकृता दर्शिताः॥ क्षिप्तं मूढं विक्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूम
य इति॥ आसुरसंपद्घोरकामक्रोधादिवासनासु वर्त्तमानं चित्तं क्षिप्तं॥ निद्रातंद्रादि
ग्रस्तं मूढं॥ कदाचित् ध्यानयुक्तं क्षिप्ताद्विशिष्टतया विक्षिप्तं॥ तत्र क्षिप्तमूढयोः स
माधिशंकैव नास्ति॥ विक्षिप्ते तु चेतसि विक्षेपोपसर्ज्जनीभूतसमाधिर्योगपक्षे
न वर्त्तते॥ विक्षेपवर्गांतर्गततया दहनांतर्गततया बीजवत् सद्य एव विनश्या
ति॥ यस्त्वेकाग्रे चेतसि सद्भूतमर्थं द्योतयति क्षिणोति च क्लेशान् कर्मबंधनानि

प्र॰

६८

तत्र संप्रज्ञातसमाधि २

त्वथ यतिनिरोधमभिमुखीकरोति स संप्रज्ञातयोग इत्याख्यायते॥ सर्ववृत्तिनि
रोधे तु असंप्रज्ञातसमाधिः॥ भूमिमेकाग्रतां सूत्रयति॥ शांतोदितौ तुल्यप्रत्ययौ चि
त्तस्यैकाग्रतापरिणाम इति॥ शांतोऽतीतः उदितो वर्त्तमानः प्रत्ययः चित्तवृत्तिः अतीत
प्रत्ययोयं परार्थश्च ह्लातितमेव चेदुदितो गृह्लीयान्तरा तावुभौ तुल्यौ भवतस्तदा द
त्रा चित्तस्य परिणाम एकाग्रतेत्युच्यते॥ एकाग्रताभिवृद्धिलक्षणं समाधिं सूत्र
यति॥ सर्वार्थितैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणाम इति रजोगुणे
न चाल्यमानं चित्तं क्रमेण सर्वान्पदार्थान् ह्लाति तस्य रजोगुणस्य निरोधाय
क्रियमाणेन योगिनां प्रयत्नविशेषेण दिने दिने सर्वार्थता क्षीयते॥ एकाग्रता चो
देति तादृशचित्तस्य परिणामः स समाधिरित्युच्यते॥ तस्य समाधेरष्टांगेषु यम

म

जीवः नियमासनप्राणायामप्रत्याहाराः पंचबहिरंगानि॥ तत्र यमान्सूत्रयति॥ अहिंसा
सत्यास्तेयब्रह्मचर्यापरिग्रहा यमा इति॥ हिंसादिभ्यो निषिद्धधर्मेभ्यो योगिनं यंनि मयंति२
वर्त्तयंतीति यमाः॥ नियमान्सूत्रयति॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि
नियमा इति॥ जन्महेतोः काम्यधर्मान्निवर्त्य मोक्षहेतौ निष्कामधर्मे नियमयंति प्रे
रयंतीति नियमाः॥ यमनियमयोरनुष्ठाने वैलक्षण्यं स्मर्यते॥ यमान्कुर्वीत सततं
न कुर्यान्नियमान्बुधः॥ यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन्। पततीति नि ६१
यमवान्यमेष्वसक्तो ननु यमवान्नियमालसो वसीदेत् इति यमनियमौ समीक्ष्य
मिति२ बुद्ध्या यमबहुलेष्वनुसंदधीत बुद्धिं॥ अहिंसाप्रतिष्ठायां यमनियमफलानि सूत्रयति
तत्सन्निधौ वैरत्यागः॥ क्रियाफलाश्रयित्वं रत्नोपस्थानं वीर्यलाभः जन्मकथंतासं
सर्व

ठोर्थः शौचात्स्वांगजुगुप्सापरैरसंसर्गः सत्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्म
दर्शनयोग्यत्वानि भवंति। संतोषादनुत्तमः सुखलाभः कायेंद्रियजयबुद्धि शुद्धि
पापक्षयात्तपसः स्वाध्यायादिष्टदेवतासंप्रयोगः समाधिसिद्धिरीश्वरप्रणिध
नादिति आसनप्राणायामौ व्याख्यातौ प्रत्याहारं सूत्रयति स्वविषयासंप्रयोगे स्व ४
चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहार इति शब्दस्पर्शरूपरसगंधादिविषया
स्तेभ्यो निवर्त्तिताः श्रोत्रादयः चित्तस्वरूपमनुकुर्वंतीव भवंति तिष्ठंते श्रुतिश्च भ
वति शब्दादिविषयान्पंचमनश्चैवातिचंचलं चिंतयेदात्मनो रश्मीन् प्रत्याहारः स
उच्यत इति शब्दादयो विषया येषां श्रोत्रादीनां ते श्रोत्रादयः पंचमनः षष्ठं नामैषाम ते २
नात्मरूपेभ्यः शब्दादिभ्यो निवर्त्तनमात्मरश्मिलेन चिंतनं प्रत्याहारः स इत्यर्थः प्रत्याहा

व॰ नतीर

जीवः स्फुटं स्वत्रयतीति ततः परमावश्यतेंद्रियाणामिति। धारणाध्यानसमाधीन्सूत्रैस्त्रिभिः सू-
त्रयति देशबंधश्चित्तस्य धारणा तत्र प्रत्ययैकतानता ध्यानं तदेवार्थमात्रनिर्भासं स्वरू-
पशून्यमिव समाधिः आधारादिदेशाः पूर्वमुक्ताः। देशांतरं श्रूयते मनःसंकल्पकं ध्या-
त्वा संक्षिप्यात्मनि बुद्धिमान् धारयित्वा तथात्मानं धारणा परिकीर्तितेति यत्सर्व-
वस्तुसंकल्पकं मनः तदात्मानमेव संकल्पयतु न त्वन्यदित्येवंविधः प्रयत्नः आत्मनि
संक्षेपः प्रत्ययस्यैकतानता तत्वैकविषयप्रवाहः स च द्विविधः विच्छिद्य विच्छिद्य जा-
यमानः संततश्चेति तावुभौ क्रमेण ध्यानसमाधी भवतः तदुभयं सर्वानुभावयो-
गिनादर्शितं चित्तैकाग्र्याद्यतो ज्ञानमुक्तं समुपजायते तत्साधकमतो ध्यानं यथा-
वदुपदिश्यते। विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात् परिशिष्टं च सन्मा-

७०

मकोन मास्ति कश्चिद्विषयः स्वभावतः ॥ पुरस्ति... त्योर्ध्वमधश्च सर्वतः संपूर्णभूमा त्वज आत्मनिस्थितः ॥ अजो मर
श्चैव तथाक्षरो मृतः स्वयंप्रभः सर्वगतो ह्यमद्वयः ॥ न कारणं कार्यमतीव निर्मलः सदैव तृप्तश्च ततो विमुक्त ॐ इति ॥ × २

त्रं चिदानंदं विचिंतयेदिति ॥ ब्रह्माकारमनोवृत्तिप्रवाहोहंकृतिं विना ॥ संप्रज्ञात
समाधिः स्यात् ध्यानाभ्यासप्रकर्षत इति ॥ ननु संप्रज्ञातसमाधिरंगी स कथं ध्या
नेनांतरभाविनो ष्टमांगस्य समाधेः स्थाने उदाह्रीयते ॥ नायं दोषः ॥ अत्यंतभेदाभावा
त् ॥ यथा वेदमधीयमानो माणवकः पदेपदे स्खलन् पुनः पुनः समादधाति ॥ अ
धीतवेदः सावधानो न स्खलति ॥ अध्यापको निरवधानः स्वछंदं कुर्वन्नपि न स्खल
ति ॥ तथा विषयैक्येपि परिपाकतारतम्येन ध्यानसमाधिसंप्रज्ञाता नामवांतरभे
दो बोद्धव्यः ॥ धारणादित्रयं मनोविषयत्वात्संप्रज्ञातेंतरंगं ॥ यमादिपंचकं बहिरंगं ॥ त
दुक्तं ॥ त्रयमंतरंगं पूर्वेभ्य इति ॥ ततः केनापि पुण्येनांतरंगे प्रथमं लब्धे ब
हिरंगलाभाय नातिप्रयासः कर्तव्यः ॥ यद्यपि पतंजलिना भौतिकभूततन्मात्रेंद्रियाहं

रं२

सति२

ति२

139

जीव

काराद्दिविषयाः संप्रज्ञातसविकल्पसमाधयः बहुधा प्रपंचिताः॥ तथापि तेषामंतरा
नादिसिद्धिहेतुतया मुक्तिहेतुसमाधिविरोधित्वान्नास्माभिस्तत्रादरः क्रियते तथा
च सूत्रितं ते समाधावुपसर्गा व्युत्थाने सिद्धय इति॥ स्थान्युपमंत्रणे संगस्मयाकरणं
पुनरनिष्टप्रसंगादिति च॥ स्थानिनो देवाः उद्दालको देवैरामंत्रितोप्यविज्ञाय देवान्नि
र्विकल्पसमाधिमेव चकारेति उपाख्यायते॥ प्रश्नोत्तराभ्यामप्येवावगम्यते॥ श्रीरा
मः जीवन्मुक्तशरीराणां कथमात्मविदां वर॥ शक्तयो नेह दृश्यंते आकाशगमनादि
काः॥ वसिष्ठः अनात्मविदमुक्तोपि हि सिद्धिजातानि वांछति। द्रव्यमंत्रक्रियाकालयु
क्त्याप्नोत्येव राघव॥ नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्ममात्रदृक्। आत्मनात्मनि
संतृप्तो नाविद्यामनुधावति। ये केचन जगद्भावास्तानविद्यामयान्विदुः कथं तेषु

(७१

र्निः स्वात्मतत्त्वस्य ज्ञाविर्यो निमज्जति। ध्रुवमंतर्ज्ञक्रियाकालतरा स्वरूपः साधुसिद्धिदः
परमात्मपदप्राप्तो नोपकुर्वंति काश्चन। सर्वेच्छाजालसंशांता वात्मलाभोदयो
हि यः। स्वरूपसिद्धिवांछा या मग्नचित्तेन लभ्यत इति। न केचन जगद्भावास्तत्व
ज्ञं रंजयंत्यमी॥ नागरं नागरीकांतं कुग्रामललना इव। अपि शीतरुचावर्के सुती
क्ष्णोपीदुमंडले। अप्यधः प्रसरत्यग्नौ जीवन्मुक्तो न विस्मयी॥ चिदात्मन इमा इत्थं
प्रस्फुरंतीह शक्तयः। इत्यस्याश्चर्यजालेषु नाभ्युदेति कुतूहलमिति च। आत्म
विषयस्त्वसंप्रज्ञातसमाधिर्वासनाक्षयस्य निरोधसमाधेश्च हेतुः तस्मात्तत्रा
दरः कृतः। अथ पंचमभूमिरूपो निरोधसमाधिर्निरूप्यते। तं च निरोधं स्तू(?)चयति।
व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधप

जीवः

रिणामइति। व्युत्थानसंस्काराः समाधिविरोधिनस्तेच चतुष्टालकस्य समाधौ उद्दा
हृताः। कदाहमुन्मनने पदे परमपावने। चिरं विश्रान्तिमेष्यामि मेरुशृंग इवाम्बुद इति
चिंतापरवशोवलादुद्दालकोद्विजः। पुनः पुनस्तु पवित्रपथ्यानाभ्यासं चकार हठे विषयेभ्यो नी
यमानेनतु चित्तमर्कटं चलं। न स लेभे समाधाने प्रतिष्ठां प्रीतिदायिनीं कदाचिद्वाह्यसं
स्पर्शपरित्यागादनंतरं। तस्यागच्छच्चित्तकपिरान्तरस्पर्शसंचयान्। कदाचिदान्तरस्पर्शा
द्वाह्यं विषयमाददे। तस्योड्डीयमनो याति कदाचित्रस्तपक्षिवत्। कदाचिदुदितार्काभं तेजः
पश्यतिविस्तृतं। कदाचित्केवलं व्योमं कदाचिन्निबिडं तमः। आगच्छतो यथाकामं प्रतिभासा
न्पुनः पुनः। आच्छिदन्मनसा शूरः खड्गेनेव रणे रिपून्। विकल्पौघे समालीने सोपश्यद्
हृदयाम्बरे। तमस्तन्नाविवेकार्कलोलकज्जलमेचकं। तमो व्युत्थीरयामास सम्यग्ज्ञानवि

७२

वस्थता॥ तम स्युपरते स्वांते तेजःपुंजं ददर्श सः॥ तद्वल्लुलावस्यला ज्ञानो वनं वालह्व द्विपः
तेजः स्युपरते तस्य घूर्णमानं मनो मुनेः॥ निश्चालुव दगान्निद्रा तामप्याप लुलावसः॥ नि
द्राव्यपगमे तस्य व्योम संवित्समुद्ययौ॥ व्योमसंविदि नष्टायां महत्तस्याभवन्मनः॥ मोह
मप्येष मनसस्तं ममार्ज महाशयः॥ ततस्तेजस्तमोनिद्रा मोहादिपरिवर्जितां॥ कामप्य
वस्थामासाद्य विशश्राम मनः क्षणमिति॥ ता एते व्युत्थानसंस्कारा निरोधहेतुना योगि
दिनं प्रति प्रयत्नेन प्रतिक्षणं चाभिभूयंते तद्विरोधिनश्च निरोधसंस्काराः प्रादुर्भवंति तथा स
ति निरोधरूपैकस्मिन् क्षणे चित्तमनुगच्छति सोयमीदृशश्चित्तस्य निरोधपरिणामो
भवति॥ ननु प्रतिक्षणपरिणामिनो हि भावाः ऋते चितिशक्तेरिति न्यायेन चित्तस्य सर्व
दापरिणामप्रवाहो वक्तव्यः बाढं॥ तत्र व्युत्थितचित्तस्य वृत्तिप्रवाहः स्फुटः निरुद्धचित्तस्य चि

जीव ति

तुरूपमिसाग्रां क्रोन्तरं सत्त्वयति। ततः प्रशांतवाहिता संस्कारादिति। यथा समिदाज्या
हुंप्रक्षेपे वह्निस्तत्क्षणोत्तरत्वधा प्रज्वलति समिदादिक्षये प्रथमक्षणे किंचिच्छाम्यति।
उत्तरोत्तरक्षणेषु शांतिर्वर्द्धते। तथा निरुद्धचित्तस्योत्तरोत्तराधिकः प्रशमः वहति तत्र
पूर्वप्रशमजनित संस्कार एवोत्तरप्रशमस्य कारणं। तामेतां प्रशांतिवाहितां भगवा
न्विस्पष्टमुदाजहार। यदा विनियतं चित्तमात्मन्येवावतिष्ठते। निस्पृहः सर्वकामेभ्यो
युक्त इत्युच्यते तदा। यथा दीपो निवातस्थो नेंगते सोपमा स्मृता। योगिनो यतचित्त
स्य युंजतो योगमात्मनः। यत्रोपरमते चित्तं निरुद्धं योगसेवया। यत्र चैवात्मनात्मानं
पश्यन्नात्मनि तुष्यति। सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं। वेत्ति यत्र न चैवायं
स्थितश्चलति तत्त्वतः। यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। यस्मिन्स्थितो न दुःखेन गु

तरोत्त

(७३)

९९।२

रणापि विद्यात्यते। तं विद्यात् दुःखसंयोगवियोगं संज्ञितं। स निश्चयेन योक्तव्यो योगो नि
र्विण्णचेतसेति। निरोधसमाधेः साधनं सूचयति। विरामप्रत्ययाभ्यासपूर्वकः संस्कारशेषो
ऽन्य इति। विरामो वस्तुपरमस्तस्य प्रत्ययः कारणं वस्तुपरमार्थः पुरुषप्रयत्नः तस्याभ्यासः
पौनःपुण्येन संपादनं तत्पूर्वकस्तज्जन्यः अनंतरातीतसूत्रे संप्रज्ञातसमाधेरुक्तत्वा
त् तदपेक्षयान्योऽसंप्रज्ञातसमाधिः तत्र वृत्तिरहितचित्तस्य दुर्लक्ष्यत्वात्संस्काररूपे
ण चित्तं शिष्यते। विरामप्रत्ययजन्यत्वं भगवान्विस्पष्टमाह। संकल्पप्रभवान्का
मांस्त्यक्त्वा सर्वानशेषतः। मनसैवेंद्रियग्रामं विनियम्य समंततः। शनैः शनैरुपर
मेद्बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत्। यतो यतो
निश्चरति मनश्चंचलमस्थिरं। ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् इति का

अपि २

जीवः म्यमाणाः स्रक्चंदनवनितापुत्रमित्रगृहक्षेत्रादयो मोक्षशास्त्रकुशलविवेकिजन
प्रसिद्धैर्बहुभिर्दोषैरुपेतोऽस्मानाद्यविद्यापातान्दोषानाच्छादयते षु सम्यक्त्वं कल्प
यंति तस्मात्संकल्पादिदं मे स्यादिदं मे स्यादित्येवं रूपाः कामाः प्रभवंति। तथा
च स्मर्यते संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः। काम जानामि ते मूलं सं
कल्पात्किल जायसे। न त्वां संकल्पयिष्यामि समूलो विनं क्ष्यसि इति। तत्र वि
वेके न विषयदोषेषु साक्षात्कृतेषु श्वुनावांतपायसइव कामास्तस्य अंते स्रक्चंद
नवनितादिविषये दोषेष्विव ब्रह्मलोकादिष्वणिमाद्यैश्वर्येषु च कामास्त्याज्या
इत्यभिप्रेत्य सर्वानित्युक्तं। मासोपवासव्रतिनां तस्मिन्मासे अन्नेत्युक्तेऽपि कामः
पुनः पुनरुदेति। तद्वन्माभूदित्यशेषत इत्युक्तं। कामत्यागमनः पूर्वकप्रवृत्यभा

विषये २

(७४

स्व ५

वेपि चक्षुरादीनां रूपादिग्रहणस्वभावात्तिस्ताया प्रवृत्तिः सापि प्रयत्नयुक्तेन म
नसैकनियंतव्या दैवतादर्शनादिष्वपि अननुसरणायसमं ततइत्युक्तं। भूमिकाज
यक्रमेणोपरमं विवक्षितं शनैः शनैरित्युक्तं। ता अत्र भूमिकाश्चतस्रः कृतवल्लीषु अयं
ता यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति तद्यच्छेच्छांत
आत्मनि इति वाग्व्यापारो द्विविधः लौकिको वैदिकश्च तत्र लौकिकस्य बहुविक्षेपक
त्वात् व्युत्थानकालेपि योगी तं परित्यजेत्। अत एव स्मर्यते मौनं योगासनं योगः
स्तितिक्षैकांतशीलता। निःस्पृहत्वं समत्वं च सप्तैतान्येकदंडिन इति वैदिकं जपादि
कं च निरोधसमाधौ परित्यजेत् सेयं वाग्भूमिः प्रथमा तां भूमिं प्रयत्नमात्रेण कतिप
यैर्दिनैर्मासैर्वत्सरैर्वा दृढं विजित्य पश्चात् द्वितीयां मनोभूमौ यतेत अन्यथा व

* लौकिको जल्पादिरूपः॥ वैदिको जपादिरूपः ५

Margin notes: नियच्छे ; दंडी ; ग्र

२

क रव

जीवः रुभूमिं प्राप्तः सोत्सृष्य मभूमिकापातेनैवोपरितनयोगभूमयो विनश्येयुः। यद्य
पि चक्षुरादयो निरोद्धुं व्याप्तास्तथापि तेषां वाग्भूमौ मनोभूमौ वांतर्भावो दृष्टव्यः। न
नु वाचं मनसि नियच्छेदित्यनुपपन्नं न हीन्द्रियस्येन्द्रियांतरे प्रवेशोऽस्ति मैवं प्रवेशा
स्याविवक्षितत्वात्। नानाविक्षेपकारिणोर्वाङ्मनसयोर्मध्ये प्रथमतो वाग्व्यापार
नियमे [illegible]नमनोव्यापारमात्रपरिशेषश्चेह विवक्षितः गोमहिषाश्वादीनामिव
वाङ्नियमे स्वाभाविके संपन्ने ततो ज्ञाने नात्मनि मनो नियच्छेत्। आत्मा त्रिविधः।
ज्ञानात्मा महानात्मा शांतात्मा चेति। ज्ञानात्मन्यत्र स्थित आत्मेति ज्ञातृत्वोपाधिरहं
कारो ज्ञानशब्देन विवक्षितः करणस्य मनसो नियम्यत्वेन पृथगुपात्तत्वात्।
अहंकारो द्विविधः विशेषरूपः सामान्यरूपश्चेति। अयमहमेतस्य पुत्र इत्येवंव्य

७५

क्तिमभिमन्यमानो विशेषरूपः अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः।
स च सर्वव्यक्तिषु व्याप्तत्वात् महानित्युच्यते ताभ्यामहंकाराभ्यां द्वाभ्यामुपहितौ
द्वावात्मानौ। निरुपाधिकः शांतात्मा तदेतत्सर्वमुत्तरं बहिर्भावेन वर्त्तते शांते आ
त्मा सर्वांतरः श्रिवदेक्रूरसस्तस्मिन्नाश्रितजडशक्तिरूपमव्यक्तं मूलप्रकृतिः सा
च प्रथमं सामान्याहंकाररूपं महत्तत्त्वं नाम धृत्वा व्यक्ता भवति। ततो बहिर्विशेषा
हंकाररूपेण ततो बहिर्मनोरूपेण ततो बहिर्वागादींद्रियरूपेण तदेतदभिप्रेत्यो
त्तरोत्तरमांतरत्वं विविनक्ति श्रुतिः इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनस
स्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः इति। एवं
सत्यत्र नानाविधसंकल्पविकल्पसाधनकरणरूपं मनो हं कर्त्तेरिनियच्छेत् मनो

पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः २

जीवः

व्यापारान्परित्यज्याहंकारमात्रं शोषयेत् न चैतदशक्यमिति वाच्यं तस्याहं निग्रहं
मन्ये वायुरिव सुदुष्करमिति वदंतमर्जुनं प्रति भगवतोत्तराभिधानात् असंशयं
दु यं महाबाहो मनो निग्रहं चलं। अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते। असंयता
त्मना योगो दुष्प्राप इति मे मतिः। वश्यात्मना तु यतता शक्योऽवाप्तुमुपायत इति। अ
व ५ भ्यासवैराग्ययुक्तं जलिस्वत्रोदाहरणे नैव्याख्यास्यते। पूर्वपूर्वभूमिदार्ढ्यरहितो संप्र (५६)
तात्मातत्साहितो वश्यात्मा उपायतः प्राप्नुं गौडपादाचार्याः सदृष्टांतमाहुः उत्सेक
उदधेर्यद्वत्कुशाग्रेणैकबिंदुना। मनसो निग्रहस्तद्वद्भवेदपरिखेदत इति। अ
त्र संप्रदायविद आख्यायिकामाचक्षते। कस्यचित्किल पक्षिणोंडानि तीरस्था २२
न्युदधिरूर्मिवेगेनापजहार। तं च समुद्रं शोषयामीति प्रवृत्तः स च पक्षी स्व

मुखाग्रेणैकैकं जलबिंदुं बहिः प्रतिक्षिपति तदा बहुभिः पक्षिभिर्बंधुवर्गैर्वार्य
माणोप्यनुपरतः प्रसुततानपि सहकारिणो वव्रे। ततोऽपतनोत्पतनाभ्यां वकुध्य
क्लिन्नपतः सर्वान् वलोक्य कृपालुर्नारदो गरुडं समीपे प्रेषयामास। ततो गरुड
पक्षवातेन शुष्यत्समुद्रो भीतस्तान्यंडान्यानीय पक्षिणे ददौ। एवमखेदेन मनो
निरोधे परमधर्मे प्रवृत्तमानं योगिनमीश्वरोऽनुगृह्णातीति। अखेदश्रम मध्ये मध्ये
तदनुकूलव्यापारांतरमिश्रणेन संपद्यते यथोदनं भुंजानस्य ग्रासांतरे चोष्यलेह्या
दिनास्वादयति तद्वदिदमेवाभिप्रेत्य वसिष्ठ आह। चितस्य भोगौ द्वौ भागौ शास्त्रेणै
कं प्रपूरयेत्। गुरुशुश्रूषया भागमव्युत्पन्नस्य संक्रमः। किंचिद्व्युत्पत्तियुक्तस्य भागं
भोगेन पूरयेत्। गुरुशुश्रूषया भागौ भागं शास्त्रार्थचिंतया। व्युत्पत्तिमनुयातस्य

११

जीवः

प्रत्ययेन्चेत सोऽन्वहं द्वौ भागौ शास्त्रवैराग्ये द्वौ ध्यान गुरुपूजयेति। भोगत्राष्टेनाऽऽञ्जी
वनहेतु भिक्षाव्यापारो वर्णाश्रमोचित व्यापारश्चोच्यते। घटीमात्रं मुहूर्त्तमात्रं वाय
थाशक्ति योगमभ्यसेत्ततो मुहूर्त्तं शास्त्रश्रवणेन पं[illegible]ख्ययावा गुरुमुपगम्य मुहू
र्त्तं स्वदेहमनुसत्य मुहूर्त्तं योगशास्त्रपर्यालोच्य पुनर्मुहूर्त्तं योगमभ्यसेत। एवं
योगप्राधान्येन व्यापारान्तराणि मेलयंस्तानि द्रागभ्यस्य शयनकाले तद्दिनगतान्
योगमुहूर्त्तान् गणयेत्। ततः परेद्युर्वा परपक्षे वा परमासे वा योगमुहूर्त्तान् वर्द्धयेत्।
तथा चैकस्मिन्मुहूर्त्ते एकैकक्षण योगेऽपि संवत्सरमात्रेण भूयान् योगकालो भव
ति। न चैवं योगैककारणत्वे व्यापारान्तराणि लुप्येरन्निति शंकनीयं। लुप्तेतरसकल
व्यापारस्यैव योगाधिकारात्। अत एव विद्वत्संन्यासोऽपेक्ष्यते। तस्मात्तदेकनिष्ठः पुमा

कैः३

का
रि२
(१७)

नध्येतव्यानि गादिवत् क्रमेण योगारूढो भवति। यथा ध्येता माणवकः पादं श्लोकं

पादमर्द्धर्चम् ऋचमृग्वर्यं वर्गं क्रमेण पठन् दशाक्षाद् दशवर्षैरध्यापको भवति। यथा

च वाणिज्यं कुर्वन् माणवक निष्कु [illegible] निष्कादिक्रमेण लक्षपतिः कोटिपतिर्वा भवति। त

था चैवणिगध्येतृन्यासरैवोपक्रममात्मनि प्रयत्नश्च युञ्जानस्तावता कालेन

कृतो न योगमारोहेत। तस्मात्पुनः पुनः प्राप्यमाणीं संकल्पविकल्पानुवृत्तिलक्षण

तां रूपपत्नेनपरित्यज्याहंकर्तेरिज्ञानात्मनि मनो नियच्छेत् तामप्तां च्युती यथा भू

मिकां विजितबालमुग्धादिवन्निर्मनस्कत्वे स्वाभाविके सति ततो विशेषाहंका

रं रूपं विस्पष्टं ज्ञानात्मानमस्पष्टे सामान्याहंकारे महतत्त्वे नियच्छेत्। यथा स्वल्पा

तन्द्रां प्राप्नवतोऽपि विशेषाहंकारः स्वत एव संकुचति। विनैव तन्द्रां तथापि विस्मरणोऽप्र

जीवः

यतमानस्याहंकारसंकोचो भवति। सेयं लोकप्रसिद्धया तंद्रा तार्किकाभिमतनिर्विकल्पसंज्ञा
नेन च समानो महत्तत्वमात्रपरिशेषावस्था। ततो याभूमीः अस्याश्चाभ्यासपाटवेन वशी
कृतायां तिमेनं सामान्याहंकाररूपमहंतिमात्मानं निरुपाधितया शांते चिदैकरसस्वभा
वे नियच्छेत् तं महत्तत्वं तिरस्कृत्य चिन्मात्रं परिशेषातं "अत्रापि पूर्वोक्तविस्मृतिप्रयत्न
ावततोऽप्यतिशये नोपायतामापद्यते" यथा शास्त्राभ्यासे प्रवृत्तस्य व्युत्पत्तेः प्राक्प्रति
ग्रंथव्याख्यानापेक्षायामपि व्युत्पन्नस्य स्वत एवोत्तरग्रंथार्थः प्रतिभाति तथा सम्य
ग्वशीकृतपूर्वभूमेर्योगिनः उत्तरभूम्युपायः स्वत एव प्रतिभाति" तदाह योगभाष्य
कारः। योगेन योगो ज्ञातव्यो योगो योगात्प्रवर्तते। यो ऽप्रमत्तस्तु योगेन स योगी रम
ते चिरमिति। ननु महत्तत्वशांतात्मनोर्मध्ये महत्तत्त्वलोपादनमव्यक्ताख्यं तत्वं कस्मादा

ये०

७८

नि॰ २

हतं तत्त्वकुतो नियमने नाभिधीयते इति चेन्न। लयप्रसंगादिति ब्रूमः॥ यथा घटोनुपा
दाने जले क्षिप्यमानो न लीयते उपादानभूतायां तु मृदि लीयते॥ तथा महतत्त्वमात्म
नि न लीयते अव्यक्ते लीयते। न च स्वरूपलयः पुरुषार्थः॥ आत्मदर्शनानुपयोगि
त्वात् दृश्यते त्वग्रयया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति पूर्ववाक्ये आत्मदर्शनोपयोगि
धायसूक्ष्मत्वसिद्ध्ये निरोधस्याभिधानात्। लयस्य प्रतिदिनं सुषुप्तौ स्वतःसिद्धत्वे
न प्रयत्नवैयर्थ्याच्च। न नु धारणाध्यानसमाधिसाध्यस्य संप्रज्ञातस्यैकाग्रवृत्ति
रूपत्वेन दर्शनहेतुत्वेपि दर्शनात्मन्यवरुद्धस्यासंप्रज्ञातसमाधिमापन्नस्य चि
त्तस्य वृत्तिरहितत्वेन सुषुप्तवन्न दर्शनहेतुत्वमिति चेन्न। स्वतःसिद्धस्य दर्शन
स्यानिवारयितुमशक्यत्वात्। अतः श्रेयोमार्गोभिहितः॥ आत्मानात्माकारं स्वभा

तु

सा।

म

जीवः वतो न स्थितं स सदा चितं। आत्मैकाकारतया तिरस्कृतानात्मदृष्टिं विदधीतेति। यथा
घट उत्पद्यमानः स्वतो वियत्पूर्ण एवोत्पद्यते जलतंडुलादिपूर्णता तूत्पन्ने घटे पश्चात्
रूपप्रयत्नेन भवति। यथा तत्र जलादीनि निःसारितेपि न वियन्निःसारयितुं शक्यते॥
मुखपिधानेप्यंतर्वियदवतिष्ठत एव तथा चित्तमुत्पद्यमानमात्मचैतन्यपूर्ण ए ७०
वोत्पद्यते उत्पन्ने चित्ते पश्चान्मूषानिषिक्तद्रुतताम्रवत् घटपटरूपरससुखदुः
धर्मा खादिवृत्तिरूपत्वं भोगहेतुधर्मादिवशाद्भवति। तत्र रूपरसाद्यनात्माकारनि
वारितेपि निर्निमित्तश्चिदाकारो न निवारयितुं शक्यते। ततो निरोधसमाधिना
ऽवृत्तिकेन संस्कारमात्रशेषतया सूक्ष्मत्वेन चिदात्ममात्राभिमुखत्वादेकाग्र
णा चित्तेन निर्विघ्नमात्मानुभूयते। अनेनैवाभिप्रायेण वार्तिककारः सर्वानुभ

वयोगिनां वाहन्तुः। सुखदुःखादिरूपत्वं धियो धर्मादिहेतुत्वात्। निर्हेतुत्वात्मसंबोध
रूपत्वं वस्तुतः त्वं ततः। प्रशांतवृत्ति कंचित्तं परमानंददीपकं। असंप्रज्ञातनामायं
समाधिर्योगिनां प्रियः इति। आत्मदर्शनस्य स्वतः सिद्धत्वेप्यनात्मवारणाय निरो
धाभ्यासः। अत एवोक्तं। आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् इति। योग
शास्त्रस्य चित्तविविक्तिसौं मात्रेण प्रवृत्तत्वान्निरोधसमाधावात्मदर्शनं नं साक्षा
दुक्तं भंगयंतरेणाभ्युपगम्यते। योगश्चित्तवृत्तिनिरोधः इति सूत्रयित्वा तदा द्रष्टुः
स्वरूपेणावस्थानमिति सूत्रणात्। यद्यपि निर्विकारो द्रष्टा सदा स्वरूप एवावति
ष्ठते तथापि वृत्तिषूत्पद्यमानासु तत्र चितिच्छायायां प्रतिबिंबितायां तद्रूपस्य इ
व द्रष्टा भवति। तदप्यनंतरसूत्रेणोक्तं। वृत्तिसारूप्यमितरत्रेति। अन्यत्रापि सूत्रि

५ कसमाधि

ना

नत्र

विवेकाद

जीवः

तं। सत्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वादिति। चिते
रप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनमिति च" निरोधसमाधिना
शोधिते त्वंपदार्थे साक्षात्कृते पितस्य ब्रह्मत्वं गोचरयितुं महावाक्येन ब्रह्मविद्या
नामकं वस्तंतरमुत्पाद्यते" न च शुद्धत्वंपदार्थसाक्षात्कारेण निरोधसमाधिरेक
एवोपायः किंतु चिज्जडविवेकेनापि पृ(थ)क्कृते तत्साक्षात्कारसंभवात्" अ
त एव वशिष्ठ आह। द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव" योगश्चित्त
निरोधो हि ज्ञानं सम्यक् वेक्षणमिति। असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञान
निश्चयः" प्रकारौ द्वौ ततो देवो जगाद परमेश्वर इति" ननु द्वावेकोपि योगे पर्य
वस्यति। दर्शनवेलायामात्ममात्रगोचरायाः एकाग्रवृत्तेः क्षणिकं संप्रज्ञा

८०

प्र

तद्रूपत्वात् ॥ बाढं ॥ तथा सति संप्रज्ञातासंप्रज्ञातयोः स्वरूपतः साधनतश्चास्येवम
हद्वैलक्षण्यं । वक्ष्यतिभ्यां स्फुटः स्वरूपभेदः । साधनतश्चाप्येव महद्वैलक्षण्यं
साधनं ननु संप्रज्ञातस्य सजातीयत्वाद्धारणादित्रयमंतरंगं । असंप्रज्ञातस्य अ
वृत्तिकस्य विजातीयत्वाद्बहिरंगं तथा च सूत्रं । तदपि बहिरंगं निर्बीजस्येति ॥ विजा
तीयत्वेपि न कुविधानात्म वृत्तिनिवारणे नोपकारितया बहिरंगत्वमविरुद्धं न
हेतोपकारित्वं विनादपि तु सूत्रयति ॥ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतर
रेषामिति । केषांचिद्देवानां पूर्वसूत्रे जन्मनैव समाधिमुक्ता मनुष्यास्तु ते तदुच्य
ते ॥ ममायं योगः एव परमपुरुषार्थसाधनमिति ॥ प्रत्ययः श्रद्धा सा चोत्कर्षश्र
वणे नोपजायते । तदुत्कर्षश्च स्मर्यते ॥ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि म

उ२

दि२

जीवः तोऽधिकः। कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुनेति। उत्तमलोकसाधनत्वा
च्छ्रेष्ठेभ्यश्चांद्रायणादितपसः ज्योतिष्टोमादिकर्मणो योगोऽधिकः॥ ज्ञानं प्रत्यंतरंगत्वाच्चि
त्तविश्रांतिहेतुतया ज्ञानादप्यधिकत्वं एवं जानतो योगे श्रद्धा जायते। तस्यां च श्र
द्धायां नासितायां वीर्यमुत्साहो भवति। सर्वथा योगं संपादयिष्यामीति एतादृशोत्
दान त्साहेन तदनुष्ठेयानि योगांगानि संपाद्यंते॥ तया च स्मृत्या सम्यगनुष्ठितसमाधेरध्य
ध्यात्मप्रसादे सति ऋतंभरा प्रज्ञोदेति। तत्प्रज्ञापूर्वकोऽतत्प्रज्ञाकारणको संप्रज्ञात
समाधिरितरेषां देवादिभ्यो नो चैलानां मनुष्याणां सिध्यति। तां च प्रज्ञां सूत्रयति॥
ऋतंभरा तत्र प्रज्ञेति ऋतं सत्यं वस्तु याथात्म्यं बिभर्ति प्रकाशयतीति ऋतंभरा॥
तत्र तस्मिन् समाध्युत्कर्षजन्येऽध्यात्मप्रसादे सतीत्यर्थः। ऋतंभरत्वोपपत्तिं सू

न मा

त्रयति। श्रुतानुमानप्रज्ञानाभ्यामन्यविषयाविशेषार्थत्वादिति। सूक्ष्मव्य
वहितविप्रकृष्टवस्तुषु अयोगिप्रत्यक्षं न प्रवर्तते। आगमानुमानाभ्यां तु नि
वस्तु नियोगिभिर्ज्ञायंते ते च शास्त्रानुमानजन्ये प्रज्ञे वस्तुसामान्यमेव
गोचरयतः इदं तु योगिप्रत्यक्षं विशेषवस्तुगोचरत्वाद् ततो भरं त्वं। तस्य च यो
गिप्रत्यक्ष [illegible] असंप्रज्ञातसमाधौ बहिरंगत्वसिद्ध्यर्थमुपकारित्वं
सूत्रयति तज्जः संस्कारोऽन्यसंस्कारप्रतिबंधीति असंप्रज्ञातसमाधेर्बहिरं
गसाधनमुक्त्वा तन्निरोधप्रयत्नस्यांतरंगसाधनतां सूत्रयति तस्यापि निरो
धे सर्वनिरोधान्निर्बीजः समाधिरिति सोयं समाधिः सुषुप्तिसमानः साक्षि
चैतन्येनानुभवितुं शक्यः तदासौ सर्ववृत्तिराहित्यात्सुषुप्तिरेवेति न शंक

११

डी॰ब

नीयं मनः स्वरूपस्य सदसत्त्वाभ्यां विशेषणात्॥ तदुक्तं गौडपादाचार्यैः॥ निगृही
तस्य मनसो निर्विकल्पस्य धीमतः। प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः॥
लीयते हि सुषुप्तौ तन्निगृहीतं न लीयते॥ तदेव निर्भयं ब्रह्म ज्ञानालोकं समं
ततमिति। मांडूक्यशाखायामपि श्रूयते॥ द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञ
तुर्ययोः। बीजनिद्रायुतः प्राज्ञः सा तु तुर्ये न विद्यते॥ स्वप्ननिद्रायुतावाद्यौ प्रा
ज्ञस्त्वस्वप्ननिद्रया। न निद्रां नैव च स्वप्नं तुर्ये पश्यंति निश्चिताः॥ अन्यथा गृ
ह्णतः स्वप्नो निद्रा तत्त्वमजानतः। विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुत इ
ति॥ आद्यौ विश्वतैजसौ अद्वैतस्य वस्तुनो अन्यथाग्रहणं नाम द्वैतरूपेण
प्रतिभासः॥ स च विश्वतैजसयोर्वर्तमानः स्वप्न इत्युच्यते॥ तत्त्वस्याज्ञानं त

ना॰२

६२

निद्रा सा चविश्वतैजसप्राज्ञेषु प्रवर्त्तते। तयोः स्वप्ननिद्रयोः स्वरूपभ्रतयोर्वि
पर्यासो मिथ्याज्ञानं तस्मिन्विषयपाक्षीणे सति तुरीयंपदमद्वैतं वस्त्वश्नुते॥ न
न्वस्त्वेवमसंप्रज्ञातसमाधिसुषुप्त्योर्महान्भेदः तत्र तत्वदिदृक्षोर्दर्शनसा
धनत्वेन समाध्यपेक्षायामपि दृष्टतत्वस्य जीवन्मुक्तये नास्ति तदपेक्षारा
गद्वेषादिक्लेशबंधस्य सुषुप्त्यापि निवृत्तेः मैवं। किं प्रतिदिनं स्वतः प्राप्नका
दाचित्की सुषुप्तिर्बंधनिवर्त्तिका किं वाभ्यासेन निरंतरवर्त्तिनी आद्ये किं सु
षुप्तौ क्लेशबंधस्य निवृत्तिः किं वा कालांतरवर्त्तिनः नाद्यः अप्रसक्तेः। न
हि मूढानामपि जागरणस्वप्नयोः क्लेशक्षयः प्रसज्येत नापि सुषुप्तेर्नैरं
तर्यं अभ्यसितुं शक्यं। तस्याः कर्मक्षयनिमित्तत्वात् तस्मात्तत्वविदोपि क्ले

+ सुषुप्तौ क्लेशबंधः॥ अन्यथाऽऽयासः प्रसज्येतैनद्वितीयो संभवात्॥ नत्वन्यकालीनया सुषुप्त्या कालांतरवर्तिनः क्लेशस्य क्षयः संभवतिं अन्यथा मूढानामपि २

तुभवातीथी

भा॰

जीव श्राक्षयायाया स्तेवासं प्रज्ञातसमाध्येपेक्षा तस्य च समाधेर्गवादिष्विव वा
न्निरोधः प्रथमा भूमिः बालमृगयादिष्विव नि मेन स्तंभः द्वितीया तं शामि वाहंका
रसहितं तृतीया सुषुप्ताविव महत्तत्वराहित्यं चतुर्थी। तदेतद्भूमिचतुष्टयमनि
प्रेत्य शनैः शनैरुपरमेदित्युक्तं। अत्र चोपरमे धृतिगृहीतबुद्धिः साधनं।
महदहंकारमनोवागादीनां स्वतया वतिवेगेन बहिः प्रवहतां कूले कषाया
शंव नधानिरोपेधैर्यं महदपेक्षितं बुद्धिर्विवेकः। पूर्वा भूमिर्जिता न वेति
परीक्ष्य जितायामुत्तरभूम्युपक्रमः अजितायां तु सैव पुनरभ्यसनीयेति। तु
दा तदा विविच्यात् आत्मसंस्थमित्यादिना सार्धश्लोकेन चतुर्थभूम्यभ्यासोपि
स्मृतः गौडाचार्या आहुः उपायेन निगृह्णीयात् विक्षिप्तं कामभोगयोः सुप्र

६२

सन्नं लये चैव यथा कामो लयस्तथा॥ दुःखं सर्वमनुस्मृत्य कामभोगान्नि
वर्तयेत्॥ अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति। लये संबोधयेच्चित्तं वि
क्षिप्तं शमयेत्पुनः॥ सकषायं विजानीयात्समप्राप्तं न चालयेत्॥ नास्वादये
त्सुखं तत्र निःसंगः प्रज्ञया भवेत्। निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्र
यत्नतः॥ यदा न लीयते चित्तं न च विक्षिप्यते पुनः। अलिंगनमनाभासं
निष्पन्नं ब्रह्म तत्तदेति॥ लयविक्षेपकषायसमप्राप्तयश्चित्तस्य चित्तस्या
चित्तं २ वस्थास्तत्र निरुध्यमानं विषयेभ्यो व्यावर्तसतः पूर्वाभ्यासवशाद्यदि ल
याय सुषुप्तये वा अभिमुखं भवेत्तदानीमुत्थानप्रयत्नेन लयकारण
निवारणेन वा तच्चित्तं सम्यक् प्रबोधयेत्। लयहेतवो निद्राशेषाजीर्ण

८ पा॰ समापय्यानिद्रांसुजीर्णोन्नभोजी श्रमत्यागवाधेविविक्तेप्रदेशे॥ सदासीतनिस्तृष्ण एष प्रयत्नोथवा प्राणरोधोनिजाभ्यासमार्गादिति॥ प॰८॥

जीव: वक्ष्यमाणं श्रमाः अतएवाह॥ समाराप्यनिद्रां सुजीर्णोन्नभोजी श्रमत्यागवाधाविविक्ते प्रदेशे॥ सदासीननीस्तृष्णएष प्रयत्नोथवाप्राणरोधोनिजाभ्यासमार्गादिति॥ यद्यप्येतं चित्तं दिनंदिनं प्रबोधाभ्यासवशात् यदि कामभोगयोर्विक्षिप्येत॥ तदा विवेकिजनं सिद्धभोग्यवस्तुगतसर्वदुःखानुस्मरणेन शास्त्रप्रसिद्धजन्मादिरहितात् द्वितीयब्रह्मतत्त्वानुस्मरणपूर्वकं नभोग्यवस्तुदर्शनेन च पुनः पुनर्विक्षेपाच्चित्तं शामयेत्। कषाय स्तीव्रश्चित्तदोषस्तीव्ररागद्वेषादिवासनातया ग्रस्तं चित्तं कदाचित्समाहितमिव लयविक्षेपरहितं भोगादिषु दुःखे काग्रमवतिष्ठते॥ तादृशं तच्चित्तं विजानीयात्समाहितचित्ताद्विवेकेनावगच्छेत्॥ असमा

प॰ ६८

हितमेतदितिसवगम्यलयविक्षेपवत्कषायस्यप्रतीकारं कुर्यात्॥ समप्रा
प्ते न ब्रह्माभिधीयते॥ समंसर्वेषुभूतेषु तिष्ठंतं परमेश्वरमितिस्मृतेः॥ समोम
शकेन समो नागेन समएभिस्त्रिभिर्लोकैरिति श्रुतेः॥ लयविक्षेपकषा
येषुपरीहृतेषुपरिशेषाच्चित्ते न समं ब्रह्मप्राप्यते॥ तच्चसमप्राप्तं कषायलय

चितं

भ्रांत्या न चालयेत्॥ सुखास्वाद्याबुध्या लयकषायप्राप्तिं विविच्य तस्यां सम
प्राप्तौच्यतिप्रयत्नेनचित्तं स्थापयेत्॥ स्थापितेतस्मिन्ब्रह्मस्वरूपभूतःप
रमानंदः सम्यगाविर्भवति॥ तथाबोधीहृतं॥ सुखमात्यंतिकं यत्तद्बुद्धिग्रा
ह्यमतींद्रियमिति॥ श्रुतिश्चभवति॥ समाधिनिर्धूतमलस्य चेतसो निवे
शितस्यात्मनि यत्सुखं भवेत्॥ नशक्यते वर्णयितुं गिरा तदा स्वयं तदंतः

जीवः स्वरसेन गृह्यत इति॥ ननु समाधावाविर्भूतब्रह्मानंदस्य बुद्धिग्राह्यत्वं श्रुतिस्मृ
तिभ्यामभिहितं॥ आचार्यैरुक्तं नास्वादयेत्सुखं तत्रेति बुद्धिग्राह्यत्वं प्रतिषिध्यत इ
ति चेन्नायं दोषः समाधिविरोधिन्या व्युत्थानरूपस्य परामर्शस्यैव प्रतिषेधात्॥
यथा निदाघदिवसे पुंमध्याह्ने जाह्नवीह्रदे निमग्नेनानुभूयमानमपि शैत्यसु
खं तदा वक्तुमशक्यं पश्चादुन्मग्नेनाभिधीयते॥ यथा वा सुषुप्तावविद्यावृत्तिभि
रतिसूक्ष्माभिरनुभूयमानमपि स्वरूपसुखं तदानीं सविकल्पेनांतःकरणवृत्ति
ज्ञानेन गृहीतुमशक्यं॥ प्रबोधकाले तु स्मृत्याविस्पष्टं परामृश्यते तथा समाधौ
वृत्तिरहितेन संस्कारमात्रशेषतया सूक्ष्मेण चित्तेन सुखानुभवः श्रुतिस्मृ
त्योर्विवक्षितः॥ महदिदं समाधिसुखमन्वभूवमित्येतादृशो व्युत्थितस्य सवि

६५

कल्पः परामर्शोऽस्यास्वादनं। तदेवाचार्यैः प्रतिषिध्यते तमेव स्वाभिप्रायं प्रकटयि
तुं निःसंगः प्रज्ञया भवेदित्युक्तं॥ प्रज्ञष्टं सविकल्पं ज्ञानं प्रज्ञातया सह संगपरित्य
जेत्। यद्वा पूर्वोक्ता धृतिगृहीता बुद्धिः प्रज्ञा तदात्मकेन साधनेन सुखास्वादनं
न कुर्यात् नास्तिरूपामासक्तिं वर्जयेत्॥ समाधौ ब्रह्मानंदे निमग्नं चित्तं यदि कदा
चित्सुखास्वादनाय वा शीतवातमशकाद्युपद्रवेण वा निश्चरेत् तदा निश्चरितं
चित्तं यथा पुनर्निश्चलं च भवति तथा परब्रह्मणा सहैकीकुर्यात् तत्र च निरो
धप्रयत्न एव साधनं एकीभाव एव यदा न लीयते चित्तमित्यनेन श्लोकेन स्प
ष्टीक्रियते। अनिंगनमनाभासमित्याभ्यां पदाभ्यां कषायसुखास्वादौ पुनर्प्र
तिषिध्येते लयविक्षेपकषायसुखास्वादेभ्यो रहितं चित्तमविघ्नेन ब्रह्मण्यवस्थि

जीवः

तं भवति एतदेवाभिप्रेत्य कठवल्लीषूपक्रान्तम् । यदा पंचावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टति तामाहुः परमां गतिं ॥ तां योगमिति मन्यन्ते स्थिरामिंद्रियधारणां । अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययाविति ॥ उपेक्षितो योग इंद्रियवृत्तीनां प्रवेशं करोति अनुष्ठितः तस्मात्तासां लयहेतुरत एव योगस्य स्वरूपलक्षणं सूत्रयति ॥ योगश्चित्तवृत्तिनिरोध इति ॥ वृत्तीनामानंत्यान्निरोधोऽशक्य इति शंकां वारयितुमपि यत्नं सूत्रयति वृत्तयः पंच[illegible]तय्यः क्लिष्टा अक्लिष्टा इति रागद्वेषादिक्लेशरूपाः आसु एव तयः क्लिष्टाः । रागादिरहिता दैवावृतयोऽक्लिष्टाः यद्यपि पंचस्वेव क्लिष्टानामक्लिष्टानामंतर्भावः तथापि क्लिष्टा एव निरोध्या इति मंदबुद्धिं वारयितुं ताभिः सहाक्लिष्टोऽदाहृताः

= पंचविधा इत्यर्थः =

६५

पि

नामधेयलक्षणाभ्यां वृत्तीर्विवरीषयितुं सूत्रषट्कमाह॥ प्रमाणविपर्ययवि
कल्पनिद्रास्मृतयः १ प्रत्यक्षानुमानागमाः प्रमाणानि २ विपर्ययोमिथ्या
ज्ञानमतद्रूपप्रतिष्ठं ३ शब्दज्ञानानुपातीवस्तुशून्योविकल्पः ४ अभावप्र
त्ययालंबना वृत्तिर्निद्रा ५ अनुभूतविषयासंप्रमोषः स्मृतिरिति ६ वस्त्व
भावःप्रतीयते यस्मिंस्तमस्यावरके सति तंमोऽभावप्रत्ययस्तमोगुणं वि
षयंकुर्वती वृत्तिर्निद्रेत्युच्यते॥ अनुभूतविषयस्यासंप्रमोषस्तदनुभवजन्यम
नुसंधानं पंचविधवृत्तिनिरोधसाधनं सूचयति। अभ्यासवैराग्याभ्यां तन्नि
रोधइति। यथातीव्रवेगोपेते नदीप्रवाहं सेतुबंधनेन निवार्यकुल्यांनयने
नक्षेत्राभिमुखतिर्यक्प्रवाहांतरमुत्पाद्यते॥ तथा वैराग्येण चित्तनिद्यावि

नं ५

जीव

वयप्रवाहं निवार्य समाध्यभ्यासेन प्रशान्तप्रवाहः संपाद्यते मंत्रजपदेव
ताध्यानादीनां क्रियारूपत्वेनावृत्तिलक्षणोऽभ्यासः संभाव्यते। सर्वव्यापार
३ साधक॥ परमरूपस्य समाधेः कोनामाभ्यास इति शंकां वारयितुं सूत्रयति तत्र स्थि
तौ यत्नोऽभ्यास इति। स्थितिर्नैश्चल्यं निरोधः यत्नो मानस उत्साहः स्वत एव ब
ध६ हिः प्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवंविध उत्साहश्चावर्तमानोऽभ्या ६७
स इति उच्यते अयमभ्यास इदानीं प्रवर्तः स्वयमदृढः सन् अनादिप्रवृत्ताव्यु
त्थानवासनाः कथमभिभवेदित्याशंकामपवदितुं सूत्रयति। स तु दीर्घका
लनैरंतर्यसत्कारसेवितो दृढभूमिरिति लोकाहि मूढस्य वचनमुदाहरंति॥
विद्यमाना अश्वारस्य वेदास्तेनध्येतुं गतमाणवकस्य पंचदिवसा अ

स्य

तीताऽप्यथाप्यसौ नागत इति। तादृशाए वायं योगी तदा स्यात्‌ यदादिव सेवी मा
सेवी योगसिद्धिर्वा स्ते तस्मात्संवत्सरैर्जन्मभिर्वा दीर्घकालं योग आसेवि
तव्यः तथा च स्मर्यते। अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति। चि
रमासेव्यमानोपि विच्छिद्य विच्छिद्य यदासेव्यते तत हि उत्पद्यमानानां योगसं
स्काराणां समनंतरभाविभिर्विच्छेदकालीनैर्व्युत्थानसंस्कारैरभिभवे सु
तिखंडनकारोक्तन्याय आपतेत्‌ अग्रेधावन्पश्चाद्रुध्यमानो विस्मरमासे
व्यमानोपि विच्छिन्नशीलप्लुतवल्लिमालंबतेति। तस्मान्निरंतरमासेवित
व्यः। सत्कार आदरः। अनादरेण सेव्यमाने वशिष्ठोक्तन्याय आपतेत्‌। अ
कर्तुं कुर्वदप्येतच्चेतः अक्षीणवासनं दूरंगतमनाजंतुः कृपासंश्रवणे

१२

जीव

यच्चेति॥ अनादरेण लयविक्षेपकषायसुखास्वादनानामपरिहारः। तस्मादाद
रेण सेवितः॥ यः दीर्घकालादित्रैविधानसेवितस्य समाधेर्दृढभूमित्वं ना
म विषयसुखवासनया दुःखवासनया वा रयितुमशक्यत्वात्। तच्च भगवता
दर्शितं यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। यस्मिन्स्थितो न दुःखेन गु
रुणापि विचाल्यत इति॥ अपरलाभस्यानाधिक्यं कचवृतांतेन वसिष्ठ उदा
जहार। कचः कदाचिद्व्युत्थाय समाधेः शांतमानसः। एकांते स्वमुवाचेदमे
को गद्गदया गिरा। किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किं। आत्मना
पूरितं विश्वं महाकल्पांबुना यथा। सबाह्याभ्यंतरे देहे ह्यध ऊर्ध्वं च दिक्षु च
इत आत्मा तत आत्मा नास्त्यनात्ममयं क्वचित्॥ न तदस्ति न यत्राहं न

उगात्=

६६

यत्रो तरस्ति न यन्मयि किमन्यदपि वांछामि सर्वं संविन्मयं ततः स्फारब्रह्मा
मलं भोपि फेनाः सर्वे कुलाचलाः चिदादित्य महातेजो मृगतृष्णा जगच्छ्रिय
इति गुरुणा दुःखेनाप्यं विज्ञाल्पत्वं शिखिध्वजः ॥ स्यसवत्सरत्रय सामाधिष्टे
ता तेन नंदा हो जरति निर्विकल्पसमाधिस्थं तत्रापश्यन्महीपतिं ॥ राजा नं
तावदेतस्माद्बोधयामि परात्पदात् इति संचिंत्य चूडाला सिंहनादं चकार सा
य यथा च यः प्रमारणे वने चरन्नयपदं न चाजत दोरामयदानादेनतेन सः ॥
यथा च यः कृतेनापि तदा सा तव्य चालयत्। चालितः पातितोप्येष तद र
नो बुबुधे बुध इति एकादहतातेनापि तदेवो दाजहार इति संबु
स ... यन्ने वधक्लादः परवीरहा निर्विकल्पपरानंद समाधिसमुपाययौ ॥

२

जीव

निर्विकल्पसमाधिस्थश्चापि तत्त्वावबोधे पंचवर्षसहस्राणि पीनां सो
त्तिष्ठदेकदा महात्मा संप्रबुद्धश्चेतसे तद्दिव्युरुदाहरन् पांजन्यं प्रदध्मौ स्व
धनयन्ककुभां गणं । महातातेन शब्देन वैष्णवप्राणजन्मना बभ्रुवसं
प्रबुद्धात्मा दानवेन्द्राः शनैरिति । एवं वीतहव्यादीनामपि समाधिरुदाह
रणीयः । वैराग्यं द्विविधं अपरं परं चेति ।। यतमानव्यतिरेकैकेन्द्रि
यवशीकारभेदैरपरं चतुर्विधं तत्राद्यत्रयमपर्यालस्यत्रयन्साक्षाच्चतुर्थं
स्य यति । दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमि
ति स्रक्चंदनवनितापुत्रमित्रक्षेत्रधनादयो दृष्टाः वेदोक्तास्वर्गादयः आ
नुश्रविकाः । तन्नोभयत्रसत्यामपि तस्यां विवेकता तारतम्येन यतमा

:शनै

च

६९

नारि वैराग्यत्रयं भवति। अस्मिन् जगति किं सारं किमसारमिति
गुरुशास्त्राभ्यां जानामीत्युद्योगो यतमानत्वं स्वचित्ते पूर्वं विद्यमाना
नां दोषाणां मध्ये अभ्यस्यमानेन विवेकेन एतावंतः पक्वाः एतावंतो
वशिष्टा इति विवेचनं व्यतिरेकः दृष्टानुश्राविकविषयप्रवृत्तेः दुःखा
त्मकत्वबोधेन तां परित्यज्य मनस्यौत्सुक्यमात्रेण तत्स्थावस्थानम् ए

मवृत्तिं४

केंद्रियत्वं। इति तस्माद्वशीकारः ४ तदीदृशमपरं वैराग्यमष्टांगयोगप्र
वर्तकत्वेन संप्रज्ञा। तस्यांतरंगं। असंप्रज्ञातस्य तु बहिरंगं। तत्रांतरंगं
परं वैराग्यं सूत्रयति। तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति। संप्रज्ञातसु
माधिपरिपाटवेन गुणत्रयात्मकात्प्रधानाद्विरक्तस्य पुरुषस्य ख्यातिः

जीव

साक्षात्कार उत्पद्यते। तस्माच्च साक्षात्कारादशेषगुणत्रयव्यवहारेयत् वैतस्मिंत
त्परं वैराग्यं तस्य तारतम्येन समाधेः शीघ्रत्वं तारतम्यं सूत्रयति। तीव्रसंवेगानामा
सन्नः समाधिलाभ इति संवेगो वैराग्यं। तद्भेदात् योगी नवविधाः। मृदुसंवेगाः।
मध्यसंवेगाः तीव्रसंवेगाश्चेति। आसन्नो नैव कालेन समाधिर्लभ्यत इत्यर्थः।
तीव्रसंवेगेष्वेव समाधितारतम्यं सूत्रयति। मृदुमध्याधिमात्रत्वात्ततोऽपि विशे
ष इति। मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति। तेषामुत्तरोत्तरस्य [illegible]त्वरया समाधि
दर्श्या। उत्तमोत्तमा जनकप्रह्लादादयोऽधिमात्रतीव्रा मुहूर्त्तमात्रविचारेण दृढस
माधिलाभात्। अधमाधमा उद्दालकादयो मृदुसंवेगाश्चिरप्रयासेन तल्लाभा
त्। एवमन्येऽपि यथायोग्यमुन्नेयाः। तदेव मधिमात्रतीव्रस्य दृढभूमावसंप्रज्ञात

१०

सिद्धि४

समाधौ लब्धे सति पुनर्व्युत्थाने मत्वा तत्त्वं सन्मनो नश्यति। मनोनाशे नन्ववासनाक्षये
कृते सति जीवन्मुक्तिः सुप्रतिष्ठिता भवति। न च मनोनाशे न विदेहमुक्तिरेव न तु जी
वन्मुक्तिरिति शंकनीयं प्रश्नोत्तराभ्यां तन्निर्णीयात्। श्रीराम। विवेकाभ्युदयाच्चि
त्तस्वरूपे तर्हि ते मुने। मैत्र्यादयो गुणाः कुत्र जायन्ते योगिनां वद। श्रीवसिष्ठः। द्विवि
धश्चित्तनाशोऽस्ति सरूपोऽरूप एव च। जीवन्मुक्तौ सरूपः स्यादरूपो देहमुक्तिगः॥ प्रा
कृतं गुणसंभारं ममेति बहुमन्यते। सुखदुःखाद्यवष्टभ्य विद्यमानं मनो विदुः। चे
तसः कथिता सत्ता मया रघुकुलोद्वह। अस्य नाशमिदानीं त्वं शृणु प्रश्नविदां वर।
सुखदुःखदशा धीरं साम्यान्न प्रोद्धरन्ति यं। निश्वासा इव शैलेन्द्रं तस्य चित्तं मृतं वि
दुः॥ आपत्कार्पण्यमुत्साहो मदो मांद्यं महोत्सवः। यं न यन्ति न वै रूपं तस्य नष्टं मनो वि

दुःखचित्तमात्रा ... नि... धानं हि यदा नरपतिराघव । मै आदिभिर्गुणैर्युक्तं तदा सत्वमु
देत्यलं । भूयो जन्मविनिर्मुक्तं जीवन्मुक्तस्य तन्मनः । सरूपोसौ मनोनाशो जीव
न्मुक्तस्य विद्यते । अरूपस्तु मनोनाशो यो मयोक्तो [illegible] निर्गुणं जी... रघूद्वह । विदेह
मुक्तावेवासौ विद्यते निष्कलात्मकः । समग्राग्र्यगुणाधारमपि सत्वं प्रलीयते । विदे
हमुक्तावमले पदे परमपावने । संशांतदुःखमजडात्मकमेकरूपमानंदमंथरम
पेतरजस्तमो यत् । आकाशकोशतनवोऽतनवो महांतस्तस्मिन्पदे गलितचित्त
लवा वसंतीति । तस्मात्सरूपो मनोनाशो जीवन्मुक्तिसाधनमिति स्थितं । इति जी
वन्मुक्तिसाधनमनोनाशप्रकरणं । केयं जीवन्मुक्तिः किं वा तत्र प्रमाणं कथं वा
तत्सिद्धिरित्येतस्य प्रश्नत्रयस्योत्तरं निरूपितं । सिद्धौ वा किं प्रयोजनमित्यस्य चतु

यैप्रश्नस्योत्तरमि[illegible]दानीमभिधीयते। ज्ञानस[illegible]भिरक्षा तपो विसंवादाभाव दुः
खनाशसुखाविर्भावाः पंच प्रयोजनानि। ननु प्रमाणोत्पन्नस्य तत्त्वज्ञानस्य
को नाम बाधप्रसंगो येन रक्षापेक्ष्यते इति चेदुच्यते। चित्तविश्रांतेरभावे संशय
विपर्ययौ प्रसज्जेयातां तथाहि तत्त्वविदो राघवस्य विश्रांतेः पूर्वं संशयं विश्वामि
त्र उदाजहार। न राघव तवास्त्यन्यज्ज्ञेयं ज्ञानवतांवर। स्वयैव सूक्ष्मया बुद्ध्या स
र्वं विज्ञातवानसि। भगवद्व्यासपुत्रस्य शुकस्येव मितिस्तव। विश्रांतिमात्रमेवा
न१२ त्र ज्ञातज्ञेयस्यापेक्षत इति। शुकस्तु स्वयमेवादौ तत्त्वं विदित्वा तत्र संशयानः पित
रं पृष्ट्वापि नापि तथैवानुशिष्टः तत्रापि संशयानो जनकमुपासाद्यते नापि तथैवा
नुशिष्टस्तं प्रत्येवमुवाच। स्वयमेव मया पूर्वमेतज्ज्ञानं विवेकतः एतदेव हि पृष्टेन

च१

जीव:

पित्रा मे समुदाहृतं। भवताप्येषणावार्थः कथितो वाग्विदांवर।।एषणा वै वा क्वार्थीः त्रा
स्त्रेषु परिदृश्यते। यथायं स्वविकल्पोत्थः स्वविकल्पपरिक्षयात्।। क्षीयते दग्धसं
सारो निःसार इति निश्चयः। तत्किमेतन्महाबाहो सत्यं ब्रूहि ममाचलं। त्वत्तो विश्रां
तिमाप्नोमि चेतसा भ्रामितं जगत्।। जनकः ।नातः [illegible] परतरः कश्चिन्निश्चयोस्त्यपरो
मुने। स्वयमेव त्वया ज्ञातं गुरुतश्च पुनः श्रुतं। अव्युच्छिन्नः चिदात्मैकः पुमानस्तीह
नेतरः। स्वसंकल्पवशाद्बद्धो निःसंकल्पस्तु मुच्यते।। मुने त्वया स्फुटं ज्ञानं ज्ञेयं स्वस्य
महात्मनः। भोगेभ्योप्यरतिर्जाता दृश्याद्वा सकलादिह।। प्राप्तं प्राप्तव्यमखिलं भवता
पूर्णचेतसा।। न दृश्ये पतसि ब्रह्मन्मुक्तस्त्वं भ्रांतिमुत्सृज।। अनुशिष्टः स इत्येवं जनके
न महात्मना।। विशश्राम मशुकस्तूष्णीं स्वस्थे परमवस्तुनि।। वीतशोकोभयायासो नि

९२

वर्षे

रीहं भि न संशयः ॥ जगाम शिखरं मेरोः समाध्यर्थमनिंदितं । तत्र वर्षसहस्राणि निर्वि

कल्पसमाधिना । दशास्थित्वा शशाम मासा वात्मन्यस्त्रे हदीपवत् इति ॥ तस्माद्धि दि

भु २ तेपितत्वे विश्रांति रहितस्य शुकराघवयोरिव संशय उत्पद्यते । स च ज्ञानमिव

मोक्षस्य प्रतिबंधकः ॥ अत एव भगवतोक्तं ॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा वि

नश्यति । नायं लोकोस्ति न परो न सुखं संशयात्मन इति । अथ क्रमप्राप्तो विपर्ययः स चो

त्तरत्रोदाहरिष्यते । अज्ञानविपर्ययौ मोक्षमात्रविरोधिनौ । संशयस्तु भो

नि ३ गमोक्षमार्गं बुद्धिस्तंभकारणात् । यदा च मोक्षमार्गे प्रवृत्तिस्तदा संसारबुद्धिस्तां

प्रतिबध्नाति ॥ तस्मात्संशयमात्मानो न किंचित्सुखमस्तीति मुमुक्षुणा सर्वथा

संशयश्छेत्तव्यः । अत एव कर्मपत्तेऽछिद्यंते सर्वसंशया इति विपर्ययस्यापि नि

+ योरुभयोरपि विरोधी तस्य परस्पराविरुद्धकोटिद्वयावलंबित्वात् ॥ यदा संसारसुखाय प्रवृत्तिः तदा मोक्षस्तु

निदाघस्य उदाहरणं ॥ ऋभुः परमकरुणया निदाघस्य गृहमेत्य बहुधा तं बोधयि
त्वा निजं धाम जगाम बुद्धिपितदुप दिष्टवस्तूनि श्रद्धया नो निदाघः कर्मण्येव पर
मपुरुषार्थहेतुरिति विपर्ययं प्राप्य कर्मानुष्ठाने यथापूर्वं प्रवृत्तः ॥ सोऽपि शिष्य
स्य परमार्थभ्रंशो माभूदिति कृपया गुरुः पुनरागत्य बोधयामास तदापि वि
पर्ययं न जहौ ॥ तृतीये नु बोधने न विपर्ययं परित्यज्य विश्रान्तिमलभत ॥ सं
शयविपर्ययाभ्यामसंभावनाविपरीतभावनारूपाभ्यां तत्त्वज्ञानस्य फलं
प्रतिबध्यते ॥ तदुक्तं पराशरेण ॥ मणिमंत्रौषधैर्वह्निः सुदीप्तोऽपि यथेंधनं प्र
दग्धुं नैव शक्तः स्यात्प्रतिबद्धस्तथैव च ॥ ज्ञानाग्निरपि संजातः सुदीप्तः सुदृढोऽपि
चा प्रदग्धुं नैव शक्तः स्यात्प्रतिबंधस्तु कल्मषम् ॥ भावनाविपरीता या याच ।

९२

प २

संशयभावना। कुरुते प्रतिबंधं सा खलु ज्ञानस्य नापरमिति। तस्माद्विभ्रां
तचित्तस्य संशयविपर्ययप्रसंगेन तत्वज्ञानस्य फलं प्रतिबंधलक्षणं बाधा
द्र्क्षापेक्षते। विभ्रांतचित्तस्य तु मनोनाशेन यदा जगदेव न प्रतीयते। तदा
प ४ संशयविपर्यययोः कः प्रसंगः जगत्स्मृतिबोधरहितस्य ब्रह्मविदो देहव्यवहा
स्व ५ रोपि विनैव प्रयत्नं परमेश्वरप्रेरितेन प्राणवायुना निष्पाद्यते। अतएवछां
दोग्या आमनंति। नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त
एवमेवायमस्मिन् शरीरे प्राणो युक्त इति। उपजनं जनानां समीपे वर्तमान
मिदं शरीरं न स्मरन् ब्रह्मविद्वर्तते। पार्श्वस्थजना एव तत्वविदः शरीरं पश्यं
ति। स्वयं तु निर्मलत्वान्मदीयं शरीरमिति न स्मरति। प्रयोग्यो रथ शक

मिदं ~

185

जीव:

टादिवा हनेप्रयोक्तुमर्ह: शिक्षितोश्वबलीबर्दादि: सयथा सारथिना मार्गस्था
चरणे प्रेरित: पुन: पुन: सारथि प्रयत्नमनपेक्ष्य स्वयमेवं शकटादिकं पुरो वर्त्ति
ग्रामे नयति।। एवमेवायं प्राणवायु: परमेश्वरेणास्मिन् शरीरे नियुक्त: सत्पस
ती वाजीवप्रयत्ने व्यवहारं निर्वाहयति। भागवतेस्मृर्यते। देहं विनश्वरमवस्थि
तमुत्थितं वा सिद्धो न पश्यति यतो ध्यागमत्स्वरूपं। दैवादुपेतमथ दैववशादपे
तं वासो यथा परिहृतं मदिरामदांध इति वशिष्ठोप्याह पार्श्वस्थं बोधिता:
संत: पूर्वाचारकमागतं। आचारमाचरत्येव सुप्तबुद्धवदक्षता इति सिद्धो
न पश्यति आचारमाचारं त्तु उभयो: परस्परविरोध इति चेत् विश्रांति तार
म्ये न व्यवस्थोपपत्ते: तदेव तारतम्यमभिप्रेत्य श्रूयते। आत्मक्रीड आत्म

ती

९४

रतिः क्रियावानेष ब्रह्मविदां वरिष्ठ इति । अत्र चत्वारः प्रतीयन्ते ब्रह्मविन्प्रथ
मं ब्रह्मविद्वरो द्वितीयः वरीयांस्तृतीयः वरिष्ठश्चतुर्थः । त एते सप्तसु योगभूमि
षु चतुर्थ्यां योगभूमिमारभ्य क्रमेण भूमिचतुष्टयं प्राप्ता इत्यवगन्तव्यं भूमय
श्च वशिष्ठेन दर्शिताः । ज्ञानभूमिः शुभेच्छा स्यात् प्रथमा समुदाहृता । विचा
रणा द्वितीया स्यात् तृतीया तनुमानसी । सत्वापत्तिश्चतुर्थी स्यात्ततो संसक्ति
नामिका । पदार्थाभाविनी षष्ठी सप्तमी तुर्यगा स्मृतेति । स्थितः किं मूढ एवा
स्मि प्रेक्षेहं शास्त्रसज्जनैः वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः ॥ शास्त्रस
ज्जनसंपर्कैर्वैराग्याभ्यासपूर्वकं । सद्विचारप्रवृत्तिर्या प्रोच्यते सा विचारणा ॥
विचारणाशुभेच्छाभ्यामिन्द्रियार्थेष्वसक्तता । यत्र सा तनुतामेति प्रोच्यते तनु

ज्ञी.व:

मानसी भूमिका चित्तयाभ्यासाच्चित्तेर्थविरते वैशान्तं सत्वात्मनि स्थितिः शुद्धे सत्वा
पत्तिरूपा भूता। दशा चतुर्थ्या भ्यासात् असंसर्गफला च या। रूढसत्वचमत्कारा प्रो
क्ता संसक्तिनामिका। भूमिका पंचकाभ्यासात्स्वात्मारामतया भृशं। आभ्यंतराणां
बाह्यानां पदार्थानामभासनात्" परप्रयुक्तेन चिरप्रयत्नेनावबोधनं। पदार्थाभा
विनी नाम षष्ठी भवति भूमिका। भूमिषट्कचिराभ्यासाद्भेदस्यानुपलंभनात्। य ९५
त्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिरिति। अत्र भूमिकात्रितयं ब्रह्मविद्या
याः साधनमेव न तु विद्याकोटौ यवं तद्भवति भेदसत्यत्वबुद्धेरनिवर्तित्वात्। न ३
अत एवैतज्जागरणमिति व्यपदिश्यते। तदुक्तं भूमिकात्रितयं चेतद्राम जाग्रदि
ति स्थितं। यथावद्भेदबुद्ध्येदं जगज्जा[illegible]ग्रति दृश्यते इति। चतुर्थभूमौ जगदुपा

+ ततो ये संतता स्यान्निर्विकल्पकोब्रह्मात्मैक्यसाक्षात्कारश्चतुर्थी भूमिका फलरूपा सत्वापत्तिः ९

तदाह ३

तानस्य ब्रह्मणो वास्तवमद्वितीयसत्तास्वभावं निश्चितं तस्मिन्ब्रह्मण्या
रोपितयोर्जगद्ब्रह्माभिधेययोर्नामरूपयोर्मिथ्यात्वमवगच्छति मुमुक्षोः
बोधकं जागरणमस्यास्य भूमिः स्वप्नः प्रवृत्ते स्थैर्यमायाते द्वैते प्रशाममाग
ते। पशाम्यति स्वप्नवत्त्वात्कं चतुर्थी भूमिकामिताः विच्छिन्नशारदभ्रांशांविला
प्यं प्रविलीयते। सम्यग्वत्रोषएवास्ते चतुर्थीभूमिकामिता इति सोयं योगी
ब्रह्मविद्वरः षष्ठभूमौ पार्श्वस्थैर्बोधितो व्युत्तिष्ठति सोयं ब्रह्मविद्वरीयान्
ततेतद्भूमिद्वयं सुषुप्तिर्गाढसुषुप्तिरित्यभिधीयते। तदाह। पंचमीभूमिका
मेत्य सुषुप्तिपदनामिकां। शांताशेषविशेषांशास्तिष्ठत्यद्वैतमात्रके। अंत
र्मुखतयानित्यं बहिर्वृत्तिपरोपि सन्। परि[illegible]ततयानित्यं निद्रालुरिवल

ॐ

जीव

स्यतो। कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः षष्ठीं गाढसुषुप्त्याख्यां क्रमा
त्पतति भूमिकां॥ यत्र नासन्न सद्रूपो नाहं नाप्यनहंकृतिः। केवलं क्षीणमन
न आस्तेऽद्वैतेऽतिनिर्गतः॥ अंतःशून्यो बहिःशून्यः शून्यकुंभ इवांबरे। अंतःपूर्णो
बहिःपूर्णः पूर्णकुंभ इवार्णवे॥ गाढनिर्विकल्पसमाधिप्राप्तस्य संस्कारमा
त्रशेषस्य चित्तस्य मनोराज्यं कर्तुं बाह्यपदार्थानाहीतुं वासामुष्यभावादा
काशावस्थितकुंभवदंतर्बहिःशून्यत्वं स्वयंप्रकाशचिदानंदैकरसे ब्रह्म
णि निमग्नत्वेन बहिश्च सर्वत्र ब्रह्मदृष्ट्या समुद्रमध्यस्थापितजलपूर्णकुंभ
वदंतर्बहिःपूर्णत्वं तुरीयाभिधानसप्तमभूमिं प्राप्तस्य योगिनः स्वतः परतो
वा व्युत्थानमेव नास्तीति तत्रायं संग्रहः। चतुर्थी भूमिका ज्ञानं तिस्रः स्युः

९६

ता

सापमेपुरा। जीवन्मुक्तेश्च स्यात्सप्तपरास्तिस्त्र प्रकीर्तिताः॥ इत्युपमे वोदित्युपदे
हृ विनश्वरमवस्थितमुत्थितं वेत्यादिवाक्यं प्रवृत्तं। श्रुसंप्रज्ञातसमाधिप्र
तिपादकानि योगशास्त्राण्यत्रैव पर्यवसितानि सो यमीदृशो योगी पूर्वोदा
हृतश्रुतौ ब्रह्मविद्वरिष्ठ इत्युच्यते। तदेवं पार्श्वस्य बोधितः सिद्धांतपक्षप
तीत्यनयोर्भूमिद्वये अवस्थिततत्वान्नकोपि विरोधः॥ पंचम्यादिभूमित्रय
रूपायां जीवन्मुक्तौ संपद्यमानायां द्वैतप्रतिभासाभावेन संशयविपर्य
याभावादुत्पन्नं तत्त्वज्ञानं अप्रबाधेन रक्षितं भवति। सेयं ज्ञानरक्षा जी
वन्मुक्तेः प्रथमप्रयोजनं। तपो द्वितीयं प्रयोजनं। योगभूमीनां देवत्वादि
प्राप्तिहेतुतया तपस्त्वं श्रेष्ठत्वं तद्धेतुत्वं चार्जुन भगवतोः श्रीरामवसि

प्रसंगा २

ज्ञा

जीव

ष्टयोऽभ्यासवैराग्याभ्यामवगम्यते। अर्जुन उवाच अयतिः श्रद्धयोपेतो योगा
च्चलितमानसः। अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति। कच्चिन्नोभय
विभ्रष्टश्छिन्नाभ्रमिव नश्यति। अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि॥
श्रीभगवानुवाच। प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः। शु
चीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते। अथवा योगिनामेव कुले भव
ति धीमतां। एतद्धि दुर्लभतरं लोके जन्म यदीदृशं। तत्र तं बुद्धिसंयोगं ल
भते पौर्वदेहिकं। यतते च ततो भूयः संसिद्धौ कुरुनंदनेत्यादि। श्रीरा
म उवाच। एकामथ द्वितीयां वा तृतीयां भूमिकामुत। आरूढस्य मृतस्याथ
कीदृशी भगवन् गतिः॥ वसिष्ठ उवाच। योगभूमिकयोत्क्रांतजीवितस्य शा

९८

नर

- युक्तः परिपतंत्युच्चै = ५

रीरिणः॥ भूमिकांशानुसारेण क्षीयते पूर्वदुःकृतं। ततः सुरविमानेषु लो
कपालपुरेषु च। मेरूपवनकुंजेषु रमते रमणीसखः॥ सुकृते सुकृतसंभारे दु
ष्कृते च प्रणष्टे ते भोगक्षये परिक्षीणे जायते योगिनो भुवि। शुचीनां श्री
मतां गेहे गुप्ते गुणान्वितां सतां॥ तत्र प्राग्भावनाभ्यस्तयोगभूमित्रयं बु
धाः। स्पष्टं पठि परिपतंत्युच्चैरुत्तमं भूमिकाक्रमामिति॥ अस्त्वेवं योगभूमि
नां देवलोकप्राप्तिहेतुत्वं तावता तपस्त्वं कुत इति चेत्। श्रुतेरिति ब्रू गप
मः॥ तथा च तैत्तिरीया आमनंति। तपसा देवा देवतामग्र आसन् तप
सर्षयः स्वरन्वविंदन् इति॥ तत्वज्ञानात्प्राचीनस्य भूमिकात्रयस्य तपस्त्वे
सति तत्वज्ञानस्योत्तरकालीनस्य निर्विकल्पसमाधिरूपस्य पंचम्या

- सुवरन्वविंदन् = २

जीव दिभक्तिभिर्विसस्य तपस्त्वं कैमुतिकन्यायेन सिद्धं। अत एव स्मर्यते। मनसश्चें
द्रियाणां चैकाग्र्यं परमं तपः। तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यत इति।
यद्यप्यनेन न्यायेन तपसा प्राप्यं जन्मांतरं नास्ति तथापि लोकसंग्रहा
येदं तप उच्यते। अत एव भगवानाह। लोकसंग्रहमेवापि संपश्यन्कर्तुम
र्हसीति। संग्राह्यश्च लोकस्त्रिविधः। शिष्यो भक्तस्तटस्थश्चेति। तत्र शि
ष्यस्यांतर्मुखयोगिनि गुरौ प्रामाणिककल्पबुद्ध्यतिशयेन तदुपदिष्टतत्त्वे
परमविश्वासं प्राप्य चित्तं सहसा विश्राम्यति। अत एव श्रूयते। यस्य दे
वे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महा
त्मन इति स्मर्यते च। श्रद्धावांल्लभते ज्ञानं तत्परः संयतेंद्रियः। ज्ञानं

९६

लब्ध्वा परं शांतिमचिरेणाधिगच्छतीति॥ अन्नप्रदाननिवासस्थानकल्प
नादिना योगिनं सेवमानो भक्तस्तदीयं तपः स्वयमादत्ते। तथा च श्रूयते॥
तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति। तस्
यापि द्विविधः आस्तिको नास्तिकश्चेति। तत्रास्तिको योगिनः सन्मा
र्गाचरणादेव स्वयमपि सन्मार्गं प्रवर्त्तते। तथा च स्मृतिः। यद्यदाच
रति श्रेष्ठस्तत्तदेवेतरो जनः॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तत इति॥
नास्तिकोपि योगिना दृष्टः पापान्मुच्यते तदुक्तं। यस्यानुभावपर्यंता
तत्वे बुद्धिः प्रवर्त्तते। तद्दृष्टिगोचराः सर्वे मुच्यंते सर्वपातकैरिति। अ
नेन प्रकारेण सर्वप्राण्युपकारित्वं विवक्षित्वा प्रकृते। कुलं पवित्रं जननी

जीवः कृतार्था वसुंधरा पुण्यवती च तेन। अपारसंवित्सुखसागरेऽस्मिन् लीनं परे
ब्रह्मणि यस्य चेतः इति। न केवलं योगिनः शास्त्रीयव्यवहारस्य न परत्वं किंतु
सर्वस्यैव लौकिकव्यवहारस्यापि तस्मात्तैत्तिरीयाः स्वशाखायामंति
मेनानुवाकेन विदुषोऽपि महिमानमामनंति तस्मिन्ननुवाके पूर्वभा
गे योगिनोऽवयवा यज्ञांगत्वेनाम्नाताः तस्यैवं विदुषो यज्ञस्यात्मा यजमा
नः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः
काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्रा
ण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीदिति। अत्र दानं दक्षिणेति
परमध्याहर्तव्यं। अथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षि

म ९९

दि४

५५२

षोतिष्टोमेऽग्न्याहितत्वात् ॥ उक्तानुवाकेन मध्यमभागेन योगिव्यवहारस्तज्जीवन
कालाश्च ज्योतिष्टोमावयवक्रियात्वेनोत्तरत्र सर्वयज्ञावयवक्रियारूपत्वेन चा
दी२ म्नाताः याविद्धि यतेऽस्तोऽक्षायदग्न्याहितं तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते
तदुपसद्यो यत्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो याव्या
हृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यं
अ४ दिनं च सायं च तानि सवनानि ये होरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च
ते चातुर्मास्यानि य ऋतवस्ते पशुबंधाः ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः
सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ इति ॥ सर्ववेदसं सर्वस्वदक्षिणकं ॥ अ
नेन तच्छेषेन र्भरिकृता होरात्रादि वत्सरांतं सर्वकालसमष्ट्युपलक्षितं योगिनः आ

परि वी

१४

जी०

पूर्वविवक्षयेतेत्यर्थः। एवं पुत्रेभ्यस्तत्त्वं दक्षिणोपेतं तंत्रमित्यर्थः॥ उत्तरानुवाके चरमभागे
नसर्वयज्ञात्मकं योगिनमुपासीनस्य क्रममुक्तिरूपं सूर्याचंद्रमसोः कार्यकारण
ब्रह्मणोस्तादात्म्यलक्षणं फलमाम्नायते॥ एतद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वा
नुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं सलोकतां गच्छति
अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चंद्रमसः सायुज्यं सलोकता

नो॰ मोति ... एतौ वै सूर्याचंद्रमसौ महिमानौ ब्राह्मणो महिमानमित्युपनिषदिति॥ ज

रामरणावधिकं यत्तु योगिचरितमस्ति तद्धै होत्राग्निहोत्रादिसंवत्सरसत्रांतकर्म

१००

स्वरूपमित्येवमुपासीनो भावनातिशयेन सूर्याचंद्रमसोः सायुज्यं तादात्म्यं प्राप्नोति

८।२

भावनामांद्येन समानलोकं प्राप्य तस्मिंल्लोके सूर्याचंद्रमसोर्विभूतिमनुभूय तत्त

+ दित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा ५
+ विद्वानाभिजयाति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो ४

तुर्ध्वं सत्यलोके चतुर्मुखस्य ब्रह्मणो महिमानमाप्नोतीति तत्रोत्पन्नतत्वज्ञानेन तदूर्ध्वं सत्य
ज्ञानानंदरूपस्य ब्रह्मणो महिमानं कैवल्यमाप्नोति" इत्युपनिषदित्यनेन यथोक्तविधा
नर यास्तत्वतिपादकग्रंथस्योपसंहारः क्रियते" तदेवं जीवन्मुक्तेस्तपोरूपं द्वितीयं प्रयोज
सिद्धं ।। नं विसंवादाभावस्तृतीयं प्रयोजनं" न खल्वंतर्मुखे बाह्यव्यवहारं पश्यति योगीश्वरे अर
लौकिकोः लौकिकः तेषां कोवा कश्चिद्विसंवदते" विसंवादो द्विविधः कलहरूपो निंदारूपश्च" तत्र
क्रोधरहितेन योगिना सह कथं नाम लौकिकः कलहायेत न ह्याहित्यं स्मर्य्यते" क्रुध्यंतं न
प्रतिक्रुध्येदाकृष्टः कुशलं वदेत्" अतिवादांस्तितिक्षेत नावमन्येत कंचनेति" ननु जी
वन्मुक्तेः प्राचीनो विद्वत्संन्यासस्ततोपि प्राचीनं तत्वज्ञानं तस्मादपि प्राचीनो विविदिषासं
न्यासः" अत्रैतेन क्रोधादिराहित्यधर्माः कथं स्मृता इति चेत्" बाढं" अत एव जीवन्मुक्तस्य

जीव०

कोधारयः शांकितुमंशाक्याः॥ अत्यर्वाचीनपदेपि विविदिषासंन्यासेपि यद्यकोधाद
योनसंतितस्योत्तमेपदे तत्वज्ञाने कुतस्तोस्युः॥ कुतस्तरां विद्वत्संन्यासे कुतस्तमां च जीव
न्मुक्तौ॥ अतो न योगिना सह लौकिकस्य कलहः संभवति नापि निंदारूपो विसंवादः
शंकनीयो निंद्यत्वस्यानिश्चितत्वात्॥ तथा च स्मर्यते॥ यो न संतं न चासंतं नाश्रुतं न ब
हुश्रुतं॥ न सुवृत्तं न दुर्वृत्तं वेदकश्चित्स वै यतिरिति॥ सदसत्वेउत्तमाधमजातिरिति॥ तै
र्थिकोपि किं शास्त्रमर्मये विसंवदतो किंवा योगिचरिते॥ आद्येपि न तावत्योगी परशास्त्र
ममेयं दूषयति तमेवैकं विजानथ आत्मानमन्या वाचो विमुंचथ॥ नानुध्यायाद्बहुञ्छ
ब्दान्वाचो विग्लापनं हि तदित्यादिशास्त्रस्यानुरोधात्॥ नापि स्वशास्त्रमर्मेयं प्रतिवादिनो
ऽसमर्थयते॥ पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः॥ परमं ब्रह्म विज्ञाय उल्का

१०१

न्तानन्दमुत्सृजेदित्यादिश्रुत्यर्थपरत्वात् ॥ यदीयं प्रतिवादिनमपि स्वात्मतया वीक्ष्यते तेन दा
विजिगीषायाः का कथा नापि लोकायतिकव्यतिरिक्तः सर्वोपि तीर्थिको मोक्षसंगी ऊर्ध्व
न योगीश्वरितेपि विसंवदितुमर्हति ॥ आर्हतबौद्धवैशेषिकनैय्यायिकशैववैष्णवशा
कसांख्ययोगादिमोक्षशास्त्रप्रणेतृप्रमेयस्य नानाविधत्वेपि मोक्षसाधनस्य यमनियमा
द्यष्टांगयोगस्यैकविधत्वात् ॥ तस्मादविवादेन सर्वसंमतो योगीश्वरः ॥ एतदभिप्रेत्य व
सिष्ठ आह ॥ यस्येदं जन्म पाश्चात्यं तमाशु वमहामते ॥ विशंति विद्या विमला मुक्ता वेणुमि
वोत्तमं ॥ आर्यता हृद्यता मैत्री सौम्यता मुक्तता ज्ञता ॥ समाश्रयंति तं नित्यं मंतःपुरमि
वांगनाः ॥ पेशलाचारमधुरं सर्वे वांछंति तं जनाः ॥ वेणुं मधुरनिर्ध्वानं वने वनमृगा इवैं ॥ मु
मुक्तत्वसंशमितभाववृत्तीनास्थितः सदाजाग्रति येन चेतसा ॥ कलान्वितो विधुरिव यः

सं ५

वेदि

सदा बुधैर्न लिप्यते मुक्त इतीह सत्स्मृतयः" मा नरीवत्रामं यांति विषमानि मृदूनि च" वि
श्राम्यन्ति महान्ति तानि सर्वाणि समशालिनि" तपस्विषु बहुज्ञेषु याजकेषु न
पेषु च नलेवत्सुगुणाक्षेषु ग्रामवानेव राजते इति नैव मबाधं जीवन्मुक्ते विसंवादाभा
वरूपततीयप्रयोजनं सिद्धं" दुःखनाशसुखाविर्भावरूपे चतुर्थपंचमरूपे प्रयोजने वि
धानेदात्मकेन अस्मानंदरगतेन चतुर्थाध्यायेन निरूपिते तदुभयमत्र संक्षिप्योच्यते।
आत्मानं चेद्विजानीयादयमस्मीति पुरुषः" किमिच्छन्कस्य कामाय शरीरमनुसंज्व
रेत" इत्यादिश्रुत्या दुःखस्यैहिकस्य विनाश उक्तः" एतं ह वाव न तपति किमहं साधु
नाकरवं किमहं पापमकरवमित्यादिश्रुतयः आमुष्मिकहेतु पुण्यपापचिंतारूपस्य दु
खस्य नाशमाहुः" सुखाविर्भावस्त्रेधा सर्वकामावाप्तिः कृतकृत्यत्वं प्राप्तप्राप्तव्यत्वं चे

१०२

ति॥ सर्वकामावाप्तिस्त्रेधा॥ सर्वसाक्षित्वं सर्वज्ञाकामहतत्वं सर्वभोक्तृरूपत्वं चेति॥ हिर
ण्यगर्भादिस्थावरांतेषु देहेषु अनुगतं साक्षिचैतन्यरूपं यद्ब्रह्म तदेवास्मीति जानतः स्व
देहवत्परदेहेष्वपि कामसाक्षित्वमस्तीति तदेतदभिप्रेत्य श्रूयते॥ सोऽश्नुते सर्वान्कामान्सह
ब्रह्मणा विपश्चितेति॥ लोके भुक्तेषु भोगेषु अकामहतत्वं यत्तत्कामप्राप्तिरुच्यते तथा च ॰सा
सर्वभोगदोषदर्शिनः तत्त्वविदः सर्वज्ञाकामहतत्वादस्ति सर्वकामावाप्तिः॥ अतएव सा
र्वभौमोपक्रमेषु हिरण्यगर्भपर्यंतेषु उत्तरोत्तरमानंदगुणेषु आनंदेषु श्रोत्रियस्य चा
कामहतस्येति श्रुतिः सद्रूपेण चिद्रूपेणानंदरूपेण सर्वत्रावस्थितं स्वात्मानमनुसंदध
तः सर्वभोक्तृत्वमस्तीत्यभिप्रेत्यैवं श्रूयते अहमन्नं अहमन्नादः इति कृतकृत्यत्वं तु
स्मर्यते॥ ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः॥ नैवास्ति किंचित्कर्तव्यमस्ति चे

न्नसततविलापयत्वात्मरतिरेवस्यादात्मतृप्तश्च मानवः॥ आत्मन्येव च संतुष्टस्तस्य का
र्यं न विद्यते इति॥ मा समा सह्य नाश्रयते॥ अभयं वै जनक प्राप्तोसीति॥ तस्मात्तत्सर्वमभवदिति
ब्रह्म वेद ब्रह्मैव भव तीति च॥ नन्वेतौ द्वौ दुःखविनाशसुखाविर्भावौ तत्त्वज्ञानेनैव॥
सिद्धत्वान्न जीवन्मुक्तिप्रयोजनमर्हतः॥ मैवं॥ सुरक्षितत्वयोस्तयोरत्र विवक्षितत्वात्॥ यथा
तत्त्वज्ञानं पूर्वमेवोत्पन्नमपि जीवन्मुक्तौ सुरक्षितं भवति एवमेतावपि सुरक्षितौ तौ
भवतः॥ नन्वेवं जीवन्मुक्तेः पंचप्रयोजनत्वे सति समाहितो योगीश्वरो लोकव्यवहारं
कुर्वन्तः तत्त्वविदोपि श्रेष्ठ इति वक्तव्यं तच्च प्रश्नोत्तराभ्यां निराकृतं॥ श्रीरामः॥ भगव
न् भूतभव्येश कश्चिज्ज्ञातसमाधिकः प्रबुद्ध इव विश्रांतो व्यवहारपरोपि सन्॥ क
श्चिदेकांतमाश्रित्य समाधिनियतस्थितः॥ तयोस्तु कतरः श्रेयानिति मे भगवन्वद

वसिष्ठ उवाच॥ इमं गुणसमाहारमनात्मत्वेन पश्यतः॥ अंतःशीतलतायासो समा
धिरिति कथ्यते॥ इदं येनेम मसंवंधइति निश्चितस्य शीतलः॥ कश्चित्संव्यवहारस्थः कश्चि
द्ध्यानपरायणः॥ द्वावेतौ राम सुसमौ चेतश्चेत्परिशीतलौ॥ अंतःशीतलतायास्यात्तदनं
ततपःफलमिति नैष दोषः॥ अज्ञवासनाक्षयरूपत्वेसत्यंतःशीतलत्वमवश्यं संपा
दनीयमित्येतदेव संपाद्य तेन तु नदंतभाविनो मनोनाशस्य श्रेष्ठत्वं निवार्य्यते॥ शी
तलत्वं तस्यायाः शमनमिति तादृशीं विवक्षां स्वयमेव स्पष्टीचकार॥ अंतःशीतलता
यां तु लब्धायां शीतलं जगत् अंतस्तृष्णोपतप्तानां दावदाहमयं जगदिति॥ ननु समा
धिनिंदा व्यवहारप्रशंसा चाचोपलभ्यते॥ समाधिस्थानकस्थस्य चेतश्चेद्वृत्तिचंचलं॥
तत्तस्य तु समाधानं सममुन्मत्ततांडवैः॥ उन्मत्ततांडवस्थस्य चेतश्चेत्क्षीणवासनं॥ त

जीव०

दस्यो तेनेन त्वं तु समं ब्रह्म समाधिनेति मेवं ॥ अत्र हि समाधि माहात्म्यमंगीकृत्य वास
नानिवृत्तेरयं नत्र व्यक्तिः ॥ यद्यपि व्यवहारात्तु समाधिः प्रशस्तस्तथाप्यसौ सवास
नश्चेत्तदा निर्वासिना व्यवहारादधः । सवासनः समाधिः यदि समाहितव्यवह
र्ताराप्युभावपि अत एवन्तौ सवासनौ च तत्र समाधेरुत्तमत्वोक्तं माहिते तु ॰ ण्यत्वेन
माहात्म्यं ॥ प्रज्ञानभूमौ ज्ञाननिष्ठो निर्वासनो तत्रापि वासनाक्षयरूपां जीवन्मु
क्तिं परिपालयन्नमनोनाशरूपसमाधिः प्रशस्त एव तस्माद्योगीश्वरस्य श्रेष्ठत्वा
त्तं च प्रयोजनोपेता या जीवन्मुक्तेर्न कोपि विघ्न इति जीवन्मुक्तिप्रकरणं स्वरूपप्रमा
णसाधनप्रयोजनैर्जीवन्मुक्तिर्निरूपिता अथ तदुपकारिणं विद्वत्संन्यासं निरूपयामो
विद्वत्संन्यासश्च परमहंसोपनिषदि प्रतिपादितः ॥ तां चोपनिषदमेनुध्याख्यास्या

स्त०२

म॰ तन्त्रातो विद्वत्संन्यासयोग्यं प्रश्नमवतारयति अथ योगिनां परमहंसानां कोयं मा
र्गस्तेषां कास्थितिरिति नारदो भगवंतमुपगत्योवाचेति ॥ यद्यप्यत्र शास्त्रापेक्षितआ
नंतर्य्यप्रतियोगी न कोप्यत्र प्रतिभाति तथापि दृष्टव्यार्थोत्र विद्वत्संन्यासः तस्मिंश्च वि
दिततत्त्वो लोकव्यवहारे विक्षिप्यमाणो मनोविश्रांतिं कामयमानोधिकारी अतस्ता
दृशाधिकारसंपत्त्यानंतर्य्यमथशब्दार्थः केवलयोगिनं केवलपरमहंसं च वारयितुं प
दद्वयमुक्तं ॥ केवलयोगी तत्त्वज्ञानाभावेन त्रिकालज्ञानाकाशगमनादिषु योगैश्व
र्य्यचमत्कारव्यवहारेष्वासक्तः संयमविशेषैस्तत्र तत्रोद्युक्तः ततः परमपुरुषार्थाद्भ्र
ष्टो भवति ॥ तस्मिन्नर्थे सूत्रं पूर्वमेवोदाहृतं ते समाधावुपसर्गा व्युत्थाने सिद्धय इति
केवलपरमहंसस्तु तत्त्वविवेकेनैश्वर्य्येष्वसारतां बुध्वा विरज्यति ॥ तदप्युदाहृतं वि

गुअभि गमने इति धातोरयं प्रयो
गः उद्योगं करोतीत्यर्थः = पा॰

जीव०

ऽात्मन्यस्मादस्यं प्रस्फुरन्ति हि ज्ञातव्यः ॥ इत्यस्याश्चर्यजालेषु नाभ्युदेति कुतूहलमिति ॥ वि
रक्तोप्यसौ ज्ञातविद्या ईरेण विधिनिषेधावुल्लंघयति ॥ तदुक्तं ॥ निस्त्रैगुण्ये पथि विचरतां
को विधिः को निषेध इति तथा च ब्रह्मज्ञालवः शिष्टान्तमेव निर्दंति ॥ सर्वं ब्रह्म वदिष्यन्ति सं
प्राप्ते च कलौ युगे ॥ नानुतिष्ठन्ति मैत्रेय शिश्नोदरपरायणा इति ॥ योगिनि तु परमहंसे
दोषद्वयं नास्ति अन्योप्यस्याभिप्रायः प्रश्नोत्तराभ्यां दर्शितः । श्रीराम उवाच एवं
स्थितेपि भगवन् जीवन्मुक्तस्य सन्मतेः अपूर्वोतिशयः कोसौ भवत्यात्मविदांवर
वसिष्ठ उवाच ॥ ज्ञस्य कस्मिंश्चिदेवांश भवत्यभिप्रायेन धीः ॥ नित्यतृप्तः प्रशान्तात्मा स्व
आत्मन्येव तिष्ठति ॥ मंत्रसिद्धस्तपःसिद्धयोगसिद्धश्च भूरिशः ॥ कृतमाकाशयाना
दि तत्र का स्यादपूर्वता ॥ एकरीव विशेषोस्य न सम्मोमूढबुद्धिभिः सर्वत्रैस्यापरित्या

२०५

ता

श्री

गान्नीरागममलं मनः ॥ एतावदेव खलु लिंगमलिंगमूर्त्तेः संसांशांतसंस्तुतिचिरभ्रि
मनिर्वृतस्य तत्तस्य यन्मदनकोपविषादमोहलोभापदामनुदिनं निपुणं तनुत्व
मित्यनेनातिशयेनोपेतानां दोषद्वयरहितानां मार्गस्थितीरुच्छेते ॥ देशभाषादि
रूपो हि बाह्यव्यवहारो मार्गः चित्तोपरमरूप आंतरो धर्मः स्थितिर्भगवांश्चतुर्मु
खीय पृष्टोत्तं प्रश्नोत्तरमवतारयति ॥ तं भगवानाहेति ॥ वक्ष्यमाणमार्गमश्रद्धां मुत्सा
दयितुं मार्गप्रशंसति ॥ योयं परमहंसमार्गो लोके दुर्लभतरो न तु बाहुल्य इति ॥
यः पृष्टः सोयमिति योजना ॥ अयमिति त्युत्तरे ग्रंथे वक्ष्यमाणः आच्छादनादिसु
शरीरोपभोगैर्लोकोपकारैश्च निरपेक्षो मुख्यो मार्गः परामृश्यते ॥ तादृशस्य पर
मकाष्ठां प्राप्तस्य वैराग्यस्यादृष्टचरत्वात्तस्य मार्गस्य दुर्लभतरत्वं न चैतावता

ब्रह्मा ५ तं ५ तिशयः ५

न २ ण २

209

जीव॰

स्यंताभावः शंकनीय इत्यभिप्रेत्य बाहुल्यमेव प्रतिषिध्यते॥ ननु बाहुल्यं इति लिंगव्य
त्ययश्छांदसः॥ ननु अयं मार्गो दुर्लभतरश्चेत्तर्हि तदर्थं प्रयासो न कर्त्तव्यः॥ तेन प्रयो
जनाभावादित्याशंक्याह॥ यद्येकोपि भवति स एव नित्यपूतस्थः स एव वेदपुरुष इ
ति विदुषो मन्यते इति॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये॥ यततामपि सिद्धा
नां कश्चिन्मां वेत्ति तत्त्वतः इति न्यायेन यत्र क्वापि यद्येको योगी परमहंसो यः कश्चि
द्भवति स एव नित्यपूतस्थो भवति॥ नित्यपूतः परमात्मा य आत्मा अपहतपाप्मेति
श्रुतेः॥ एवकारेण केवलयोगी केवलपरमहंसो व्यावर्त्यते केवलयोगी नित्यपू
तं न जानाति केवलपरमहंसो जानन्नपि चित्तविश्रांत्यभावाद्बहिर्मुखो ब्रह्मणि
न तिष्ठति॥ वेदप्रतिपाद्यः पुरुषो वेदपुरुषः विद्वांसो ब्रह्मानुभववित्तविश्रांति प्रतिपा

कदा

२०८

विदुषो॰

रकशास्त्रपारंगता॥ योगिनः परमहंसस्य ब्रह्मनिष्ठत्वं सर्वैर्जनामन्यंते॥ यथोक्तविद्वां
सस्तु तदप्यसहमानां ब्रह्मत्वमेवमन्यंते॥ तथा च स्मर्य्यते॥ दर्शनादर्शने हित्वा स्वयं के
वलरूपतः॥ यस्तिष्ठति स तु ब्रह्मन्न ब्रह्मा न ब्रह्मवित्स्वयमिति॥ अतो न प्रयोजनाभा
वः शंकितुमपि शक्यते॥ नित्यभूतस्थूलत्वं वेदपुरुषत्वैश्च मुखतो विशदयन्नर्थाख्या
स्या ५ स्थितिरिति प्रश्नो॥ नरसत्वयति॥ महापुरुषोऽयं च्छित्तं तत्सदामप्येवावतिष्ठति ना
स्मादहं च तस्मिन्नेवावस्थितः इति वैदिकज्ञानकर्माधिपुरुषेषु मध्ये योगिनः परमहं
सस्यात्यंतमुक्तमत्वान्महापुरुषत्वं स च महापुरुषोऽयं च्छित्तं स्वकीयं तत्सदामप्येवा
वस्थापयति॥ संसारगोचराणां तद्विषयचित्तवृत्तीनामभ्यासवैराग्याभ्यां निरुद्धत्वात्।
अत एव भगवान्प्रजापतिः शास्त्रसिद्धं परमात्मानं स्वानुभवेन परामृशन्नयमीति व्यो

स्यो ५

कारि ६

जीव०

पदिशति "यस्माद्योगीमध्ये वर्तिन मम वस्थापयति तस्मादहमपि परमात्मस्वरूपत्वे
न तस्मिन्नेव योगिन्याविर्भूतो वस्थितो स्मिन्नेतरेषु अज्ञानिषु तेषाम विद्यावृतत्वात्तत्व
वित्स्वपि अयोगिषु वा स्वचित्तवृत्तिनिरोहतत्वात्स्याविर्भाव:" इदानीं कोयं मार्ग इति
पृष्टं मार्गमुपदिशति "असौ स्वपुत्रमित्रकलत्रबंधादीन् शिखायज्ञोपवीते स्वाध्या
यं च सर्वकर्माणि संन्यस्यायं ब्रह्मांडं च हित्वा कौपीनं दंडमाच्छादनं च स्वशरीरोपभो
गार्थाय लोकस्योपकारार्थाय च परिग्रहेदिति" यो गृहस्थ: पूर्वजन्मसंचितपुण्यपुं
जे परिपक्वे सति मातापितृज्ञात्यादिनानिमित्तेन विदिशासंन्यासरूपं परमहंसाश्र
मम स्वीकृत्य श्रवणादिसाधनान्यनुष्ठाय तत्वं सम्यग्वेत्ति" ततो गार्हस्थ्या श्रा
मे लौकिकवैदिकव्यवहारसहस्रे शिन्ने विक्षिप्ते सति विश्रांतिसिद्धये विद्वत्संन्या

श्रा३ १०८ जे४ स्य

वि२ ग२

चित्त २

= शीतोष्णयोरप्रतीतयोस्तज्जन्यः सुखदुःखयोर = भावउपलब्धः =

नमानेनाख षडूर्मिविवर्जितमिति॥ निरुद्धाशेषचित्तवृत्ते र्योगिनः शीतं नास्ति तस्य त्वग्भा वात्॥ यथा लीलायामासक्तस्य बालस्याछादनादिरहितस्यापि हेमंतशिशिरयोः प्रातः कालेशीतं नास्ति तथा परमात्मासक्तस्य योगिनः शीताभावः घर्मकालेउष्णाभावश्च तथैवावगंतव्यः॥ वर्षाभावसमुच्चयार्थश्चकार॥ शीतोष्णयोरप्रतीतो तज्जन्ययोः सुखदुःखयोरभावउपपन्नः॥ निदाघे शीतं सुखजनकं हेमंते दुःखजनकं उक्तविपर्ययउष्णेद्रष्टव्यः॥ मानः पुरुषांतरेण संपादितः सत्कारः॥ अवमानस्तिरस्कारः॥ यदा योगिनस्स्वात्मव्यतिरिक्तपुरुषांतरमेव न प्रतीयते तदा मानावमानौ हरादृश्येतौ॥ चकारः शत्रुमित्ररागद्वेषादिद्वंद्वाभावं समुच्चिनोति॥ षडूर्मयः क्षुत्पिपासे शोकमोहौ जरामरणे चेति तेषां त्रयाणां द्वंद्वानां क्रमेण प्राणमनोदेहधर्मत्वात् तदात्मतत्वाभिमुखस्य

१०

८५

५१

जीव० योगिनस्तद्दर्शनं युज्यते॥ ननु अस्त्वेवं समाधिदशायां शीताद्यभावः व्युत्थानदशायां तु नि-
द्रादिक्लेशः संसारिणामिवैनं बाधत एवेत्याशंक्याह॥ निद्रागर्वमत्सरदंभदर्पेच्छाद्वेषसुखदुः-
खकामक्रोधलोभमोहहर्षासूयाहंकारादींश्च हित्वेति विविधैः पुरुषैः स्वस्मिन्नापादि-
तदोषोक्तिर्निंदा॥ अन्येभ्योऽधिकोऽहमिति चित्तवृत्तिर्गर्वः॥ विद्याधनादिभिरस्य सदृशो भ-
वामीति बुद्धिर्मत्सरः॥ परेषामग्रे जपध्यानादिप्रकटनं दंभः॥ भर्त्सनादिषु दृढबुद्धिर्द- २२२
र्पः॥ धनाद्यभिलाष इच्छा॥ शत्रुवधादिबुद्धिर्द्वेषः॥ अनुकूलद्रव्यादिलाभेन बुद्धिस्वास्थ्यं
सुखं तद्विपर्ययो दुःखं॥ योषिदाद्यभिलाषः कामः॥ कामितार्थविघातजन्यो बुद्धिक्षो-
भः क्रोधः॥ लब्धस्य धनस्य त्यागासहिष्णुत्वं लोभः॥ हितेष्वहितबुद्धिरहितेषु हितबुद्धि-
र्मोहः॥ चित्तगतसुखाभिव्यंजिका मुखविकासादिहेतुर्धीवृत्तिर्हर्षः॥ परकीयगुणेषु दो-

घत्वारोपणमस्यां देहेंद्रियसंघाते स्वात्मत्वभ्रमोहंकारः॥ आदिशब्देन भोग्यवस्तुषु मम
मकारः समीचीनत्वादिबुद्ध्योः स्थाने॥ चकारो यथोक्तनिंदादिविपरीतं स्तुत्यादिकं
समुच्चिनोति॥ एतान्सर्वान्निंदादीन्हित्वा पूर्वोक्तवासनाक्षयाभ्यासेन परित्यज्यावति
ष्टतेतिशेषः॥ ननु विद्यमाने स्वदेहे तत्परित्यागो न संभवतीत्याशंक्याह॥ स वपुः कु
णपमिव दृश्यमानेयतस्तद्वपुरपध्वस्तमिति॥ पूर्वं यत्स्वकीयं वपुस्तदिदानीं योगिनाम्
स्वात्मचैतन्यात्पृथग्भूतत्वेन कुणपमिवावलोक्यते यथा श्रद्धालुः स्वशरीभीत्यां शव
देहं दूरे स्थितोवलोकयति॥ तथायं योगी तादात्म्यभ्रांत्युदयभीत्या सावधानो देहं वि
हात्मनः सकाशान्निरंतरं विविनक्ति॥ यतः कारणात् तद्वपुराचार्योपदेशागमानुभवैर
पध्वस्तं विहात्मनः सकाशान्निराकृतं॥ ततश्चैतन्यविमुक्तस्य देहस्य शवतुल्यत

215

जीव०

यादृश्यमानत्वात्सत्यपि देहे निद्रादित्यागो घटत इत्यभिप्रायः॥ ननु त्वन्नोदितक्रमः
सर्पादियद्दर्शनेन विनष्टोपि यथा कदाचिन्नुद्वर्त्तते॥ तथा कदात्मनि देहात्मत्वसंश्र चि
याद्यनुवृत्तौ निद्रादिक्लेशः पुनः पुनः प्रसज्जेतेत्याशंक्याह॥ संशयविपरीतमिथ्यात्मज्ञा
नानां यो हेतुस्तेन नित्यनिरत इति॥ आत्मा कर्त्तृत्वादिधर्मोपेतस्तद्रहितो वेत्यादिकं संश्र
यज्ञानं देहादिरूप एव आत्मेति विपरीतज्ञानं एतदुभयं कर्त्तृभोक्तृत्वविषयं मिथ्याज्ञा ११२
नं तु भोग्यत्वविषयमिति विवक्षितं॥ तच्चानेकविधं संकल्पप्रभवान्कामानित्यत्रस्प
ष्टीकृतं तदेतच्चतुर्विधं॥ अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिर
विद्येति सूत्रणात्॥ अनित्ये गिरिनदीसमुद्रादौ नित्यत्वभ्रांतिरेका॥ अशुचौ पुत्रभार्या
दिशरीरे शुचित्वभ्रांतिर्द्वितीया॥ दुःखे कृषिवाणिज्यादौ सुखत्वभ्रांतिस्तृतीया॥ गोणमि

ले५

ध्यात्मनि पुत्रभार्यादौ अन्नमयादौ अनात्मनि मुख्यात्मत्वभ्रांतिः चतुर्थी॥ एतेषां संश
यादीनां हेतुरद्वितीयब्रह्मात्मतत्वावरकमज्ञानं तद्वासना च॥ तत्राज्ञानं योगिनः प
रमहंसस्य महावाक्यार्थबोधेन निवृत्तं॥ वासना तु योगाभ्यासेन निवृत्ता॥ उदाहृता
यां दिग्भ्रांतावज्ञाने निवृत्तेपि वासनायाः सद्भावाद्यथापूर्वं व्यवहारः॥ योगिनो भ्रां भ्रांति
ति हेतुद्वयराहित्यात् कुतः संशयादीन्यनुवर्तेरन्॥ तमेवमनुवृत्त्यभावमभिप्रेत्याने
न हेतुद्वयेन योगी नित्यनिवृत्त इत्युक्तं॥ सत्यामपि अज्ञानतद्वासनानिवृत्तौ निवृत्तेर्वि
नाशाभावात् नित्यत्वं द्रष्टव्यं॥ तस्मिन्नित्यत्वे हेतुमाह॥ तन्नित्यबोध इति॥ सर्वनाम
त्वात्प्रसिद्धार्थवाचीतच्छब्दोत्र सर्ववेदांतप्रसिद्धं परमात्मानमाचष्टे॥ तस्मिन्परमात्म
नि नित्यबोधो यस्य योगिनः सोयं तन्नित्यबोधः॥ योगी हि विज्ञाय प्रज्ञां कुर्वीतेति श्रु

जीव०

तिमनुसृत्य चित्तविक्षेपानुयोगेन परिहृत्य नैरंतर्येण परमात्मविषयामेव प्रज्ञां क
रोति ॥ अतो बोधस्य नित्यत्वात् क्रोधविनाशयोरज्ञानतद्वासनयोर्निवृत्तिर्नित्येत्यर्थः ॥ बु
ध्यमानस्य परमानंदत्वात् किं केश्वरवत्तटस्थत्वं कां वारयति ॥ तत्त्वयमेवावस्थितिः ॥ तै
रिति ॥ यद्वेदांतवेद्यं परं ब्रह्मास्ति तत्त्वयमेव न तु तस्मादन्यदिति एवं निश्चित्य योगिनो व
स्थितिर्भवति ॥ तस्य योगिनो ब्रह्मानुभवप्रकारं दर्शयति ॥ तं शांतमचलमद्वयानंदवि
ज्ञानघन एवास्मि तदेव मम परमं धामेति ॥ तमित्यादिपदत्रये द्वितीया प्रथमार्थे द्रष्टव्या ॥
यः परमात्मा शांतः क्रोधादिविक्षेपरहितः अचलः गमनादिक्रियारहितः स्वगतसजा
तीयविजातीयद्वैतशून्यः सच्चिदानंदैकरसः स एवास्मि तदेव ब्रह्म न त्वं मम योगिनः
परमं धाम वास्तवस्वरूपं न त्वेतत्कर्तृत्वभोक्तृत्वादियुक्तं ॥ एतस्य मायाकल्पितत्वात् ॥

त्म

११३

मेद२ हम२

न्चात्मनः परब्रह्मत्वे आनंदावाप्तिरिदानीं कुतो नेत्यत्रानंदावाप्तिः सदृष्टांतमुक्तोयुक्तेः ॥ गवां सर्पिः शरीरस्थं [illegible]

यदि योगिनः पूर्वाश्रमप्रसिद्धा आचार्यापितृभ्रात्रादयः कर्मिणः श्रद्धाजडाः शिखाय
ज्ञोपवीतसंध्यावंदनराहित्येन पाखंडित्वमारोपयंत्यामोहेयुस्तदानीं व्यामोहापनुत्त
ये योगिनो वर्तमाननिश्चयं प्रदर्शयति तदेव चैव शिखा न देवोपवीतं च परमात्मात्म
नोरेकत्वज्ञानेन तयोर्भेद एव विभ्रमः सा संध्येति यद्वेदांतवेद्यस्य परब्रह्मणो ज्ञा
नेन देवकर्मांगभूतबाह्यशिखायज्ञोपवीतस्थानीयं अन्ये च मंत्रद्रव्यलक्षणे कर्मां
गभूते च कारणाभ्यां समुच्छ्रियेते शिखाद्यंगसाध्यैः कर्मभिरुत्पन्नं यत्स्वर्गादिसुखं तत्स
र्वं ब्रह्मज्ञानेनैव लभ्यते विषयानंदस्य सर्वस्य ब्रह्मानंदलेशत्वात् एतस्यैवानंद
स्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः एतदेवाभिप्रेत्याथर्वणिका ब्रह्मोप
निषद्यामनंति सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः यदक्षरं परं ब्रह्म तत्सूत्र

[illegible]

८६

जीव०

त्रमितिधारयेत॥ सूचनात्सूत्रमित्याहुः सूत्रंनामपरंपदं॥ तत्सूत्रंविदितंयेनस
विप्रोवेदपारगः॥ येनसर्वमिदंप्रोतंसूत्रेमणिगणाइव॥ तत्सूत्रंधारयेद्योगीयोगवि
त्तत्वदर्शिवान॥ बहिःसूत्रंत्यजेद्विद्वान्योगमुत्तममास्थितः ब्रह्मभावमिदंसूत्रंधार
येद्यःसचेतनः॥ धारणात्तस्यसूत्रस्यनोच्छिष्टोनाशुचिर्भवेत॥ सूत्रमंतर्गतंयेषांज्ञानय
ज्ञोपवीतिनां॥ तेवैसूत्रविदोलोके तेचयज्ञोपवीतिनः॥ ज्ञानशिखाज्ञाननिष्ठाज्ञान
यज्ञोपवीतिनः॥ ज्ञानमेवपरंतेषांपवित्रंज्ञानमुच्यते॥ अग्नेरिवशिखानान्यायस्यज्ञा
नमयीशिखा॥ सशिखीत्युच्यतेविद्वान्नेतरेकेशधारिणः॥ कर्मण्यधिकृतायेतुवै
दिकेब्राह्मणादयः॥ तेर्विधार्यमिदंसूत्रंक्रियांगंतद्धिवैस्मृतं॥ शिखाज्ञानमयीय
स्योपवीतंचतन्मयं॥ ब्राह्मण्यंसकलंतस्यइतिब्रह्मविदोविदुः॥ इदंयज्ञोपवीतं

१२६

= जीवा = २

तु परमं यत्परायणं॥ विद्वान् यज्ञोपवीती स्यात् तज्ज्ञास्तं यज्विनं विदुरिति॥ तस्माद्योगिनः

यथा २ शिखायज्ञोपवीते विधेते॥ तथैव संध्यापि विधीयते यः शास्त्रगम्यः परमात्मा यश्चाहंप्रत्यय

ग [illegible] मौनैः संगात्मा तयोरेकत्वज्ञानेन महावाक्यजन्येन भ्रांतिप्रतीतोभेदो विशेषे

ण भग्न एवं पुनर्भ्रांत्यनुदयो भंगस्य विशेषः॥ येयमेकत्वबुद्धिः सैयमुभयोरात्मनोः सं

धीनायमानत्वात्संध्येत्युच्यते॥ अहोरात्रयोः संधावनुष्ठेया क्रिया यथा संध्या न तद्वत्॥

एवं वसति योगी श्रद्धाजडैर्न व्यामोहयितुं शक्यः॥ कोयं मार्ग इति प्रश्नस्यासौ स्वपुत्रेण

त्यादिनोत्तरमुक्तं॥ कास्थितिरित्येतस्य महापुरुष इत्यादिना संक्षिप्योत्तरमुक्त्वा सं

न्यासविपरीतेत्यादिना तदेव प्रपंच्येदानीमुपसंहरति॥ सर्वान्कामान्परित्यज्याद्वैते प

रमे स्थितिरिति॥ क्रोधलोभादीनां कामपूर्वकत्वात्कामपरित्यागेन चित्तदोषांस्त्या

स्सर्वेपि परि

ज्यंते ॥ तं देवाभिप्रेत्यवाजसनेयिभिराम्नातं ॥ अथो खल्वाहुः काममय एवायं पुरुष
इति ॥ अतो निष्कामस्य योगिचित्तस्याहं ते निर्विघ्नास्थितिरुपपद्यते ॥ ननु दंडग्रहणवि
धिबलेनोपेलाबाहसविविदिषासंन्यासिनो योगिनं दंडरहितं परमहंसं नाभ्युपगच्छेती
त्याशंक्याह ॥ ज्ञानदंडो धृतो येन एकदंडी स उच्यते ॥ काष्ठदंडो धृतो येन सर्वाशी ज्ञानव
र्जितः ॥ स याति नरकान् घोरान् महारौरवसंज्ञकान् ॥ तितिक्षाज्ञानवैराग्यशमादिगु
णवर्जितः ॥ भिक्षामात्रेण यो जीवेत्स पापी यतिवृत्तिहा ॥ इदमेतरंता त्वासपरमहंसइ
ति ॥ परमहंसस्य यो यमेकदंडः स द्विविधः ज्ञानदंडः काष्ठदंडश्चेति ॥ यथा त्रिदंडिनो वा
ग्दंडो मनोदंडः कायदंडश्चेति त्रैविध्यं तद्वद्वाग्दंडादयो मनुना स्मर्यते ॥ वाग्दंडो थ मनो
दंडः कर्मदंडस्तथैव च ॥ यस्यैते नियता बुद्धौ स त्रिदंडीति चोच्यते ॥ त्रिदंडमेवं निक्षि

११५

प्य सर्वभूतेषु मानव ॥ कामक्रोधौ तु संयम्य ततः सिद्धिं निगच्छतीति ॥ तेषां स्वरूपं दक्षः
स्मरति ॥ वाग्दंडोथ मनोदंडः कर्मदंडस्तथैव च ॥ यस्यैते नियता दंडाः त्रिदंडीति स उच्य
ते ॥ वाग्दंडे मौनमातिष्ठेत् कर्मदंडे त्वनीहतां ॥ मानसस्य च दंडस्य प्राणायामो विधीयते
इति कर्मदंडो लघुभोजनमिति स्मृत्यंतरपाठः ॥ इह त्रिदंडत्वं परमहंसस्याप्युक्तं ॥ तदे
तदभिप्रेत्य पितामहः स्मरति ॥ यतिः परमहंसस्तु तुर्याख्यः श्रुतिचोदितः ॥ यमैश्च नि
यमैर्युक्तो विष्णुरूपी त्रिदंडभृदिति ॥ एवं सति मौनादीनां वागादिदमनहेतुत्वाद्यथा दं
डत्वं तथैवाज्ञानतत्कार्यदमनहेतोर्ज्ञानस्य दंडत्वं अयं ज्ञानदंडो येन परमहंसेन धृतः
स एकदंडीत्युच्यते ॥ मानसस्य ज्ञानदंडस्य कदाचिच्चित्तविक्षेपेण विस्मृतिः प्रस
ज्येतेति तन्निवारणार्थं स्मारकः काष्ठदंडो ध्रियते ॥ तदेतच्छास्त्रार्थरहस्यमबुध्वावेण

५०

जीव॰

मात्रेण पुरुषार्थसिद्धिमभिप्रेत्य काष्ठदंडो येन परमहंसे[illegible]न धृतः स पुरुषो बहुविध
यातनोपेतत्वात् घोरान् महारौरवसंज्ञकान् नरकानाप्नोति॥ तत्र हेतुरुच्यते॥ परमहंस
वेषं दृष्ट्वा ज्ञानित्वभ्रांत्या सर्वे जनाः स्वस्वगृहे तं भोजयंति॥ अयं च भिक्षालंपटो वर्ज्यावर्ज्य
विवेकमकृत्वा सर्वमन्नानि तेन प्रत्यवायं प्राप्नोति॥ यानि तु नान्नदोषेण मस्करी चातु
र्वर्ण्ये चरेद्भैक्ष्यमित्यादीनि वाक्यानि तानि ज्ञानिविषयाणि॥ अयं तु ज्ञानवर्जितत्वात् नियु
क्तो नरकः अत एव ज्ञानहीनस्य यतेर्भिक्षानियममाह मनुः॥ न चोत्पातनिमित्ता
भ्यां न नक्षत्रांगविद्यया॥ नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्॥ एककालं
चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे॥ भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जतीति॥ ज्ञानाभ्या
सिनं प्रति लेवं स्मर्यते॥ एकवारं द्विवारं वा भुंजीत परमहंसकः॥ येन केन प्रकारेण ज्ञा

स्य

११५

नाभ्यासी भवेत्स इति ॥ एवं स्मृतिज्ञानदंडकाष्ठदंडयोर्यदंतरं तदुत्तमाधमत्वरूपं त
द्विद्रमवगत्योत्तमं ज्ञानदंडं यो धारयति स एव मुख्यः परमहंस इत्यभ्युपगंतव्यं ॥ नन्व
मुख्यपरमहंसस्य ज्ञानदंडो माभूत् काष्ठदंडनिबंधनइतरानुचर्या सर्वा कीदृशी
त्यासंक्याह आशांबरो निर्नमस्कारो न स्वधाकारो न निंदा न स्तुतिर्यादृच्छिको भवेद्भि
क्षुर्नावाहनं न विसर्जनं न मंत्रं न ध्यानं नोपासनं न लक्ष्यं नालक्ष्यं न पृथक् नापृथ
क् न त्वाहं न त्वं न सर्वं चानिकेतस्थितिरेवं स भिक्षुः सौवर्णादीनां वैनैव परिग्रहेत् ॥ न
लोकं नालोकं चेति आशा दिशः ता एवांबरं वस्त्रमाच्छादनं यस्यासावाशांबरः य
त्तु स्मृतिवचनं ॥ जान्वोरूर्ध्वमधो नाभेः परिधायैकमंबरं ॥ द्वितीयमुत्तरं वासः परिधा
यगृह्णान्नरेदिति ॥ तदिदम योगिविषयं ॥ अत एव पूर्वं तत्र न मुख्योस्तीत्युक्तं ॥ यत्तु स्मृ

जीव०

त्यां तरं यो भवेत्पूर्वसंन्यासी तु स्मो वै धर्मनोयदि॥ तस्मै प्रणामः कर्त्तव्यो नेतराय कदाचने
ति॥ तस्याप्यनुविषयत्वान्नास्य नमस्कारः कर्त्तव्योऽस्ति॥ अत एव आस्मणलक्षणे निर्नम
स्कारमस्तुतिमित्युदाहृतं॥ यथा प्रयागादितीर्थेषु श्राद्धाज्ञाऽज्ञा स्नानस्वधाकारो निषि
ध्यते॥ पूर्वत्र निंदागर्वेत्यादिवाक्ये परैः कृतया स्वात्मनिंदया क्रोधो निवारितः॥ अत्र तु
स्वकर्त्तृकपरविषये निंदास्तुती निषिध्येते॥ यादृच्छिकत्वं निर्बंधराहित्यं॥ न कश्चिदपि व्यव
हारे निर्बंधं कुर्यात्॥ यस्तु देवपूजायां निर्बंधः स्मर्यते॥ भिक्षाटनं जपः शौचं स्नानं ध्यानं सुरा
र्चनं॥ कर्त्तव्यानि षडेतानि सर्वथा नृपदंडवदिति॥ तस्यायोगिविषयत्वमभिप्रेत्य नावा
हनमिति आम्नातं॥ सकृत्स्मरणं ध्यानं नैरंतर्येणानुस्मरणमुपासनमिति तयोर्भे
दः॥ यथा योगिनः स्तुतिनिंदादिलौकिकव्यवहाराभावः॥ यथावाहेवपूजादिधर्मत्राण

११८

५५

स्वव्यवहाराभावः॥ तथा लक्ष्यत्वादिज्ञानशास्त्रव्यवहारोपि नास्ति॥ यत्साक्षिचैतन्यमस्मि
स्मि तदिदं तत्त्वमसीति वाक्ये त्वंपदेन लक्ष्यं देहादिविशिष्टचैतन्यं लक्ष्यं न भवति किं
तु वाच्यं तच्च वाच्यं तत्सहार्थास्य पक्वात्लक्ष्यत्वं तत्सहार्थादि पृथक्॥ स्वदेहनिष्ठो वाच्योर्थो
हमिति व्यवहारार्हः॥ परदेहनिष्ठस्त्वमिति व्यवहारार्हः॥ लक्ष्यं वाच्यमित्युभयविधचैत
न्यापेतमन्यत्तु दृंजगत्सर्वमिति व्यवहारार्हमित्येतादृशोपि कश्चन कोपि योगिनोस्ति॥
तुरीयचित्तस्य ब्रह्मणि विश्रान्तत्वात्॥ अत एव स भिक्षुरनिकेतस्थितिरेव॥ यदि निय
तनिवासार्थं कंचिन्मठं संपादयेत्तदा नीतस्मिन्नेव ममत्वे सति तदीयहानिवृद्धी:
चित्तं विक्षिप्येत॥ एतदेवाभिप्रेत्य गौडपादाचार्या आहुः॥ निस्तुतिर्निर्नमस्कारो निः
स्वधाकार एव च॥ चलाचलनिकेतश्च यादृच्छिको भवेदिति॥ यथा मठेन परिग्रहेन

जीव॰

व्यः तथा सौवर्णरजतादीनां भिक्षाचमनादिपात्राणामेकमपि न गृह्णीयात् तदा
हयमः हिरण्मयानि पात्राणि कृष्णायसमयानि च यतीनां तान्यपात्राणि वर्जये
त्तानि भिक्षुक इति मनुरपि अतैजसानि पात्राणि तत्स्युर्निर्व्रणानि च तेषाम
द्भिः स्मृतं शौचं चमसानामिवाध्वरे अलाबुदारुपात्रं वा मृन्मयं वैणवं तथा एता
नि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीत् इति बौधायनोऽपि स्वयमाहृतपर्णेषु स्वयं
शीर्णेषु वाऽथुनां भुंजीत न वटाश्वत्थकरंजानां च पर्णके आपद्यपि न कांस्येषु मला
शी कांस्यभोजनः सौवर्णराजतेताम्रमृण्मयेना त्रपुसीसमयोरिति तथा लोकजनं शि
ष्यवर्गं न गृह्णीयात् तदाह मनुः एक एव चरेन्नित्यं सिद्ध्यर्थमसहायकः सिद्धिमे
कस्य संपश्यन्न जहाति न हीयत इति मेधातिथिरपि आसनं पात्रलोपश्च संच

११६

म२

यः शिष्यसंग्रहः॥ दिवास्वापो वृथालापो यतेर्बंधकराणि षट्॥ एकाहात्परतो ग्रामे पं
चाहात्परतः पुरे॥ वर्षाभ्योऽन्यत्र यत्स्थानमासनं तदुदाहृतं॥ उक्तालाबुवादिपात्राणा
मेकैकस्याप्यसंग्रहः॥ भिक्षोर्नैष्ठ्यभुजश्चापि पात्रलोपः स उच्यते॥ गृहीतस्य तु
दंडादेर्द्वितीयस्य परिग्रहः॥ कालांतरोपभोगार्थसंचयः परिकीर्तितः॥ शुश्रूषा
लाभपूजार्थं यशोर्थं वा परिग्रहः॥ शिष्याणां न तु कारुण्यात्स ज्ञेयः शिष्यसंग्र
हः॥ विद्या दिनं प्रकाशत्वादविद्या रात्रिरुच्यते॥ विद्याभ्यासे प्रमादो यः स दिवास्वाप
उच्यते॥ आध्यात्मिकीं कथां मुक्त्वा भैक्ष्यचर्यां सुरस्तुतिं॥ अनुग्रहंमथि प्रश्नान्वृथा
लापः स उच्यते॥ लोकं शिष्यजनरूपं न गृह्णीयादित्येतावदेव न भवति किंतु तस्य
लोकस्यावलोकं दर्शनमपि न कुर्यात्॥ तस्य बंधहेतुत्वात्॥ न चेत्यनेनान्यदपि

॥२

~दार॰२

जीव॰

स्मृतिनिषिद्धं न कुर्यादित्यभिप्रेतं" तच्च निषिद्धं मेधातिथिर्दर्शयति" स्थावरं जंगमं
बीजं तेजसं विषमायुधं" षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषवत्" रसायनं क्रिया
वादं ज्योतिषं क्रयविक्रयं" विविधानि च शिल्पानि वर्जयेत्परदारवदिति" योगिनो
लौकिकवैदिकव्यवहारगतानि यानि बाधकानि संति तेषां वर्जनमभिहितं"
अथ पूर्वोत्तराभ्यामत्यंतबाधकं प्रदर्श्य तद्वर्जनमाह" आबाधकः क इति चेद्बा
बाधकोत्यंतं यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं चेत्स ब्रह्महा भवेद्यस्माद्भिक्षुर्हिर
ण्यं रसेन स्पृष्टं चेत्स पौल्कसो भवेत् यस्माद्भिक्षुर्हिरण्यं रसेन गृहीतं चेत्स आ
त्महा भवेत् तस्मान्न दृष्टं च न स्पृष्टं च न ग्राह्यं चेति" आकारोभिव्याप्त्यर्थः" ओ ई
षदभिव्याप्ताविति अभिहितत्वात्" अभिव्याप्तो बाधकोत्यंतबाधकः" तस्य स॰

ति

१२१

ॐ

र्थे

द्भिक्षुर्हिरण्यं रसेन२

ज्ञावंप्रतिज्ञाय हिरण्यस्य तथाविधबाधकत्वमुच्यते॥ रसेनाभिलाषयुक्तेनादरेण
हिरण्यं परिगृहीतं स्यात्तदानीं सद्यष्ठ भिक्षुर्ब्रह्महा भवेत्॥ हिरण्यासक्त्या तत्संपादनर
क्षणयोः सर्वदा प्रयतमानस्तद्वैयर्थ्यपरिहाराय प्रपंचमिथ्यात्वप्रतिपादकान्वेदां
तान्दूषयित्वा तत्सत्यत्वमवलंबेत॥ ततः शास्त्रसिद्धमद्वितीयं ब्रह्म तेन भिक्षु-
णा हतमिव भवति तस्मादसौ ब्रह्महा भवेत्॥ तथा च स्मर्यते॥ ब्रह्म नास्तीति यो
ब्रूयाद्द्वेष्टि ब्रह्मविदं च यः॥ अभूतब्रह्मवादी च त्रयस्ते ब्रह्मघातका इति॥ अभि
लाषपूर्वकं हिरण्यं स्पृष्टं चेत्तदा सद्यष्ठा भिक्षुः पतितत्वात् पौल्कसो म्लेच्छसदृशो भ
वेत्॥ ऽतिसं च स्मर्यते॥ पतत्यसौ ध्रुवं भिक्षुर्यस्य भिक्षोर्द्वयं भवेत्॥ धीपूर्वं रेतउ
त्सर्गो द्रव्यसंग्रह एव चेति॥ अभिलाषपुरःसरं हिरण्यं गृहीतं चेत्तदा स भिक्षुर्दे

हेंद्रियादिसाक्षिणं असंगं चिदात्मानं हतवान् भवेत्॥ असंगत्वमपोह्य स्वात्मनो हि
रण्यादिद्रव्यप्रतिभोक्तृत्वेन प्रतिपत्तेस्तस्याश्चान्यथाप्रतिपत्तेः सर्वपापरूपत्वं।
स्मर्यते॥ योन्यथा संतमात्मानमन्यथा प्रतिपद्यते॥ किं तेन न कृतं पापं चोरेणात्माप
हारिणेति॥ किं चात्मघातिनः सुखलेशेन विरहिता बहुविधदुःखेनावृता लोकाः
श्रूयंते॥ असुर्या नाम ते लोका अंधेन तमसावृताः। तांस्ते प्रेत्याभिगच्छंति ये के चा।
त्महनो जना इति। दृष्टं चेत्यनेन चकारेण श्रुतं चेति समुच्चीयते॥ स्पृष्टं चेत्यनेन
कथितं स्मृतिसमुच्चयः॥ शास्त्रं चेत्यनेन व्यवहृतं चेति समुच्चयः॥ दर्शनस्पर्शनग्रह
णव्यवहाराभिलाषपूर्विका हिरण्यवृत्तांतश्रवणतद्गुणकथनतद्विषयक्रियादिव्यवहारा
अपि प्रत्यवायहेतवः इत्यर्थः॥ यस्मात्साभिलाषपूर्वकहिरण्यदर्शनादयो दोषकारिण

पूर्वक

तस्माद्भिक्षुणा हिरण्यदर्शनादयो वर्जनीया इत्यर्थः॥ हिरण्यवर्जनस्य फलमाह॥ सर्वेका
मामनोगता व्यावर्तंते दुःखेनोद्विग्नः सुखे निःस्पृहस्त्यागो रागे सर्वत्र शुभाशुभयोरनभि
स्नेहो न हृष्टि न मोदते चैसर्वेषामिंद्रियाणां गतिरुपरमते य आत्मन्येवावस्थीयते
इति पुत्रभार्यागृहक्षेत्रादिकामानां सर्वेषां हिरण्यमूलत्वाद्धिरण्ये परित्यक्ते सति ते
कामा मनोगता मनस्यवस्थाना तु व्यावर्तंते व्यावृत्ता भवंति॥ कामनिवृत्तौ सत्यां क
र्मप्राप्तयोर्दुःखसुखयोरुद्वेगस्पृहे न भवतः एतच्च स्थितप्रज्ञप्रस्तावे प्रपंचितं॥ ऐहिक
योः सुखदुःखयोरविक्षेपकत्वे सत्यामुष्मिकविषयरागेऽपि त्यागो भवति ऐहिकसुखस्पृ
हायुक्तो हि तद्दृष्टांतेनानुमिते आमुष्मिके सुखे रागवान् भवति तस्मादैहिके निस्पृह
स्यामुष्मिकरागाभावो युज्यते॥ एवं सति सर्वत्र लोकद्वयेऽपि योऽशुभाशुभावनुकूल

मा॥२

233

जीव०

प्रतिकूलविषयोस्तयोरनभिस्नेहः॥ एतच्च द्वेषराहित्यस्याप्युपलक्षणं॥ तादृशो विद्वान
शुभकारिणं कंचिदपि पुरुषं न द्वेष्टि॥ शुभकारिणं च दृष्ट्वा न च मोदं प्राप्नोति॥ द्वेषमोदर
हितो यः प्रमानात्मन्येव सर्वदावतिष्ठते॥ तस्य सर्वेषामिंद्रियाणां गतिः प्रहतिरुपरम
तैरिंद्रियोपरतो न कदाचिदपि निर्विकल्पसमाधेर्विघ्नो भवति॥ तेषां का स्थितिरिति प्रश्न
स्य संक्षेपविस्तराभ्यामुत्तरं सर्वमुक्तं॥ तदेवात्र पुनरपि हिरण्यनिषेधप्रसंगेन स्पष्टीकृ
अथ विद्वत्संन्यासमुपसंहरति॥ यः पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भ
वतीति॥ यद्ब्रह्म वेदांतेषु पूर्णानंदैकबोधः परमात्मेति निरूपितं तद्ब्रह्माहमस्मीत्येवं
सर्वदानुभवन् यो योगी परमहंसः स कृतकृत्यो भवतीति॥ तथा च स्मर्यते॥ ज्ञानामृतेन
तृप्तस्य कृतकृत्यस्य योगिनः॥ नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित्॥ जीव
न्मुक्तिविवेकेन बंधहार्दं निवारयन्॥ पुमर्थमखिलं देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीजी

[OrderDescription]
,CREATED=04.09.20 15:48
,TRANSFERRED=2020/09/04 at 16:35:59
,PAGES=234
,TYPE=STD
,NAME=S0003587
,Book Name=M-1470-JIVANMUKTIVIVEK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

```
FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
```

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,